SAMSKAR MAYUKHA

OF

SHRI SHANKAR BHATTA
NILKANTHA BHATTA

VOLUME I

EDITED BY

PANDIT NARAHARI SHASTRI SHENDE

Printed and Published at

THE GUJARATI PRINTING PRESS

by Manilal Itcharam Desai

SASSOON BUILDINGS, CIRCLE, FORT,

BOMBAY

Price Twelve Annas

A. D. 1913
SAMVAT 1969

श्रीनीलकंठभट्टसुतशंकरभट्टकृतः

संस्कारमयूखः

(प्रथमः)

शेंडे उपाह्वैः पण्डितनरहरिशास्त्रिभिः
संशोधितः

मुम्बय्यां

'गुजराती' मुद्रणालयाधिपतिना स्वीयमुद्रणालये

संमुद्य प्रकाशितः

संवत् १९६९ खिस्ताब्दः १९१२

मूल्यं [illegible]णकाः ॥/

विज्ञापनम् ।

पूर्वं वाराणस्यां शिलाक्षरैर्मुद्रिता अपि द्वादश मयूखा नितान्तमशुद्धाः प्रायः सर्वत्र गलितवर्णपदपङ्क्तयश्च्युतसंदर्भाश्चासन् । अधुना च तादृशा अपि न क्रेतृजनसुलभाः । अतस्तान्सम्यक्परिशोध्य मुद्रापयितुमस्ति नः संकल्पः । तत्रैव प्रथमः संस्कारमयूख इदानीं प्रकाश्यते । अयं च 'भोर' भूपालास्थानपण्डितैः शेडेउपाह्वयैर्नरहरिशास्त्रिभिः प्राचीनलिखितपुस्तकसाहाय्येन शोधितोऽपि बहुषु स्थलेषु पुनः शोधनापेक्ष एवासीत् । अतोऽस्मन्मुद्रणालयस्थैः वाकेउपाह्वैर्महादेवशास्त्रिभिर्मुद्रणावसरे लिखितपुस्तकान्तरालाभान्निबन्धान्तरदर्शनादिना तात्पर्यावधारणादिपुरःसरं पुनः परिशोधितुमारब्धः । कार्यवशाद् वैराजक्षेत्र(वांई)गतास्तान् चतुर्थपञ्चमसंपुटशोधनावसरे परं क्लिश्यतो दृष्ट्वाऽन्तेवासिप्रणयेन बलादिव नियोजितास्तत्क्षेत्रमण्डनभूता वेदवेदार्थप्रवचनपटीयांसः श्रौतस्मार्तक्रियास्वनन्यसाधारणनैपुण्यभाजो रानडेवंशमुक्तामणयः 'श्रीबाळशास्त्रीतात्या' इतिविश्रुतनामधेयाः साहाय्याचरणेनान्वगृह्णन् । किंचास्य लिखितपुस्तकान्तरमन्तरेण संशोधनं न केवलमत्यन्तक्लेशावहं किंत्वशक्यमिव मत्वा पुण्यपत्तनस्थान् श्रीयुत 'विश्वनाथराव दातार' इत्येतानस्मदर्थं पुस्तकदानमभ्यर्थयांचक्रु । तैश्च स्वपितृचरणानां पूर्वमीमांसायां धर्मशास्त्रे चासाधारणपाण्डित्यजुषां स्वर्गासिना गङ्गाधरशास्त्रिणां पुस्तकसंग्रहात् संस्कारमयूखपुस्तकदानेन वयमनुगृहीताः । तदेव पुस्तकमत्र च. संज्ञया निर्दिष्टम् । एतत् विक्रमसंवत् १८११ वत्सरे कायस्थेन लिखितमशुद्धिप्रचुरमपि शुद्धपाठकल्पनायां बहुतरमुपयुक्तम् । तदेवं महान्तमायासमुररीकृत्य शोधितस्यास्य दर्शनेन नन्दिष्यन्ति विद्वांस इत्याशास्ते–

प्रकाशकः ।

संस्कारमयूखस्थविषयानुक्रमणिका ।

समाप्तेयमनुक्रमणिका ।

॥ श्रीभगवन्तभास्करे ॥

संस्कारमयूखः ।

प्रथमः १.

मङ्गलाचरणम् ।

यतः सर्वं विश्वं भजति जनिसत्तालयमिदं
य आत्मा सर्वेषां स्थिरचरजडानामपि विभुः ।
तमेतं भास्वन्तं विधिहरिमहेशानवपुषं
नमस्यामः कामं परमकमनीयं सुकृतिनाम् ॥ १ ॥

श्रीभास्करं शिवकरं शिरसा प्रणम्य श्रीनीलकण्ठपितरं जननीं च गङ्गाम्
तत्पादचिन्तनवलो बुधशङ्कराख्यः संस्कारभास्करममुं वितनोति काश्याम् ॥२॥

निबन्धोपयोगी विचारः ।

तत्रास्य धर्मप्रमाणविवेचकत्वात्प्रथमं धर्मप्रमाणान्युच्यन्ते । तान्याह याज्ञवल्क्यः—

धर्मप्रमाणानि ।

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ इति ।

सदाचारः श्रुतिस्मृत्यविरुद्धोऽदृष्टार्थो वसन्तोत्सवादिः । धर्मे मूलं प्रमाणमित्यर्थः । सम्यक्संकल्पाज्जातः कामो यथा भोजनव्यतिरेकेण जलं न पातव्यमिति । एतेषां च विरोधे पूर्वं पूर्वं बलीयः । तथा च प्रयोगपारिजाते संग्रहे—

श्रुतिस्मृतिपुराणेषु विरुद्धेषु परस्परम् ।
पूर्वं पूर्वं बलीयः स्यादिति न्यायविदो विदुः ॥

स्मृतिष्वपि मनुस्मृतिः प्रबला, इति । तथाचाङ्गिराः—

मन्वर्थविपरीता तु या स्मृतिः सा विनश्यति ॥ इति ।

विनश्यति अनादरणीयेत्यर्थः । तथा 'मनोर्ऋचः सामिधेन्यो भवन्ति'

---

१ सद्दस। पाठ ड ।

इत्यस्य वाक्यशेषे श्रूयते-'यद्वै किंच मनुरवदत्तद्भेषजम्' इति।

स्मृतिप्रवर्तका उक्ता याज्ञवल्क्येन-

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः॥ इति।

अन्येऽप्युक्ताः पैठीनसिना—

तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः।
वसिष्ठदक्षसंवर्तशातातपपराशराः॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः।
प्रचेता नारदो योगी बौधायनपितामहौ॥
सुमन्तुकाश्यपौ बभ्रुः पैठीनो व्याघ्र एव च।
सत्यव्रतो भरद्वाजो गार्ग्यः कात्यायनस्तथा॥
जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसंभवः।
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः॥

षट्त्रिंशदिति न परिसंख्या। तेन विश्वामित्रादीनामपि धर्मप्रणेतृत्वं सिद्धम्। एवमायुर्वेदादीनामपि स्मृतित्वम्। तत्र केचन दृष्टमूलाः केचन श्रुतिमूला अर्थाः। एवं पुराणादीनामपि। अस्माभिस्तु प्रामाणिकानां वराहमिहिरादीनां वचांसि प्रमाणत्वेनोपन्यस्यन्ते।

संहिता उक्ता हेमाद्रौ भविष्यत्पुराणे—

भार्गवी नारदीया च बार्हस्पत्याङ्गिरस्यपि।
स्वायंभुवस्य शास्त्रस्य चतस्रः संहिता मताः॥

यत्तु सूतसंहितायाम्—

आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता।
तृतीया शांकरी विप्राश्चतुर्थी वैष्णवी मता।
ततश्च संहिता ब्राह्मी सौरयन्त्या संहिता तथा॥

इति संहिता उक्तास्ताः स्कान्दान्तर्गता न स्वतन्त्राः।

अन्येऽपि संहिताकर्तारः कश्यपेन गणिताः—

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः॥

रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशैवैते ज्योतिःशास्त्रप्रवर्तकाः॥ इति।

संहितालक्षणं च—

आदौ शास्त्रोपनयनं खेटचारोऽब्दलक्षणम्।
तिथिवासरनक्षत्रयोगतिथ्यर्धलक्षणम्[1]॥
मुहूर्तोपग्रहः सूर्यसंक्रान्तिर्गोचरक्रमः।
चन्द्रताराबलं चैव क्रियाः षोडशकर्मणाम्॥
नृपाभिषेचनं देवप्रतिष्ठा सद्मलक्षणम्।
अग्न्याधानं मेघगर्भनिखिलोत्पातलक्षणम्।
तच्छान्तिर्मिश्रकाध्यायस्तृतीयस्कन्धसंभवः॥

तृतीयस्कन्धः संहिता, संभवो रचना।

महापुराणान्युक्तानि वैष्णवे—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा।
तथाऽन्यं नारदीयं च मार्कण्डेयं च सप्तमम्॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम्॥
वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम्।
चतुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम्॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम्।
अष्टादश पुराणानि कीर्तितानि मया तव॥ इति।

उपपुराणानि कौर्मे—

अन्यान्यपि पुराणानि मुनिभिः कथितानि तु।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्॥
तृतीयं नान्दमुद्दिष्टं कुमारेण तु भाषितम्।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम्॥
कापिलं मानवं चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणं चैव कालिकाह्वयमेव च॥
माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम्।
पराशरोक्तं प्रथमं तथा भागवताह्वयम्।
इदमष्टादशं प्रोक्तं पुराणं कौर्ममुत्तमम्॥

---

१ तिथ्यर्धं करणम्।

महापुराणमध्ये गणितानामप्युपपुराणेषु गणनायां न कोऽपि विरोधः । एकस्यैवोभयसंज्ञाकरणे विरोधाभावात् । इत्युपपुराणानि ।

धर्मलक्षणं जैमिनिराह—चोदनालक्षणोऽर्थो धर्मः । विधिश्चोदनाशब्देनोच्यते । तत्प्रमाणक इत्यर्थः । धर्माधर्मयोरुपादानपरित्यागावुक्तौ स्कान्दे—

धर्माद्राज्यं धनं सौख्यमधर्माद्दुःखसंभवः ।
तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विसर्जयेत् ॥

" धर्मेण पापमपनुदति " इति च श्रुतिः । धर्मश्च द्विविधः । श्रौतः स्मार्तश्च । श्रौतोऽग्निहोत्रज्योतिष्टोमादिः । स्मार्तोऽष्टकादिः । अस्मिंश्च ग्रन्थे स्मार्तधर्मः [अधि?] क्रियते ।

अथ देशा विष्णुपुराणे—

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र संततिः ॥
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् ॥

मनुः—आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥

तयोर्हिमवद्विन्ध्ययोः । विष्णुर्विशेषमाह—

चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते ।
तं म्लेच्छदेशं जानीयादार्यावर्तमतः परम् ॥

मनुः—कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥

तथा—सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

तथा—हिमवद्विन्ध्ययोर्मध्ये यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥

विनशनं सरस्वत्याः । तथा—

कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनिकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ॥
एतान्द्विजातयो देशान्संश्रयेयुः प्रयत्नतः ।
शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ॥

एष धर्मस्य वै योनिः समासात्कथितः किल ।
सर्वपापहरः पुण्यसाधनं सर्वकर्मणाम् ॥'

अनन्तरं ईषन्न्यूनः । मत्स्या विराटदेशाः । पञ्चालाः कान्यकुब्जदेशाः । शूरसैनिका मथुरादेशाः । व्यासः—

सर्वे शिलोच्चयाः पुण्याः सागराः सरितस्तथा ।
अरण्यानि च पुण्यानि विशेषान्नैमिषं तथा ॥

तथा—आर्यावर्तसमुत्पन्नो द्विजो वा यदि वाऽद्विजः ।
कर्मदां सिन्धुपारं च करतोयां न लङ्घयेत् ॥
आर्यावर्तमतिक्रम्य विना तीर्थक्रियां द्विजः ।
आज्ञां चैव तथा पित्रोरैन्दवेन विशुध्यति ॥ इति ।

इति निबन्धोपयोगी विचारः ।

विनायकपूजनस्वस्तिवाचनादि ।

अथ संस्कारोपयोगि विनायकपूजनस्वस्तिवाचनाद्युच्यते ।

विनायकपूजनम् । गृह्यपरिशिष्टे—'आदौ विनायकः पूज्यः अन्ते तु कुलदेवताः ॥ तथा—अथ स्वस्तिवाचनमृद्धिपूर्तेषु । ऋद्धिर्विवाहान्ता अपत्यसंस्काराः, प्रतिष्ठोद्यापने पूर्तं, तत्कर्मणश्चाद्यन्तयोः कुर्यादिति । शौनकः—

स्वस्तिवाचनम् । पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधि ।
प्रयोक्तुः कर्मणां चादावन्ते चोदयसिद्धये ॥ इति ।

व्यासः—संपूज्य गन्धमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् ।
धर्मकर्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने ।

तच्च प्रधानप्रयोगान्तर्गतमिति केचित् । प्रयोगबहिर्भूतमिति तु बहवः । तत्राद्ये प्रधानसंकल्पं कृत्वा तत्कार्यम् । द्वितीये तु तत्कृत्वा प्रधानसंकल्प इति प्रयोगरत्ने भट्टचरणाः ।

कर्मप्रदीपे—कर्मादिषु च सर्वत्र मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
प्रतिमासु च शुद्धासु लिखित्वा वा पटादिषु ।
अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥
कुड्यलग्ना वसोर्धाराः सप्तवारं घृतेन तु ।
कारयेत्पञ्च धारा वा नातिनीचा न चोच्छ्रिताः ॥

आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥ इति ।

मातरो गौर्यादयः षोडश । वसोर्धारादेवताः 'ब्राह्मी माहेश्वरी' इत्याद्याः सप्त स्मृत्यन्तरप्रसिद्धा ज्ञेयाः । षड्भ्य इति कातीयच्छन्दोगपरम् । अन्येषां तु नवदैवत्यम् ।

महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
नवदैवतमत्रेष्टं शेषं षाट्पौरुषं विदुः ॥

इति हेमाद्रौ वचनादिति तातचरणाः । मम तु प्रतिभाति—

महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे प्रोष्ठपदासु च ॥

इति द्वादशदैवत्यविधानात्पक्षत्रयमपि यथासंप्रदायं व्यवतिष्ठते इति ।

आभ्युदयिकापरपर्यायनान्दीश्राद्धनिमित्तान्याह लौगाक्षिः—

नान्दीश्राद्धम्। नामान्नचौलगोदानसीमोपनयपुंसवे ।
स्नानाधानविवाहेषु नान्दीश्राद्धं विधीयते ।

वृद्धगार्ग्यः— .

अग्न्याधानाभिषेकादिष्विष्टापूर्ते स्त्रिया ऋतौ ।
वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथा ॥ इति ।

जाबालिः—'यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः ॥
पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् ॥

विष्णुपुराणेऽपि— कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः ।
नामकर्मणि बालानां चूडाकर्मणिके तथा ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणमर्चयेत्प्रयतो गृही ॥

तथा—जातस्य जातकर्मादिक्रियाकाण्डमशेषतः ।
पुत्रस्य कुर्वीत पिता श्राद्धं चाऽभ्युदयात्मकम् ॥

जातकर्मादिक्रियाकाण्डमपत्यसंस्काराः । पुत्रस्येति पुंस्त्वमविवक्षितमनुवाद्यविशेषणत्वात् । तेन कन्याया अपि संस्काराङ्गमाभ्युदयिकं समन्त्रकमेव भवति । मन्त्रबाधे मानाभावात् । यत्तु पुंजातकर्मादिसंस्कारानुक्त्वा याज्ञवल्क्यवचः—'तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः' । इति प्रधानाङ्गमन्त्राबाधपरम् । यदि हि 'अप्स्ववभृथेन चरन्ति' इति तृतीयान्तेनेव साङ्गभावनामुक्त्वा तस्यां तूष्णीन्त्वं विधीयेत तदा स्याद(ङ्गा)ङ्गभूतम-

न्त्रबाधः । इह तु "यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्याः" इत्यत्रेष्टीनामिव क्रियाणां प्रथमान्तपदोपात्तत्वात्प्रधान एव तूष्णीन्त्वविधिर्नोऽङ्गेऽपीति वृद्धिश्राद्धं समन्त्रकमेव भवतीति श्राद्धमयूखे तातचरणाः ।

यत्तु—'नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमारभेत्' तद्यत्र प्राप्तिस्विकवाक्ये नान्दीश्राद्धमुक्तं तत्रैवोपसंह्रियते । यद्वा वाक्यान्तरप्राप्तकर्माङ्गत्वे एतत्पूर्वकालत्वामात्रमेव बोधयति न कर्माङ्गतामपि । अतो न संध्यावन्दनादावतिप्रसङ्गः । पक्षद्वयेऽपि—

नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते ।
न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु ॥

इति कर्मप्रदीपवचोऽनुवादकमेव न निषेधकं प्राप्त्यभावात् । सोष्यन्तीकर्म सुखप्रसवार्थम् । प्रोषितागते च पुत्रे पितुः कर्म छन्दोगपरिशिष्टे प्रसिद्धम् । अत एव—

नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयात्मकम् ।
पुत्रजन्मनि तत्कार्यं जातकर्मसमं नरैः ॥

इति मार्कण्डेयपुराणवचने नैमित्तिक-जातकर्मसम-पदाभ्यां पुत्रजन्मनिमित्तकमेव श्राद्धं न तु जातकर्माङ्गमित्युक्तं संगच्छते ।

यत्तु हेमाद्रौ—'वृद्धिश्राद्धं तु कर्तव्यं जातकर्मादिकेषु वै ।' इति । तत्रापि जातकर्म आदौ येषामित्यतद्गुणसंविज्ञानबहुव्रीहिणा नामकर्मादीनामेव ग्रहणं न जातकर्मण इति । एवं च जातकर्मातिरिक्तसंस्कारेषु नान्दीश्राद्धस्याङ्गत्वे सिद्धे यदैकसंस्कार्यस्यानेकसंस्कारेष्वेककर्तृकेषु एकस्मिन्काले युगपदुपस्थितेषु देशकालकर्त्रैक्याद्गृह्यमाणत्वपतन्त्रन्यायादेव मातृपूजनाभ्युदयिकयोः सकृदनुष्ठाने प्राप्ते—

गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ॥

इति श्रावणवचनमनुवादकमेव न सकृत्त्वविधिपरम् । अन्ये तु—'अनेनैव न्यायेनानेकसंस्कार्याणां सजातीयविजातीयानेकसंस्कारेष्वपि सकृदेव तत्' इत्याहुः । तन्न । संस्कारजन्यचरमापूर्वाणामनेकसंस्कार्यनिष्ठत्वेन तदङ्गाभ्युदयिकश्राद्धजन्याङ्गापूर्वाणामपि तन्निष्ठत्वस्यावश्यकत्वात् । न च तत्संभवति 'एकया सामग्र्यैकमेव कार्यं जन्यते' इति नियमस्य योगसिद्ध्यधिकरणे स्थापितत्वान्न सकृदनुष्ठितेनाभ्युदयिकेनानेकापूर्वोत्पत्तिरिति अनेकसंस्कार्येषु पृथगेव वृद्धिश्राद्धमिति तातचरणाः ।

ननु सत्रादिष्वनेकयजमानगतान्यनेकान्यपूर्वाण्येकस्मात्सत्रप्रयोगादुत्पद्य-
न्त इत्युक्तनियमे व्यभिचारात्प्रकृतेऽपि तथास्त्विति चेन्न[1]। तत्रापि स्वस्वात्मघ-
टितसामग्रीभेदात् ।

एवं प्रधानावृत्त्या प्राप्ताया नान्दीश्राद्धावृत्तेरपवादः कर्मप्रदीपे—

असकृद्यानि कर्माणि क्रियेरन्कर्मकारिणा ।
प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च ॥ इति ।

तान्येव कर्माण्याह—

आधानहोमयोश्चैव वैश्वदेवे तथैव च ।
वलिकर्मणि दर्शे च पौर्णमास्यां तथैव च ।
नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः ॥
एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक् ॥

असकृत्पुनः पुनः । प्रतिदिनं प्रतिमासं प्रत्यब्दं चेति यावत् । नवयज्ञो
नवान्नेष्टिः । पूर्वश्लोकस्थकर्मशब्दस्योत्तरश्लोकपरिगणितेषु कर्मसूपसंहारस्ते-
नापरिगणितज्योतिष्टोमादिषु भवत्येव प्रतिप्रयोगं वृद्धिश्राद्धमिति तातच-
रणाः । होमादिनवयज्ञपर्यन्तेषु न पृथक् श्राद्धं किंत्वाधानादौ कृतमेव
श्राद्धमुपकरोतीति केचित् । आभ्युदयिके कालमाह वसिष्ठः—

पूर्वेद्युर्मातृकं श्राद्धं कर्माहे पैतृकं तथा ।
उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु ॥
अलाभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः ।
पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम् ॥ इति ।

मातृपूर्वकमेव श्राद्धत्रयं विवृतमाश्वलायनेन—

माता पितामही चैव संपूज्या प्रपितामही ।
पित्रादयस्त्रयश्चैव मातुःपित्रादयस्त्रयः ।
एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः ॥ इति ।

यत्तु वृद्धवसिष्ठवचनम्—

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् ।
नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकम् ॥ इति ।

स्मृत्यर्थसारे च—

वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुञ्जते । इति ।

---

१ चेन्नु । तथापि पाठः के.

तदाश्वलायनान्यपरम् । आश्वलायनानां त्वाश्वलायनवचनादानुलोम्येन सन्मात्रादिपूर्वकमिति भट्टचरणप्रभृतयो बहवः। मात्रादीन्विशिनष्टि विष्णुः—

नान्दीमुखान्पितॄनादौ तर्पयेत्पितृदेवताः । इति ।

अत्र पितृशब्दो न जनकपरः किंतु सपिण्डीकरणजन्यपितृभावपरः । पितॄनिति बहुवचनात् । यत्तु ब्राह्मे—

पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा एते पितरः संप्रकीर्तिताः ।
तेभ्यः पूर्वे त्रयो ये तु ते तु नान्दीमुखाः स्मृताः ॥ इति ॥

तन्महालयप्रकरणपठितत्वादिति हेमाद्र्यादयः ।

विभक्त्यादिविषये विशेषः प्रयोगरत्नसंग्रहे—

शुभाय प्रथमान्तेन वृद्धौ सं(सां?)कल्पमाचरेत् ।
न षष्ठ्या यदि वा कुर्यान्महादोषोऽभिजायते ॥
अनसमद्वृद्धशब्दानामरूपाणामगोत्रिणाम् ।
अनाम्नां चातिलार्थैश्च नान्दीश्राद्धं च सव्यवत् ॥

कारिकायां च—

संबन्धनामरूपाणि वर्जयेदत्र कर्मणि ।

पिण्डदानव्यवस्थोक्ता भविष्यत्पुराणे—

पिण्डनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप ।
वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु ॥ इति ।

पिण्डदानपक्षे विशेषमाह वृद्धवसिष्ठः—

दधिकर्कन्धुसंमिश्रान्पिण्डान्दद्याद्यथाक्रमम् ।

कर्कन्धुर्बदरीफलम् । एकैकस्मै पिण्डद्वयं वा देयम् ।

एकं नाम्नाऽपरं तूष्णीं तथा पिण्डद्वयं बुधः ॥

इति चतुर्विंशतिमतात् । अत्र कर्तृव्यवस्थोक्ता कात्यायनेन ।

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥

तेषां सुतानामोद्वाहनात्प्रथमविवाहपर्यन्तं पिता स्वपितृभ्यः पिण्डदानोपलक्षितं वृद्धिश्राद्धं कुर्यात् । तस्य पितुरभावे तस्य संस्कार्यस्य पितॄणां यः क्रमस्तेन क्रमेण पितृव्यमातुलादिर्दद्यान्न स्वपितृभ्य इति हेमाद्रिः । अत्र पितुरभावो ध्वंस एव । नत्वसन्ताभावः । तथात्वे प्रतिनिधित्वादेव तदीयेभ्य एव पित्रादिभ्यो दद्यात्येवेति वचनवैयर्थ्यं स्यात् । तं पितरमारभ्य संस्कार्यस्य

चारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत्संस्काराः' इति । 'यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्राह्मणो ब्रह्मणः सायुज्यमाप्नोति' इति । पार्वणः स्थालीपाकः । श्रावणी तत्र क्रियमाणं श्रवणाकर्म । आग्रहायणी तत्र क्रियमाणं प्रत्यवरोहणम् । चैत्री तत्र क्रियमाणः शूलगवः । आश्वयुजी तत्र क्रियमाणमाश्वयुजीकर्म । अष्टावात्मगुणाः । दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गल्यमकार्पण्यमस्पृहा' इति ।

हारीतः—द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च । गर्भाधानादिः स्मार्तो ब्राह्मः । पाकयज्ञा हविर्यज्ञाश्चेति दैवः । ब्राह्मेण संस्कारेण संस्कृत ऋषीणां सलोकतां गच्छति । दैवेनोत्तरेण संस्कृतो देवानां समानतां सलोकतां गच्छतीति ।

अङ्गिरास्तु पञ्चविंशतिसंस्कारानाह—

पञ्चविंशति-संस्काराः ।

गर्भाधानं पुंसवनं सीमन्तो बलिरेव च ।
जातकृत्यं नामकर्म निष्क्रमोऽन्नाशनं परम् ॥
चौलकर्मोपनयनं तद्व्रतानां चतुष्टयम् ।
स्नानोद्वाहौ चाग्रयणमष्टकाश्च यथायथम् ॥
श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणम् ।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः ।
पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्याश्च श्राद्धादिषु सुयन्त्रिताः ॥ इति ।

बलिर्विष्णुबलिः । आश्वलायनस्तु संज्ञाविशेषमप्याह—

नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः ।
सचैवाग्रयणाद्याश्च संस्कारा वार्षिका मताः ॥
मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम् ।
महायज्ञाश्च नित्याः स्युः संध्यावच्चाग्निहोत्रवत् ॥ इति ।

पार्वणं श्राद्धम् । मासिकं मासि मासि कर्तव्यम् । अशक्ताना वार्षिकं वर्षे एकवारं कर्तव्यमिति । संस्कारानुक्त्वा यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः । इति ।

होमोऽपि द्विजानामेव ।

गार्भैर्होमैर्जातकर्मचूडामौञ्जिनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥

इति मनुवाक्ये द्विजग्रहणादिति धर्मप्रकाशे ।

बीजं शुक्रशोणिते तत्संबन्धि निषिद्धकालमैथुनादिप्रयुक्तं बैजिकम् । अशुचिगर्भकोशस्थितिजं गार्भिकम् । तदपगच्छतीति कुल्लूकभट्टः ।

बीजगर्भयोः पापनिमित्तत्वाभावादुभयसंसर्गादशुचित्वमात्रमेनःशब्दार्थो न पापमिति तु मेधातिथिः ।

विज्ञानेश्वरस्तु 'एवमेनः शमं याति बीजगर्भसमुद्भवम्' इत्येतद्व्याख्याने— 'गोत्रव्याधिसंक्रान्तिनिमित्तमेनो न तु पतितोत्पन्नत्वादि' इत्याह । पापनिरासार्थत्वाच्च नित्यतापि । याज्ञवल्क्यः—

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥ इति ।

तेषां मन्त्रतः क्रिया इत्युक्तेः शूद्रस्यामन्त्रका इति गम्यते । तत्र तस्याध्ययनाभावात्तदङ्गभूतोपनयनवेदव्रतादीनां निवृत्तिः । जातकर्माद्याः स्त्रीणामप्यमन्त्रकाः—

तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः । इति स्मृतेः ।

अत्र चोपनयनान्तानामावश्यकत्वं न स्नानादीनाम् । तेन 'यमिच्छेत्तु तमावसेद्ब्रह्मचर्यादेव प्रव्रजेत्' इत्यादि संगच्छते । आश्वलायनेन तु 'उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनं च' इत्यनवलोभनमप्युक्तम् । अन्येऽपि कर्णवेधादयः संस्कारा ज्योतिःशास्त्रोक्तास्तत्र तत्र वक्ष्यन्ते ।

इति संस्कारोद्देशः ।

रजोदर्शनविचारः ।

तत्र गर्भाधानहेतुरजोदर्शने प्रशस्ताप्रशस्तकालानाह नारदः—

रजोदर्शने प्रशस्तकालः । पुंर्लोरवृषचापान्त्यनृयुक्कन्यातुलाघटाः ।
राशयः शुभदा ज्ञेया नारीणां प्रथमार्तवे ॥

कुलीरः कर्कटः । चापो धनुः । अन्त्यो मीनः । नृयुक् मिथुनम् । घटः कुम्भः । स्मृतिचन्द्रिकायाम्—

पक्षफलम् । शुक्लपक्षे सुशीला स्यात्कृष्णे सा कुलटा भवेत् ।
कृष्णस्य द्वादशीं यावन्मध्यमं फलमादिशेत् ॥

तत्रैव—अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि ।
वर्ज्यतिथ्यादि । परिघस्य च पूर्वार्धे व्यतीपाते च वैधृतौ ।
संध्यासूपप्लवे विद्यादशुभं प्रथमार्तवम् ॥

उपप्लवो ग्रहणम् । तथा—

वारफलम् । रोगी पतिव्रता दुःखी पुत्रिणी भोगभागिनी ।
पतिव्रता क्लेशयुक्ता सूर्यवारादिषु क्रमात् ॥

नक्षत्रफलमाह गर्गः—

नक्षत्रफलम् । सुभगा चैव दुःशीला वन्ध्या पुत्रसमन्विता ।
धर्मयुक्ता व्रतघ्नी च परसंतानमोदिनी ॥
सुपुत्रा चैव दुःपुत्रा पितृवेश्मरता सदा ।
दीना प्रज्ञावती चैव पुत्राढ्या चित्रकारिणी ॥
साध्वी पतिव्रता नित्यं सुपुत्रा कष्टचारिणी ।
स्वकर्मनिरता हिंस्रा पुण्या पौत्रादिसंयुता ॥
नित्यं धनकथासक्ता पुत्रधान्यसमन्विता ।
मूर्खोऽर्थाढ्या गुणवती दस्रर्क्षादेः क्रमात्फलम् ॥

स्मृति रत्ने—शुभं चैव तु पूर्वाह्णे मध्याह्ने मध्यमं फलम् ।
वेलाफलम् । अपराह्णे तु वैधव्यं पूर्वरात्रौ शुभं भवेत् ।
मध्यरात्रे तु मध्यं स्यात्परराात्रे शुभान्विता ॥

कश्यपः—मलिना मन्दवारे तु रात्रावपि तथैव च । इति ।
तथा—अमासंक्रान्तिविष्ट्यां च व्यतीपाते च वैधृतौ ।
परिघस्य च पूर्वार्धे पट्[1] च गण्डातिगण्डयोः ॥
योगफलम् । व्याघाते नव शूले तु नाड्यः पञ्चतुर्दशने ।
वैधव्यमर्थहानिं च सुतनाशं महद्भयम् ॥
वैधव्यं शत्रुवृद्धिं च दारिद्र्यं क्षीणजीवनम् ।
तेजोहानिं समायाति सदा पुष्पवती क्रमात् ॥

---

१ दशमी पाठः ङ. ।

स्थलविशेषेण फलमाह वसिष्ठः—

ग्रामाद्बहिः परग्रामे चेत्स्यात्सा व्यभिचारिणी ।
स्थानफलम् । पतिव्रता पतिस्थाने सुशीला गृहमध्यके ॥
ग्राममध्ये च वृद्धिश्च विधवा च दिगम्बरा ।
परागारे च दुःशीला आयुष्यं जलसंनिधौ ।
धनमध्ये तु कन्या या धनधान्यसमृद्धिदा ॥

परगृह इत्यनेन पित्रादिगृहमपि गृह्यते ।

वस्त्रविशेषेण फलभेदमाह वसिष्ठः—

वस्त्रविशेषे फलभेदः । सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता ।
क्षौमवस्त्रा क्षितीशा स्यान्नववस्त्रा सुखान्विता ॥
दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा ।
नीलाम्बरधरा नारी विधवा पुष्पिता यदि ।
मलिनाम्बरतो नारी दरिद्रा स्याद्रजस्वला ॥

दैवरातः—

संमार्जनीकाष्ठतृणाग्निशूर्पान्हस्ते दधाना कुलटा तदा स्यात् ।
तल्पोपभोगे तपसि स्थिता चेद्दृष्टं रजो भाग्यवती तदा स्यात् ॥ इति ।

इदं फलं प्रथमरजोदर्शन एव ।

रजोबिन्दुफलमाह वसिष्ठः—

रजोबिन्दुफलम् । वस्त्रे स्युर्विषमा रक्तबिन्दवः पुत्रमाप्नुयात् ।
समाश्चेत्कन्यका चेति फलं स्यात्प्रथमार्तवे ॥

शान्तिमाह नारदः—

कुयोगशान्तिः । निन्द्यर्क्षतिथिवारेषु यदि पुष्पं प्रदृश्यते ।
तत्र शान्तिं प्रकुर्वन्ति घृतदूर्वातिलाक्षतैः ॥ इति ।

शान्तिस्तु शान्तिमयूखे वक्ष्यते[1] । वसिष्ठः—

प्रभूतदोषं यदि दृश्यते तत्पुष्पं ततः शान्तिककर्म कार्यम् ।
विवर्जयेदेव तदेकशय्यां यावद्रजोदर्शनमन्यघस्रे ॥

दक्षः—आर्तवाभिप्लुता नारी नैकवेश्मनि संविशेत् ।
रजस्वला-नियमाः । न संसर्गं व्रजेत्सर्वैः स्नात्वा पापैः प्रमुच्यते ॥
अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् ।
न कुर्यात्सार्तवा नारी ग्रहाणामीक्षणं तथा ॥

---

१ शान्तिस्तु शान्तिमयूखे वक्ष्यते इत्येव पाठः क.।

नखानां कृन्तनं रज्जुतालपत्रादिवन्धनम् ।
दग्धे शरावे भुञ्जीत पेयं चाञ्जलिना पिबेत् ॥

वसिष्ठः—'त्रिरात्रं रजस्वलाऽस्नानाऽशुचिर्भवति । नाभ्यात्राभ्यञ्ज्या-नाप्सु स्नायादधः शयीत न दिवा स्वप्यान्नाग्निं स्पृशेन्न रज्जुं सृजेन्न दन्ता-न्धावयेन्न मांसमश्नीयात्' इति ।

चतुर्थदिने च स्नानादिना शुद्धा । तथा च स्मृत्यर्थसारे—'ब्राह्मणी रज-स्वला चतुर्थेऽहि षष्टिमृत्तिकाभिः शौचं कृत्वा क्षत्रियादिस्त्री पादपादन्यून-मृत्तिकाभिर्विधवा द्विगुणाभिः शौचं कृत्वा मलं प्रक्षाल्य सचैलं सङ्कल्पे स्नायात्' इति । अतः सूर्योदयात्पूर्वं स्नानाचरणं दुराचार एव ।

॥ इति रजस्वलानियमाः ॥

प्रथमर्तौ तु विशेषः स्मृतिचन्द्रिकायां स्मृत्यन्तरे—

प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः ।
अक्षतैरासनं कुर्युस्तस्मिंस्तामुपवेशयेत् ॥
हरिद्रागन्धपुष्पादीन्दद्यात्ताम्बूलकं स्रजम् ।
आशिषो वाचयेयुस्ताः पतिपुत्रवती भव ॥
दीपैर्नीराजनं कुर्यात्सदीपे वासयेद्गृहे ।
लवणापूपमुद्रादि दद्यात्ताभ्यः स्वशक्तितः ॥ इति ।

गर्भाधानम् ।

अथ गर्भाधानम् । तच्च ऋतौ कार्यम् । तदाह याज्ञवल्क्यः—

षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् ॥

निशाग्रहणं दिवसनिषेधार्थम् । तथा च श्रुतिः—"प्राणं वा एते प्रस्क-न्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मवर्चसमेव तद्यद्रात्रौ संयुज्यन्ते" इति । शङ्खलिखितावपि—'नार्तवेऽपि दिवा व्रजेत्' इति । आद्याश्चतस्र इति चतुर्थदिने रजसोऽनिवृत्तौ ज्ञेयम् । रजोनिवृत्तौ तु देवलः—तस्मात्त्रिरात्रं दारान्वै पुष्पितान्परिवर्जयेत् ॥ इति ।

हिरण्यकेशिसूत्रमपि—'चतुर्थ्यां स्नातां प्रयतवस्त्रामलंकृतां ब्राह्मणसं-भाषामाचम्योपह्वयते' इति । ब्राह्मणसंभाषां प्रशस्तब्राह्मणेन कृतसंभाष-णाम् । आपस्तम्बः—

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते ।
गम्या निवृत्ते रजसि नानिवृत्ते कथंचन ॥ इति ।

युग्मासु फलमाह मनुः—

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । इति ।

एकस्यां सकृदेव गच्छेत् । यथोक्तम्—

एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् ।
सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥ इति ।

सुस्थे एकादशादिस्थानस्थिते । क्षामता चास्निग्धभोजनादिना कार्या रजःक्षयार्थम् । यथोक्तम्—

पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । इति ।

तत्र युग्मासु शोणिताधिक्ये पुरुषाकृतिः स्त्री अयुग्मासु शुक्राधिक्ये स्त्र्याकारः पुमानिति ज्ञेयम् । शुक्रशोणितयोरुपादानकारणत्वात् । ब्रह्मचार्येवेति यत्र ब्रह्मचर्यं विहितं श्राद्धभोजनादौ तत्र गमने न दोषः ।

पर्वाणि विष्णुपुराणे—

पर्वाणि । चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥

ऋतावगमने दोषमाह पराशरः—

अगमने दोषः । ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ इति ।

क्वचित्स्वस्थः सन्निति पाठः । अथ गमने निषिद्धकालाः । मनुः—

गमने निषिद्धकालः । अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ इति ।

ज्योतिःशास्त्रे—

पित्र्यं पौष्णं नैर्ऋतं चैव धिष्ण्यं त्यक्त्वा नारीं सुप्रसन्नः प्रसन्नाम् ।
पुष्टः क्षामां पुत्रकामोऽभिगच्छन्सल्लक्षण्यं पुत्रमाप्नोति पित्र्यम् ॥

यौगपद्ये देवलः—

बहुपरिग्रहवतो विशेषः । यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत् ।
रक्षणार्थमपुत्रां वा ग्रहणक्रमतोऽपि वा ॥ इति ।

तीर्थं रजः । विशेषमाह याज्ञवल्क्यः—

यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् । इति ।

यथाकामी ऋतुं विनापि स्त्रीकामनायां स्त्रियमभिरमयेत् । एवं च ।

ऋतुं नोपैति यो भार्यामनृतौ यश्च गच्छति ।

तुल्यमाहुस्तयोः पापमयोनौ यश्च सिञ्चति ॥ इति ।

बौधायनीयेऽनृतुगमननिषेधः स स्त्रिया अकामनायां ज्ञेयः ।

गर्भिणीगमनमप्यनुजानात्यत्रिः—

गर्भिणी गमने । षण्मासात्कामयेन्मर्त्यो गर्भिणीं स्त्रियमेव हि ।

आदन्तजननादूर्ध्वमेवं धर्मो न हीयते ॥ इति ।

बालके जाते तस्य दन्तजननादूर्ध्वं गच्छेदित्यर्थः । स्त्रीणामप्यगमने दोष इति हेमाद्रौ—

ऋतुस्नाता तु या नारी भर्तारं नोपगच्छति ।

तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत् ॥ इति ।

ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायते ॥

अत्र—ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायते ॥

इति कूर्मपुराणवाक्येनैव पुत्रोत्पादनेन शास्त्रार्थस्य कृतत्वादानृण्ये च जाते न पुत्रान्तरोत्पादनमावश्यकमिति केचित् । तन्न । यद्यप्यानृण्यं जातं तथापि एकपुत्रनिन्दापूर्वकं बहुपुत्रप्राशस्त्यमुक्तं भारते—

अपत्यं तु ममैवैकं कुले महति भारत ।

अपुत्रतैकपुत्रत्वमित्याहुर्धर्मवादिनः ॥

चक्षुरेकं च पुत्रश्च अस्ति नैव च भारत ।

चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥ इति ।

तथा 'ऋतुस्नातां तु यो भार्याम्' इत्यस्य एकपुत्रानन्तरमृतौ जाते प्रत्यविधानात् । तथार्थवादोऽपि—

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।

यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ इति ।

अतो बहुपुत्रोत्पत्तिरप्रतिषेधात्प्राशस्त्याच्च कर्तव्या ।

आश्वलायनः—

वपनं मैथुनं तीर्थं वर्जयेद्गुर्विणीपतिः ।

गुर्विणीप-तिधर्माः । श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित् ॥

श्राद्धं श्राद्धभोजनमिति केचित् । अत्र प्रमाणं मृग्यम् । अन्यत्काल-विधानव्याख्योक्तम् । सप्तमान्मासादिति सर्वत्र ज्ञेयम् ।

क्षौरं शवानुगमनं नखकृन्तनं च श्राद्धं च वास्तुकरणं त्वतिदूरयानम् ।

उद्वाहमम्बुधिजले गमनं तथैवमायुःक्षयं भवति गर्भिणिकापतीनाम् ॥ क्वचित्तु 'उद्वाहमौपनयनं जलधेश्च गाहम्' इति पाठः । ज्योतिषरत्ने गालवः—

दहनं वपनं चैव चौलं वै गिरिरोहणम् ।
नाव आरोहणं चैव वर्जयेद्गुर्विणीपतिः ॥
प्रव्यक्तगर्भापतिरब्धियानं मृतस्य वाहं क्षुरकर्म सद्म ।
तस्यां तु यत्नेन गयादितीर्थे यागादिकं वास्तुविधिं न कुर्यात् ॥

आयुःक्षयं तत्साधनम् ।

अथ गुर्विणीनियमाः । पद्मपुराणे दितिं प्रति काश्यपः—

नावस्करेषूपविशेन्मुसलोलूखलादिषु ।
जलं च नावगाहेत शून्यागारं च वर्जयेत् ॥
विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना ।
न शयालुः सदा तिष्ठेद्व्यायामं च विवर्जयेत् ॥
न तुषाङ्गारभस्मास्थिकपालेषु च संविशेत् ।
वर्जयेत्कलहं लोकैर्गात्रभङ्गं तथैव च ॥
न शयीतोत्तरशिरा नचैवाधःशिराः क्वचित् ।
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती ॥

गुर्विणीनियमाः ।

मात्स्ये—संध्यायां हि न भोक्तव्यं गर्भिण्या वरवर्णिनि ।
न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्वदा ॥
न शयालुः सदा तिष्ठेत्खट्वाछायां विवर्जयेत् ।
सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥
कृतरक्षा सुभूषा च वास्तुपूजनतत्परा ।
दानशीला तृतीयायां पार्वत्या भक्तिमाचरेत् ॥
गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम् ।
व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत् ॥
शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम् ।
व्यवसायं दिवा स्वापं रात्रौ जागरणं त्यजेत् ॥
अतिक्षारं तु नाश्नीयादत्यम्लमतिभूरि च ।
अत्युष्णमतिशीतं च गुर्वाहारं परित्यजेत् ॥
यस्तु तस्या भवेत्पुत्रः स्थिरायुर्वृद्धिसंयुतः ।
अन्यथा गर्भपतनं सा चाप्नोति न संशयः ॥ इति ।

यात्राविषये बृहस्पतिः—

चतुर्थे मासि षष्ठे वाऽप्यष्टमे गर्भिणी यदा ।
यात्रां नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः ॥

चतुर्थात्पष्ठाष्टमादारभ्येत्यर्थः । इदं च समर्थासमर्थस्त्रीपरम् । अत्यसमर्थायास्तु चतुर्थमासादारभ्यैव यात्रा वर्ज्येत्यर्थः । आषाढे तु सर्वमासेषु ।

दोहदमप्यवश्यं प्रदेयमित्याह याज्ञवल्क्यः—

दोहदस्याऽप्रदानेन गर्भो दोषमवाप्नुयात् ।
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥

प्रयोगपारिजाते संग्रहे—

गर्भिणीवाञ्छितं द्रव्यं तस्यै दद्याद्यथोदितम् ।
सूते चिरायुषं पुत्रमन्यथा दोषमर्हति ॥

इति गर्भाधानम् ।

पुंसवनम् ।

अथ पुंसवनम् । याज्ञवल्क्यः—

काल. । गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा । इति ।

गर्भचलनकालः शारीरके—'तस्माच्चतुर्थे मासि चलनादावभिप्रायं करोति' इति । पारस्करः—

'मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्' इति । पुंनक्षत्राणि तु [वासरे]—

हस्तो मूलः श्रवणः पुनर्वसुर्मृगशिरास्तथा पुष्यः ।
पुंसंज्ञकेषु कार्येष्वेतानि शुभानि धिष्ण्यानि ॥

नारदीये—रोहिणीभाद्रपदाद्वयमुक्तम् । वासिष्ठे च स्वात्यनुराधाश्विन्यः ।

विशेषमाह जातूकर्ण्यः—

द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् ।
व्यक्ते गर्भेऽथवा कार्यं सीमन्तेन सहाऽथ वा ॥ इति ।

व्यक्ते अन्येनानुक्तेऽपि ज्ञातुं शक्ये । अत्र सति संभवे शुक्रास्तमलमासादिवर्ज्यमसंभवे तत्रापि कार्यमावश्यकत्वात् । इदं च चन्द्रताराबले कार्यम् । पुंसवनं प्रकृत्य—

---

१ वा सप्तमे पाठः क. । २ यात्रां विवर्जयेन्नित्यमाषाढे इति पाठ. क. ।

चतुर्थे मासि षष्ठे वाऽप्यष्टमे वा तदीश्वरे[1] ।
बलोपपन्ने दम्पत्योश्चन्द्रतारावलान्विते ॥

इति नारदवचनात् । इदं च पुमान्सूयतेऽनेनेति व्युत्पत्त्या कर्मनामधेयम् । तच्च कर्म यवसहितमापद्वययुक्तदधिप्राशनम् । अत्र कांश्चित्कालान्निषेधति बृहस्पतिः—

कुलीरं मिथुनं कन्यां हित्वा शेषाः शुभावहाः । इति ।

इति पुंसवनम् ।

अनवलोभनम् ।

अथानवलोभनम् । बैजवापगृह्ये—'अथ पुंसवनानवलोभने करोति मासि

कालः । द्वितीये वा तृतीये वा' इति । इदं च पुंसवनदिन एव तदुत्तरं कार्यम् । पुंसवनमुक्त्वा 'अथास्यै मण्डलागारच्छायायामजीतामोषधीं नस्तः करोति' इत्याश्वलायनगृह्ये क्रमाम्नानात् । इदमपि न अवलुप्यते गर्भोऽनेनेति व्युत्पत्त्या गर्भाविनाशफलकं यन्नस्यरूपं कर्म तस्य नामधेयम् । भकारश्छान्दसः । तथा च मन्त्रलिङ्गमाह—"पौत्रमघं मा नियाम्" इति । पुत्रसंबन्धि अघं पापं मा नियां मा प्राप्नुयामिति । एवं च नाशकारणपापाभावाद्गर्भानाश इति । एते च कर्मणी गर्भसंस्कारत्वात्प्रतिगर्भमावर्तेते इति नारायणः । तन्मते—

सकृत्सुसंस्कृता नारी सर्वगर्भेषु संस्कृता ।

इति देवलवाक्यं सीमन्तोन्नयनविषयमेवेति प्रतीमः । विज्ञानेश्वरस्तु पुंसवनस्यापि सकृदनुष्ठानमिच्छति । तत्र युक्तिश्चिन्त्या । इत्यनवलोभनम् ।

सीमन्तोन्नयनम् ।

अथ सीमन्तोन्नयनम् । आपस्तम्बः—'सीमन्तोन्नयनं प्रथमे[2] गर्भे चतुर्थे

कालः । मासि' इति । साङ्ख्यायनगृह्येऽपि—'सप्तमे मासि प्रथमे गर्भे सीमन्तोन्नयनम्' इति । याज्ञवल्क्यः—'षष्ठेऽष्टमे वा सीमन्तः' इति । आश्वलायनः—'आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्' इति । आपूर्यमाणपक्षः शुक्लपक्षः । पुंनक्षत्राण्युक्तानि । इदं च

---

१ तदीश्वरे—चतुर्थषष्ठाष्टममासेश्वरे । उक्तं च वसिष्ठेन—'सितावनेयामरपूज्यसूर्यचन्द्रार्किसौम्योदयेन्दुसूनोः । मासाधिपाः स्युः क्रमशो दशोने निपीडिते नाशयति स्वमासि' इति ।
२ प्रथमगर्भे इति पाठः क. ।

सकृदेव कार्यम्। प्रथमे गर्भे इति सांख्यायनापस्तम्बोक्तेः। स्त्रीसंस्कारत्वाच्च 'सकृत्सुसंस्कृता नारी सर्वगर्भेषु संस्कृता।' इति वचनप्रवृत्तेः।

यत्तु स्मृतिचन्द्रिकायां विष्णुः—

> सीमन्तोन्नयनं कर्म तत्स्त्रीसंस्कार इष्यते।
> केचिद्गर्भस्य संस्काराद्गर्भे गर्भे प्रयुञ्जते॥ इति।

तत्र केचिद्वृद्धा(चिदित्युक्तत्वा?)दनादरः स्पष्टः। हारीतस्तु स्पष्टमेवाह—

> सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः।
> यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्॥ इति।

इदं च दैवज्ञोदिते शुभमुहूर्ते कार्यम्। यथाह गर्गः—

> सीमन्तोन्नयनं कार्यं शुभांशे शुभलग्नके।
> कुलीरमृगकन्याश्च वर्ज्याः शेषाश्च शोभनाः॥ इति।

अत्रापि शुक्रास्तादिव्यतिरिक्तकाललाभे न तत्र कार्यमन्यथाऽस्तादावपीति नियतकालत्वात्। सीमन्ते च भोक्तुर्दोषमाह धर्मप्रकाशे धौम्यः—

> ब्रह्मौदने च सोमे च सीमन्तोन्नयनेऽथ वा।
> जीनश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्॥ इति।

ब्रह्मौदनमाधानाङ्गभूतं, जातश्राद्धं पुत्रे जाते वृद्धिश्राद्धम्[1]।

अजातसीमन्तायाः प्रसूतौ सत्यव्रत आह—

> स्त्री यदाऽकृतसीमन्ता प्रसूयेत कदाचन।
> गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति॥

पुनः पादपूरणार्थम्। यः संस्कारोऽतिक्रान्तः स कर्तव्य इत्यर्थः।

इति सीमन्तोन्नयनम्।

सूतिकागृहमाह वसिष्ठः—

> ऐन्द्रे तु विक्रमस्थानमाग्नेये सूतिकागृहम्।
> यास्यायां शयनस्थानं वायव्यां पशुमन्दिरम्।
> कौबेर्यां तु धनस्थानमैशान्यां देवतालयः॥ इति।

सूतिकागृहम्।

पद्मपुराणे पारस्करः—

> प्रविशेत्सूतिकागारं कृतरक्षं समन्ततः।
> प्राग्द्वारमुत्तरद्वारमथवा सुदृढं शुभम्॥
> देवानां ब्राह्मणानां च गवां कृत्वा च पूजनम्।

---

१ अत्र 'जातश्राद्धं' इति पाठोऽवगम्यते, अग्रे तस्य व्याख्यातत्वात्।

एरण्डमूलचूर्णेन सघृतेन तथैव ताम् ।
सुखप्रसवनार्थाय पश्चात्कायेऽनुलेपयेत् ।। इति ।

जातकर्म ।

अथ जातकर्म । तत्र पितुः पुत्रे जाते स्नानमाह संवर्तः—

पुत्रजनने कर्तव्यम्। जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते । इति ।

इदं च शीताद्भिः कार्यम् । तदाह जाबालिः—

कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च । इति ।

इदं च रात्रावपि कार्यमित्याह—

रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः ।
नैमित्तिके च कुर्वीत स्नानं दानं च रात्रिषु ।। इति ।
ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च ।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति ।। इति ।

संवर्तः—माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ।

जैमिनिः—यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् ।
छिन्ने नाले ततः पश्चात्सूतकं च विधीयते ।। इति ।

अस्मान्नालच्छेदोत्तरमेवाशौचप्रवृत्तिरिति भाति । प्राञ्चस्तु 'यावन्न छिद्यते नालं तावच्छिशुमृतौ पूर्णं सूतकं नाप्नोति । नालच्छेदोत्तरं तु शिशुमृतौ संपूर्णं प्राप्नोति' इति व्याचख्युः । एवं च ज्ञायते तेषां जन्मोत्तरमेवाशौचप्रवृत्तिरिष्टेति । युक्तं चेदम् । आशौचं जननोत्तरमेव प्रवर्तते । जातकर्मवृद्धिश्राद्धदानादौ तु तात्कालिकी शुद्धिर्वचनेन बोध्यते । 'कर्तुस्तात्कालिकी शुद्धिः' इतिवत् । एवं च स्नानोत्तरं संध्यादिकं न भवत्येवेति दिक् । दानार्थं दिनमनुज्ञातमादिपुराणे—

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ।
आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वतः ।
तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथम् ।। इति ।

पुत्रमुखावलोकनस्य फलमाह वसिष्ठः—

जातमात्रकुमारस्य मुखमस्यावलोकयेत् ।
पिता ऋणाद्विमुच्येत पुत्रस्य मुखदर्शनात् ।। इति ।

आशौचान्तरेऽपि पुत्रे जाते तात्कालिकीं शुद्धिमाह प्रजापतिः—

सूतके तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्तुस्तात्कालिकीशुद्धिः—।। इति ।

जातकर्मणि प्रधान(कृत्य)माहाऽऽश्वलायनः—'कुमारं जातं पुराऽन्यैरालम्भात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत्' इति। कात्यायनसूत्रे तु विशेषः—'अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं च' इति।

तत्कालमाह गर्गः—

जातमात्रकुमारस्य जातकर्म विधीयते ।
स्तनप्राशनतः पूर्वं नाभिकर्तनतोऽपि वा ॥ इति ।

पूर्वमित्यर्थः ।

मनुः—प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
मन्त्रवत्प्राशयेदस्य हिरण्यं मधुसर्पिषा ॥ इति ।

वर्धनं छेदः। अत्र पुंस्त्वमविवक्षितमनुवाद्यविशेषणत्वादिति केचित्। मेधातिथिस्तु विवक्षितमेव पुंस्त्वं तेन नपुंसकस्य न भवति स्त्रिया वाक्यान्तरभावत्वादमन्त्रकं भवत्येवेत्याह ।

अत्र च वृद्धिश्राद्धमामेन कार्यमित्याह प्रचेताः—

स्त्री शूद्रः श्वपचश्चैव जातकर्मणि चाप्यथ ।
आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन तु ।

हेमाद्रिस्तु हेम्नैवाऽऽह—

पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् ।
न पक्वेन न चामेन कल्याणान्यभिकामयन् ॥

इतिसंवर्तोक्तेः। अत्र नैमित्तिककाम्यभेदेनाऽऽमहेमव्यवस्था द्रष्टव्या। यदा तु पुत्रजन्म मूलादिनक्षत्रेषु तदा मुखावलोकनजातकर्मादि शान्तिं विना न कुर्यात्। एवं संक्रान्तिविष्ट्यादावपि । शान्तिस्तु शान्तिमयूखे वक्ष्यते। पुरुषापराधेन काले जातकर्मान्नुष्ठाने कालान्तरमाह बैजवापः—

जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि ।
दैवादतीतकाले चेदतीते सूतके भवेत् ॥ इति ।

अस्य फलमाहाश्वलायनः—

गर्भाम्बुपानदोषाणामपनुत्त्यै शिशुं पिता ।
प्राशयेन्मधुना सार्धं साज्यं हैमरसं शुभम् ॥ इति ।

स्त्रीणामप्येतदमन्त्रकं कार्यम्। इति जातकर्म ।

दशदिनमध्ये विशेषमाह व्यासः—

षष्ठी दशदिनकृत्यम्। सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥

---

१ शान्तिस्तु तातचरणकृतशान्तिमयूखतो ज्ञेयेति पाठः ङ. ।

प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ।
त्रिष्वाशौचं न कुर्वीत सूतके पुत्रजन्मनि ॥ इति ।
दद्यात्तु प्रथमे हेम षष्ठे वा सप्तमेऽपि वा ।
बलिदानं तु दशमे स्वर्णदानं प्रशस्यते ॥ इति ।

अत्राशौचाभावो दानादिविषय एव न संध्यादिविषये ।
मार्कण्डेयोऽपि—रक्षणीया तथा षष्ठी निशा तत्र विशेषतः ।
रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः ॥
पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः ।
रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके ॥
नारदोऽपि—जननात्सप्तमे चान्हि मृत्युरायाति घातकः ।
दिने दिने च रक्षेयं कर्तव्यायुर्विवृद्धये ॥

इति प्रथमादिदिनकृत्यम् ।

नामकरणम् ।

आश्वलायनगृह्ये जातकर्मोत्तरं कालान्तरमनुक्त्वा—'नाम चास्मै दद्युर्घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं द्व्यक्षरं चतुरक्षरं वा द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामो युग्मानि त्वेव पुंसामयुग्मानि स्त्रीणामभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनात्' इतिनामकरणमुक्तम् । तेन ज्ञायते—जातकर्मोत्तरमेव कालः ।

अस्यार्थः—वर्गाणां प्रथमद्वितीयाः जिह्वामूलीयोपध्मानीयौ शषसाश्चेत्यघोषा अन्ये घोषवन्तः । यरलवा अन्तस्थाः । अभिनिष्ठानो विसर्जनीयः । अक्षराणि स्वराः । पुनर्युग्मानीतिग्रहणं षडक्षरादिग्रहणार्थम् । अभिवादनीयमवकहडचक्रप्रमाणेन नाक्षत्रम् ।

मनुः—नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ इति ।

दशम्यामतीतायामिति व्याख्यातारः । णिजविवक्षितः । 'अहन्येकादशे नाम' इति याज्ञवल्क्येऽपि । कालान्तरं भविष्यत्पुराणे—
नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव ।
द्वादश्यामपरे रात्र्यां मासे पूर्णे तथा परे ।
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः ॥ इति ।

गृह्यपरिशिष्टे—'जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे नामकर-

णम्' इति । व्युष्टेऽतीते । विशेषमाह पतञ्जलिः—'घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकम्' इति । 'नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यभिधत्ते इति त्रिपुरुषानूकम् "अन्येषामपि—" इति दीर्घः' इति प्रदीपकारः । प्रयोगपारिजाते कपिलसंहितायाम्—

एकादशेऽह्नि विधिवन्नाम कुर्यात्कुलोचितम् ।
देवतानां विशेषेण पित्रोर्वा नाम शस्यते ॥
नैव कार्यं नृपादीनां नाम जीवनहेतुतः ।
पूर्वैः परस्य वर्णस्य हीनस्यापि न धारयेत् ॥ इति ।

कर्तुः पित्रोरित्यर्थः । इदं च दाक्षिणात्यशिष्टा आचरन्ति । मनुः—

मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ॥ इति ।

स्त्रीषु विशेषमाह गोभिलः—'अयुग्दान्तं स्त्रीणाम्' इति । दान्तं यशोदा शर्मदेत्यादिकम् । केचित्तु यन्नाम तद्दाशब्दान्तं वर्णयन्ति । तथा च पार्वतीदा

नामकरणे स्त्रीणां विशेषः ।

गङ्गादेत्येवं प्रयोज्यं तथा च तेषां मते यशोदेत्यादिषु यशोदादा इति प्रयुञ्ज्येत । इदं च व्याख्यानं न क्वापि निबन्धेषु दृष्टम् । अतः पूर्वोक्तमेव ज्याय इति । शङ्खलिखिताभ्यां नामोक्त्वा माससंबद्धमपि नाम कार्यमिति केचिदित्युक्तम् ।

तत्र मासनामानि वसिष्ठ आह—

मासनामानि ।

चैत्रादिमासनामानि वैकुण्ठोऽथ जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्त्रिविक्रमः ॥
योगीशः पुण्डरीकाक्षः कृष्णोऽनन्तोऽच्युतस्तथा ।
चक्रधारीति चैतानि क्रमादाहुर्मनीषिणः ॥ इति ।

अत्र केचिन्मासानां मार्गशीर्षोऽहम् इति सामान्यलिङ्गान्मार्गशीर्षमार-

मलमासे विशेषः ।

भ्य मासनामानि कल्पयन्ति । तद्वासिष्ठे चैत्रग्रहणेन विशेषाभिधानादुपेक्ष्यम् । 'मलमासे जन्म चेदुत्तरमासनाम—

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वमर्धं परित्यज्य कर्तव्या चोत्तरे क्रिया ॥

इत्युत्तरमासशेषत्वेनाभिधानात् । विष्टिव्यतीपातादौ न कर्तव्यमित्याह गर्गः—

व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि ।
श्राद्धं विना शुभं कर्म प्राप्तकालेऽपि नाचरेत् ॥ इति ।

अतः शुभे मुहूर्ते पूर्वोक्तान्यतमकाले कार्यं शुक्रास्तादीनां तु नैव विचारः। विशेषमाह कश्यपः—

उक्तकाले प्रकर्तव्या द्विजानामखिलाः क्रियाः।
अतोऽन्येषु तु कालेषु कर्तव्याश्चोत्तरायणे॥
सुरेज्येऽप्यसुरेज्ये वा नास्तगे न च वार्द्धके।
शुभलग्ने शुभांशे च शुभेऽह्नि शुभवासरे॥
चन्द्रतारावलोपेते नैधनादपवर्जिते।
नाम मङ्गलघोषेण रहस्यं दक्षिणश्रुतौ॥

बृहस्पतिः—पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः।
अपराह्णं च रात्रिं च वर्जयेन्नामकर्मणि॥ इति।

इदं च पितुरन्येनापि संनिहितेन कार्यम्। इति नामकरणम्।

कर्णवेधः।

कर्णवेधमाह बृहस्पतिः—

जन्मतो दशमे चाह्नि द्वादशे वाऽथ षोडशे।
सप्तमे मासि वा कुर्याद्दशमे मासि वा पुनः॥ इति।

गर्गः—मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे।
कार्तिके पूर्णमासे वा चैत्रे वा फाल्गुनेऽपि वा।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने॥ इति।

कार्तिकादिकं पूर्वकालापेक्षया भिन्नम्। पूर्णमास इति स्वतन्त्रः कालः। न विशेषणविशेष्यभावः। कार्तिके पौषमासे वेति वा पाठः। अयमेव युक्तो मासप्रायपाठात्। जन्ममासं निषेधति व्यासः—

यो जन्ममासे क्षुरकर्म यात्रां कर्णस्य वेधं कुरुतेऽतिमोहात्।
मूढः स रोगी धनपुत्रनाशं प्राप्नोति गूढं वधबन्धनानि॥

जन्ममासनिषेधस्तु द्वितीयादिवर्षगतो नाद्यवर्षगतस्तस्य विहितत्वेन निषेधानवकाशात्। अन्ये विधिनिषेधा ज्योतिःशास्त्रादवसेयाः। विशेष उक्तः सुबोधे—

शातकुम्भमयी सूची वेधने तु शुभप्रदा।
राजती वाऽऽयसी वापि यथाविभवतः शुभा॥ इति।

इति कर्णवेधः।

निष्क्रमणम् ।

निष्क्रमणमाहतुः शङ्खलिखितौ—'अत ऊर्ध्वं तृतीये मासि निष्क्रमणिका' । याज्ञवल्क्यः—'चतुर्थे मासि निष्क्रमः' इति । कर्तव्यमाह शङ्खः—

चतुर्थेमासि कर्तव्यं बालस्याऽऽदित्यदर्शनम् । इति ।

मुहूर्तसंग्रहे—पूर्वपक्षः शुभः प्रोक्तः कृष्णोऽप्यन्त्यत्रिकं विना । इति ।

अत्र दिवसानुपादानाद्दैवज्ञोदितं तन्मासस्थं शुभं दिनं ग्राह्यम् ।

कारिकायां विशेषः—

आदाय गेहान्निष्क्रम्य गच्छेयुर्देवतालयम् ।
अभ्यर्च्य देवतां सम्यगाशिषो वाचयेदथ ॥
कृत्वा प्रदक्षिणं गेहमानयन्ति ततः स्वकम् ।
मातृष्वसृगृहं वाऽपि मातुलादेर्गृहं नयेत् ॥
तदाशीर्वादाद्यैः स्याद्दीर्घायुरभिनन्दितः ।
जयन्तस्य मतेनायं लिखितः शिशुनिष्क्रमः ॥ इति ।

मातुलादिर्बालस्य । इति निष्क्रमणम् ।

उपवेशनम् ।

उपवेशनमुक्तं पद्मपुराणे—

अष्टमे च तथा मासि भूमौ तमुपवेशयेत् ।
तत्र सर्वे ग्रहाः शस्ता भौमो राम विशेषतः ॥
वराहं पूजयेद्देवं पृथिवीं च तथा द्विजः ।
पूजनं पूर्ववत्कृत्वा गुरुदेवद्विजन्मनाम् ॥
भूभागमुपलिप्याथ कृत्वा तत्र तु मण्डलम् ।
शङ्खपुण्याहशब्देन भूमौ तमुपवेशयेत् ॥

तत्र मन्त्र उक्तस्तत्रैव—

रक्षैनं वसुधे देवि सदा सर्वगतं शिशुम् ।
आयुःप्रमाणं निखिलं निक्षिपस्व हरिप्रिये ॥
अचिरादायुषस्त्वत्र ये केचित्परिपन्थिनः ।
जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान् ॥

---

१ निर्णयसिन्धौतूपवेशननिर्णये 'पञ्चमे च तथा' इत्यारभ्य 'भौमोऽप्यत्र विशेषतः । उत्तरात्रितयं सौम्यं पुष्यर्क्षं मित्रदैवतम् । प्राजापत्यं च हस्तश्च शस्तमाश्विनमित्रभम् । वराहं पूजयेत्तत्रे'त्यादि दृश्यते तत्समीचीनम् । २ शुभे ड. पाठः ।

धारिण्यशेषभूतानां मातस्त्वमधिका ह्यसि ।
कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यताम् ॥ इति ।

इत्युपवेशनम् ।

अन्नप्राशनम् ।

अन्नप्राशनमाह यमः—

ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि ।
अष्टमे वाऽथ कर्तव्यं यदैव मङ्गलं गृहे ॥ इति ।

कुले यदैव मङ्गलं तदैव कार्यमिति कालान्तरम् । लौगाक्षिः—'षष्ठे मासेऽन्नप्राशनं जातेषु दन्तेषु वा पूर्णे संवत्सरे वा' इति । अत्रापि दिनविशेषानुपादानाद्दैवज्ञोदितं शुभं दिनं ग्राह्यम् । कर्तव्यमाह मार्कण्डेयः—

देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च ॥
अलंकृतस्य दातव्यमन्नं पात्रेऽथ काञ्चने ।
मध्वाज्यकनकोपेतं प्राशयेत्पायसं तु तम्' इति ।

आश्वलायनगृह्ये तु विशेषः—'षष्ठे मास्यन्नप्राशनमाजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसकामो घृतौदनं तेजस्कामो मध्वोदनमायुष्कामो दध्योदनमिन्द्रियकामः क्षीरौदनं पशुकामो दधिमधुघृतमिश्रमन्नं प्राशयेत्सर्वकामो भवतीति विज्ञायते' । आजं मांसं तित्तिरसमभिव्याहारात् । तत्र व्यञ्जनस्थानीयत्वान्मांसस्यान्नं ग्राह्यमेव ।

तत्र फलाधिक्यम् ।

अन्नप्राशने फलाधिक्यमाश्वलायनस्मृतौ—

स्वमलप्राशनाच्छुद्ध्यै प्राशयेद्वायुपेऽपि वा ॥ इति ।

इत्यन्नप्राशनम् ।

तदुत्तरं जीविकापरीक्षोक्ता मार्कण्डेयेन—

जीविकापरीक्षा ।

देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्वशः ।
वस्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम् ॥

शिल्पस्य लेखनादेर्भाण्डं वस्तु लेखनीमषीपात्रादि । शस्त्रं युद्धवस्तु ।

प्रथमं यत्स्पृशेद्बालस्ततो भाण्डं स्वयं तदा ।
जीविका तस्य बालस्य तेनैव तु भविष्यति ॥ इति ।

इति जीविकापरीक्षा ।

---

१ वा ङ. पाठः ।

चूडाकर्म ।

चूडाकर्माह मनुः—

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ॥

यमः—द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात् । इति ।

आश्वलायनः—'तृतीये वर्षे चौलं यथाकुलधर्मं वा ' इति । तथा—'उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः ' इति ।

कारिकायाम्—यथाकुलं च केषांचिदुपनीत्या सहेष्यते । इति ।

आश्वलायनस्मृतौ—

तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे ।
शुक्लपक्षे शुभर्क्षे तु कृत्वाऽभ्युदयिकं तथा ।

शुभर्क्षे इति ज्योतिर्विदुपदिष्टे मुहूर्ते इत्यर्थः—

[प्रयोगपारिजाते नारदः—

जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः ।
पञ्चमे सप्तमे वाऽपि जन्मतो मध्यमं भवेत् ।
अधमं गर्भतः स्यात्तु नवमैकादशेऽपि वा ॥ इति ।

तत्रैव—आद्येऽब्दे कुर्वते केचित्पञ्चमेऽब्दे द्वितीयके ।
उपनीत्या सहैवेति विकल्पाः कुलधर्मतः ॥][१] इति ।

विवाहचण्डेश्वरः—

मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम् ।
ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् ॥

नृसिंहः—

न जन्मधिष्ण्ये न च जन्ममासे न जन्मकालीयदिने विदध्यात् ।
ज्येष्ठे न मासे प्रथमस्य सूनोस्त्वाद्याः सुताया अपि मङ्गलानि ॥

नक्षत्राणि निषेधति व्यासः—

नक्षत्रे तु न कुर्वीत यस्मिञ्जातो भवेन्नरः ।
न प्रौष्ठपदयोः कार्यं नैवाऽऽग्नेये च भारत ।
तिथिं प्रतिपदं रिक्तां विष्टिं चैव विवर्जयेत् ॥

---

१ कुण्डलितो ग्रन्थः क्पुस्तकेऽधिकः ।

विहितान्यपि तेनैवोक्तानि—

अश्विनी श्रवणः स्वाती चित्रा पुष्यः पुनर्वसुः ।
धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत् ॥ इति ।

क्षौरमिति शेषः । अन्ये च नक्षत्रयोगकरणविधिनिषेधा ज्योतिःशास्त्राद्-वसेयाः । गोत्रविशेषेण विशेषमाह लौगाक्षिः—'दक्षिणतः कमुञ्जा वसिष्ठाना-मुभयतोऽत्रिकश्यपानां मुण्डा भृगवः पञ्चचूडा अङ्गिरसो वालिमेके मङ्ग-लार्थं शिखिनोऽन्ये यथाकुलधर्मम् । कमुञ्जा चूडा । कचित्कुमुञ्जेति पाठः । अन्ये वालिं केशपङ्क्तिं कुर्वन्ति अन्ये समरेखया मुण्डनं कृत्वा सर्वं एव केशाः स्थाप्याः' इति स्मृतिचन्द्रिकायाम् । आपस्तम्बस्तु विशेषमाह—

तत्र विशेषः 'केशान्विनीय यथार्षे शिखां निदधाति । यथैषां कुलधर्मः स्यात्' यथार्षे यथाप्रवरम् । एते संस्काराः स्त्रीणां मन्त्ररहिताः ।

एतेषां जातकर्मादीनां लोपे प्रायश्चित्तमाह शौनकः—

एतेष्वेकैकलोपेऽपि पादकृच्छ्रं समाचरेत् ।
चूडाया अर्धकृच्छ्रं स्यादापदि त्वेवमीरितम् ।
अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् ॥ इति ।

अतीतानां कालमाह मनुः—

जातकर्मादिसंस्काराः स्वकाले न भवन्ति चेत् ।
चौलादर्वाक् प्रकुर्वीत प्रायश्चित्तादनन्तरम् ॥

गृह्यकारिकायां विकल्प उक्तः ।

प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ।
कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः ॥ इति ।

शिष्टानां तु करणपक्ष एव संमतः । विशेषान्तरमाह नारदः—

शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ।
पञ्चमाब्दादधोर्ध्वं तु गर्भिण्यामपि कारयेत् ।
सहोपनीत्या कुर्याच्चेत्तत्र दोषो न विद्यते ॥ इति ।

[मातरि गर्भिण्यामपि पञ्चमासपर्यन्तं न दोषः । तदाह मदनरत्ने बृहस्पतिः—

गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु ।
पञ्चमासादधः कुर्यादत ऊर्ध्वं न कारयेत् ॥ इति ।

---

१ इत्यधिकं ङ. पुस्तके ।

मातरि रजस्वलायां मेधातिथिः—

चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि ।
माता रजस्वला यस्य भवेत्तस्य न शोभनम् ॥

वृद्धमनुः—विवाहव्रतचूडासु माता यदि रजस्वला ।
तदा न मङ्गलं कार्यं शुद्धे कार्यं शुभेप्सुभिः ॥ इति ।]

इति चूडाकर्म ।

विद्यारम्भः ।

विद्यारम्भमाह मार्कण्डेयः—

प्राप्तेऽथ पञ्चमे वर्षे विद्यारम्भं तु कारयेत् ।
ततः प्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेत् ॥ इति ।

विद्यारम्भश्चात्राक्षरपरिचितिः । यथाह श्रीधरः—

विद्यारम्भः । उद्गते भास्वति पञ्चमेऽब्दे प्राप्तेऽक्षरस्वीकरणं शिशूनाम् ।
सरस्वतीं विघ्नविनायकं च गुडौदनाद्यैरपि पूज्य कुर्यात् ॥

विष्णुधर्मोत्तरे पुष्करः—

प्राप्ते तु पञ्चमे वर्षे अप्रसुप्ते जनार्दने ।
षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीं चैव सौरभौमदिने तथा ।
एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत् ।

इति विद्यारम्भः ।

अनुपनीतधर्माः । अथानुपनीतधर्माः गौतमः—'प्रागुपनयनात्कामचारकामवादकामभक्षाः' इति । कामचारोऽङ्गादिदेशगमनम् । कामवादोऽश्लीलादिभाषणमनृतभाषणं च । कामभक्षो ह्युत्पर्युषितभक्षणम् । कामभक्षादिकं महापातकातिरिक्तविषयम् ।

स्यात्कामचारभक्षोऽपि महतः पातकादृते ।

इतिषट्त्रिंशन्मतात् । गौतमः—यथोपपादमूत्रपुरीषो भवति न तस्याचमनकल्पो विद्यते न तस्योदङ्मुखो दिवा रात्रौ दक्षिणामुख इत्यादयो नियमाः । स एव । अन्यत्रावमार्जनप्रक्षालनप्रोक्षणेभ्यो न तस्य स्पर्शनादशौचम् । इति । इदं कृत्वा स्पर्शनं कार्यमित्यर्थः । स्मृतिदीपिकायाम्—

शिरोऽभ्युक्षणं प्रोक्तं बालस्याऽऽचमनं स्मृतम् । इति ।
रजस्वलादिसंस्पर्शे स्नानमेव विधीयते । इति ।

तल्लक्षणानि तत्रैव—

प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः ।
कुमारकस्तु विज्ञेयो यावन्मौञ्जी न बध्यते ॥ इति ।

बालं प्रकृत्य गौतमः—'नत्वेवैनमाग्निहवनबाल्हिरणयोर्नियुञ्ज्यात्' इति ।

मनुः—न ह्यस्मिन्विद्यते कर्म यावन्मौञ्जी न बध्यते ।
नातिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ॥

ब्रह्म वेदः । स्वधानिनयनं प्रेतकर्म । इत्यनुपनीतधर्माः ।

उपनयनम् ।

उपनयनविचारः । उपनयनमुक्तं श्रुतौ—'अष्टवर्षं ब्राह्मणमुपनयीत' इति ।

याज्ञवल्क्यः—गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ इति ।

सैके द्वादशे । गर्भैकादशे गर्भद्वादशे इत्यपि बोध्यम् । तथाच मनुः—

गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ।

लौगाक्षिस्तु—' सप्तमे वर्षे ब्राह्मणस्योपनयनं नवमे राजन्यस्यैकादशे वैश्यस्य ' इत्याह । पैठीनसिरपि—' गर्भपञ्चमे ब्राह्मणमुपनयेत् ' इति । गुणफलमाह मनुः—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ इति ।

आपस्तम्बः—' सप्तमे ब्रह्मवर्चसकाममष्टम आयुःकामं नवमे तेजस्कामं दशमेऽन्नाद्यकाममेकादश इन्द्रियकामं द्वादशे पशुकामम् ' इति । वर्णविशेषेण ऋतुनियम उक्तः श्रुतौ—' वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम् ' इति । कालान्तरमुक्तं ज्योतिःशास्त्रे—

माघादिषु तु मासेषु मौञ्जी पञ्चसु शस्यते ।

ज्येष्ठमासे ज्येष्ठोपनयनं न कार्यम् । तथा च गर्गः—

ज्येष्ठमासे विशेषेण सर्वज्येष्ठस्य चैव हि ।
उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव वा ॥ इति ।

जन्ममासे न कार्यमित्युक्तं संग्रहे—

विवाहे चोपनयने जन्ममासं विवर्जयेत् ।

जन्ममासलक्षणमुक्तं वृद्धगार्ग्येण—

जन्ममासलक्षणम् । आरभ्य जन्मदिवसं यावत्त्रिंशद्दिनं भवेत् ।
जन्ममासः स विज्ञेयो गर्हितः सर्वकर्मसु ॥

एवं चाष्टम्यादितिथिमारभ्याष्टम्यन्तो जन्ममासोऽभिमतः। न तु दर्शान्तः पूर्णिमान्तो वा। विशेषमाह चण्डेश्वरः—

तद्विशेषः। माघे द्रविणशीलाख्यः फाल्गुने च दृढव्रतः।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्।
ज्येष्ठे तु गृह्णीतिज्ञ आषाढे क्रतुभाग्भवेत्।
मार्गशीर्षे भवेद्रूक्षः पौषे दुःखमवाप्नुयात्॥

आषाढस्तु विष्णुशयनात्प्रागेव तदूर्ध्वं तत्र सर्वेषां निषिद्धत्वात्। विशेषमाहुर्वसिष्ठादयः—

आर्द्रादिके स्वातिविरामकाले नक्षत्रवृन्दे दशके रविश्चेत्।
विवाहचौलव्रतबन्धनाद्यं सुरप्रतिष्ठादि न कार्यमेव॥

आपूर्यमाणपक्ष इति शुक्ल आश्वलायनेनोक्तो मुख्यः। अनुकल्पमाह बृहस्पतिः—

अनुकल्पः। शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विना। इति।

अथ गौणकालः। गृह्ये—'आ षोडशाद्ब्राह्मणस्यानतीतः काल आ द्वाविंशात्क्षत्रियस्या चतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवन्ति नै[1]नानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुः' इति। अत्र व्रात्यतां प्रक्रम्य[2]।

स विप्रो पतितो यस्य दशवर्षाणि पञ्च च।
सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः॥ इति।

यमेन स्पष्टं पञ्चदशवर्षोत्तरं प्रायश्चित्ताभिधानादाषोडशादित्याङ् मर्यादार्थकः। एवं पञ्चदशवर्षोत्तरमेव व्रात्यस्तोमादिकं जायते इति। यत्तु—

औपनायनिकः कालः परः षोडशवार्षिकः।
द्वाविंशतिः परोऽन्यस्य चतुर्विंशतिमः परः॥

इति व्यासवाक्ये संपूर्णषोडशवर्षग्रहणाद्विरोधमुपन्यस्यति। तत्र धर्मप्रकाश एवं व्यवस्थोक्ता। यमवाक्यं जन्मप्रभृति पञ्चदशवर्षातिक्रमे प्रायश्चित्तविधिपरम्। व्यासवाक्यं त्वाधानप्रभृतिषोडशवर्षातिक्रमे प्रायश्चित्तपरमिति न द्वयोरपि विरोधः। ईदृशी च सरणिः प्राक् कचिदाश्रितैव।

यथा—अष्टादशदिनादर्वागशुचित्वं न विद्यते।
चतुर्दशदिनादर्वागशुचित्वं विधीयते।

इतिवाक्ययोः पूर्वं रजोदर्शनात्प्रभृत्युत्तरं तु स्नानादारभ्येति[3]।

---

१ नोपेति काशीमु. पु. पाठः। २ व्रात्यप्रायश्चित्त प्रक्रम्येति ङ पाठः। ३ 'नविद्यते' इत्यपेक्ष्यते तथोपक्रमात्। अन्यथा विरोधपरिहारकव्यवस्थाश्रयणस्यासंगत्यापत्तेः।

याज्ञवल्क्यः—अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिःकृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥ इति ।

तं विनोपनयनेऽधिकारो नास्तीत्यर्थः । स चानुपनीतेनानाहिताग्निना-ऽविदुषाप्यवकीर्णिपशुवत्कार्यः । यागोप्युक्ताध्ययनमगत्या कर्तव्यम् । ततः स्मृत्युक्तं प्रायश्चित्तं कृत्वा उपनयनमिति ।

अथ निषिद्धकालो रत्नकोशे—
नष्टे चन्द्रेऽस्तगे शुक्रे निरंशे चैव भास्करे ।
कर्तव्यं नोपनयनमनध्याये गलग्रहे ॥

राशिप्रथमांशगः सूर्यो निरंशः । अनध्यायान्विस्तरेणाग्रे वक्ष्यामः । गलग्रहास्तत्रैव—
त्रयोदशीचतुष्कं तु सप्तम्यादित्रयं तथा ।
चतुर्थ्येकाकिनी प्रोक्ता अष्टावेते गलग्रहाः ॥ इति ।

वक्ष्यमाणानध्यायप्रतिप्रसवमाहतुर्भरद्वाजवसिष्ठौ—
या चैत्रवैशाखसिता तृतीया माघेऽथ सप्तम्यथ फाल्गुनस्य ।
कृष्णे द्वितीयोपनये प्रशस्ताः प्रोक्ता भरद्वाजमुनीन्द्रमुख्यैः ॥ इति ।

चैत्रवैशाखशुक्लतृतीये मन्वादियुगादी । माघसितसप्तम्यपि मन्वादिः । एतासामनध्यायत्वं वक्ष्यते । टोडरानन्दे कारिकानिबन्धे विशेषः—

अनध्यायप्रतिप्रसवः ।

अनध्यायाच्च पूर्वेद्युरनध्यायात्परेऽहनि ।
व्रतारम्भं विसर्गं च विद्यारम्भं न कारयेत् ॥ इति ।

अनध्यायात्परेह्नीति द्वितीयेतरविषयं द्वितीयायाः सुरेश्वरेण प्रतिपदोक्तत्वादित्यपि व्याख्यातं तत्रैव । ननु नवम्यादित्रयमिति नवम्या अपि निषेधात्कोऽस्य विषयः । उच्यते । निषेधद्वयवशाद्दोषाधिक्यकल्पना । मान्यास्तु यदा नवमी दशदण्डा तदा ' निषेधः कालमात्रकः ' इतिवचनात्तदुत्तरमुपनयनं प्राप्तमनेन निषिध्यत इत्याहुः ।

पूर्वाह्णादिप्राशस्त्यमाह धर्मप्रकाशे ज्योतिर्मनुः—
सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनम् ।
मध्याह्ने मध्यमं प्रोक्तमपराह्णे तु गर्हितम् ॥ इति ।

भरद्वाजः—विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे ।
अनध्याये चोपनीतः पुनः संस्कारमर्हति ॥ इति ।

---

१ व्रात्यस्तोमो यागविशेषः । २ केचिदित्यपि ड. पाठः ।

पुनरुपनयननिमित्तानि चाग्रे विस्तरेण वक्ष्यामः । विशेषमाह व्यवे-
हारचण्डेश्वरः—

केतोरस्तदिनादूर्ध्वं सप्ताहानि परित्यजेत् ।
यावत्केतूदयस्तावदशुद्धः समयो भवेत् ॥ इति ।

इदं ब्रह्मपुत्राख्योग्रकेतुविषयमिति धर्मप्रकाशे ।

गर्गः—चन्द्रसूर्योपरागेषु त्र्यहं प्रागशुभं भवेत् ।
सप्ताहमशुभं पश्चात्स्मृतं ग्रहणशूलकम् ।

खण्डग्रहेऽङ्गिराः—

सर्वग्रासे तु सप्ताहमर्धग्रासे दिनत्रयम् ।
त्र्यङ्गुल्येकाङ्गुल्ययो ग्रासे दिनमेकं तु वर्जयेत् ॥ इति ।

विवाहचण्डेश्वरः—

ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे ।
त्र्यहं दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित् ॥

ज्योतिर्निबन्धेऽनुकल्पोऽप्युक्तः—

पञ्चदिनानि वसिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकम् ।
यवनाचार्यस्य मतं पञ्चमुहूर्तान्दूषयति राहुः ॥

एवं सर्वमालोक्य ज्योतिर्विदुपदिष्टे मुहूर्ते उपनयनं कुर्यात् । अत्र च माणवककर्तृकं गुरुसमीपगमनं प्रधानमिति जरन्मीमांसकाः । नव्यास्तु णिजविवक्षायां मानाभावादाचार्यकर्तृकं माणवकाधिकारिकमुपनयनमेव विधीयत इत्याहुः । युक्तं चेदम् । स्मृत्यर्थसारे तु । आचार्यसमीपनयनमग्निसमीपनयनं वा गायत्रीवाचनं वा प्रधानमित्युक्तम् । अथोपनेतुरुपनेययोरधिकारसंपादनार्थं प्रायश्चित्तमाह वृद्धविष्णुः—

कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च वटुश्चरेत् । इति ।

आचार्यस्य विशेषं स एवाह—

अपनेतोपनेत्रधिकारप्रायश्चित्तम् ।

सावित्रीमभ्यसेदग्निं पवित्राणि च संस्मरन् ।
सहस्रं द्वादशाख्यं च सावित्रीं प्रजपेद्बुधः ।
स्वाधिकारार्थमेवास्याः प्रदानार्थं हि तत्स्मृतम् ॥ इति ।

षण्ढादीनामप्युपनयनमुक्तं ब्रह्माण्डे—

षण्ढाद्युपनयनम् ।

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः ।
तस्माच्च षण्ढबधिरकुब्जवामनपङ्गुषु ॥

१ विवाहचण्डेश्वर. इति ङ पाठ. ।

जडगद्गदरोगार्तशुष्काङ्गविकलाङ्गिषु ।
मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ।
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् ॥

यथोचितमिति अशक्याङ्गहीनेने [हीना इ?] त्यर्थः।

मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते ।
कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः ॥
तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा ।
संस्कारमन्त्रहोमादीन्करोत्याचार्य एव तु ॥
उपनेयांश्च विधिवदाचार्यः स्वसमीपतः ।
आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत् ।
कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत् ॥ इति ।

उपनेतृक्रममाह गर्गः—

पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः ।
उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः ॥

तथा—पितैवोपनयेत्पुत्रं तदभावे पितुः पिता ।
तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥ इति ।

इति कालादिनिर्णयः ।

अथ परिधानोत्तरीयनिर्णयः । तत्र गृह्यम्—'अहतेन वाससा संवीतमैणेयेन वाऽजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम् । यदि वासांसि वसीरन् रक्तानि वसीरन्काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्यः' इति ।

परिधानीयो-त्तरीयनिर्णयः ।

अहतलक्षणं प्रचेता आह—

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।
अहतं तद्विजानीयात्सर्वकर्मसु पावनम् ॥ इति ।

अहतल-क्षणम् ।

पूर्वगृह्यार्थः । तत्र वासः साधारणं यदा त्वजिनं प्रावरणं तदा ब्राह्मणा-[दय ऐणेया]दीनि । एणी बिन्दुस(र)हिता मृगी । 'एण्या ढञ्' इति ढञ् । यदि वासांसीत्यत्र वाक्यभेदव्यवहितान्वयौ । वासांसि वसीरन्नित्येकं वाक्यम् । यदि रक्तानि वसीरंस्तदा काषायमित्यादि चाऽन्यत् । मनुर्विशेषमाह—

कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥ इति ।

वस्त्रेषु विशेषः ।

कार्ष्णरौरवबास्तान्युत्तरीयाणि 'कृष्णरुरुबस्ताजिनान्युत्तरीयाणि' इति शङ्खवचनात् । वस्त्रेषु विशेषमाह वसिष्ठः—'शुक्लमहतं वासो ब्राह्मणस्य कार्पासं माञ्जिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्य' इति ।

वस्त्रेषु विशेषः ।

इति वस्त्रादिनिर्णयः ।

मेखलाव्यवस्थामाह मनुः—

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥

मेखला-व्यवस्था ।

ज्या कदाचिच्चर्ममयी भवति कदाचित्तृणमयी । तत्र चर्ममयीव्यावृत्त्यर्थं मौर्वीति मेधातिथिः । ज्यायाश्च स्वरूपनाशप्रसङ्गान्त्रिवृत्त्वादिगुणो नेति धर्मप्रकाशे तातचरणाः । शणे तु त्रिवृत्त्वादिगुणोऽस्त्येव । गृह्ये विशेषः—'तेषां मेखला मौञ्जी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्याऽऽवी वैश्यस्य' इति आव्यूर्णाकृतेत्यर्थः । अनुकल्पमाह मनुः—

मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्बजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव च ॥ इति ।

अनुकल्पः ।

अत्र कुल्लूकभट्टः 'आदिशब्दस्य लोपमङ्गीकृत्याकाङ्क्षितविधानान्मुञ्जादीनां तिसृणां मेखलानामलाभे क्रमेण कुशाश्मन्तकबल्बजा ग्राह्या इत्याह । ग्रन्थयश्च शिष्टाचारात्प्रवरसंख्यया कार्याः । तथा च मनूक्तो विकल्पो व्यवस्थितः । एकप्रवरस्यैको ग्रन्थिस्त्रिप्रवरस्य त्रयः पञ्चप्रवरस्य पञ्चेति ।

इति मेखलाव्यवस्था ।

दण्डा उक्ता गृह्ये 'तेषां दण्डाः पालाशो ब्राह्मणस्यौदुम्बरः क्षत्रियस्य बैल्वो वैश्यस्य केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य प्राणसंमितो वैश्यस्य सर्वे वा सर्वेषाम्' इति । प्राणो नासा । मनुर्विशेषमाह—

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैप्पलौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥ इति ।

दण्डाः ।

न चात्र द्वन्द्वनिर्देशात्समुच्चय इति वाच्यं, दण्डं प्रदायेतिसूत्रे गुणभूतदण्डैकत्वश्रवणात् । मनुस्मृतावेव गुणविधिवाक्ये 'केशान्तको ब्राह्मणस्य' इत्येकवचनश्रवणात् वासिष्ठस्मृतौ स्पष्टमेव 'बैल्वः पालाशो वा' इति विकल्पाभिधानाच्च । अतो विकल्पितयोरेव द्वन्द्वनिर्देश इति । सर्वेषामलाभे यम आह—

एतेषामप्यलाभे तु सर्वेषां सर्वयज्ञियाः । इति ।

दण्डान्विशिनष्टि श्लोकगौतमः—

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ।
अनुद्वेगकरा दण्डाः सत्वचो नाग्निदूपिताः ॥ इति ।

इति दण्डनिर्णयः ।

यज्ञोपवीतमाह मनुः—

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
उपवीतम् । शणसूत्रमयं राज्ञो वैश्यस्याऽऽविकसुच्यते ॥

शणसूत्रमयमित्यत्रापि ऊर्ध्ववृतं त्रिवृदिति संबध्यते । आविकमव्यूर्णासंभवम् । एवं च यदिदानींतनानां क्षत्रियवैश्यानां कार्पासोपवीतधारणं तत्र मूलं न विद्मः । विशेष उक्तः छन्दोगपरिशिष्टे—

त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥

कर्तव्यतामाह देवलः—

ग्रामान्निष्क्रम्य संख्याय षण्णवत्यङ्गुलीषु तत् ।
तावत्त्रिगुणितं सूत्रं प्रक्षाल्याब्लिङ्गकैस्त्रिभिः ॥
देवागारेऽथवा गोष्ठे नद्यां वाऽन्यत्र वा शुचौ ।
सावित्र्या त्रिवृतं कुर्यान्नवसूत्रं तु तद्भवेत् ॥
हरिब्रह्मेश्वरेभ्यश्च प्रणम्याऽवदधात्यथ ।
यज्ञोपवीतमित्यादिव्याहृत्या चापि धारयेत् ॥

तथा—यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तवः । इति ।

वसिष्ठस्तु विशेषमाह—

नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः ।
तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः ॥

कात्यायनोऽपि—स्तनदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितम् ॥ इति ।

धारणे विशेषमाह भृगुः—

उपवीते बटोरेकं द्वे तथेतरयोः स्मृते ।
धारणे विशेषः । एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ॥

इतरयोर्गृहस्थवनस्थयोः । यतीनां त्रिदण्डिनाम् । 'स्नानोत्तरमेव द्वे' इत्याह वसिष्ठः—

स्नातकानां द्वितीयं स्यादन्तर्वाससस्तथोत्तरम् । इति ।

एतद्धारणं नित्यम्-'बहूनि चायुष्कामस्य' इति देवलवचनाद्बहून्यपि धार्याणि । बहुत्वावधिमाह कश्यपः—

त्रीणि चत्वारि पञ्चाष्ट गृहिणः स्युर्दशापि वा ।
सर्वैर्वा शुचिभिर्धार्यमुपवीतं द्विजातिभिः ॥

इदं च-सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

इतिभृगुस्मृतेर्नित्यम् । तत्र पूर्वार्धेन पुरुषार्थत्वमुत्तरार्धेन कर्माङ्गत्वमिति । विशेषमाह मनुः—

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीनआवीती निवीती कण्ठसज्जने ॥

असमासश्छान्दसः । स्मृतिसारे-'सूत्रमन्यकृतमपि ग्राह्यम्' इत्युक्तम् ।

छेदे विनाशे वा स्नातः कन्यया निर्मितं शुभम् ।
विधवाद्याभिरथवा सूत्रं गृह्णीत वै मुनिः ॥ इति ।

मेखलादीनां छेदे जलमध्ये प्रक्षेपः कार्य इत्याह मनुः—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥ इति ।

मन्त्रवदिति उपनयनकाले यैर्मन्त्रैर्धृतानि ते मन्त्रा गृह्यन्ते । इत्युपवीतनिर्णयः ।

इत्युपनयनम् ।

अथ पुनरुपनयने विशेषमाहाऽऽश्वलायनः—'अथोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति सावित्रीम्' इति । कृताकृतं वैकल्पिकम् । अनिरुक्तं न कर्तव्यमित्यर्थः । कालनियमोऽपि नास्तीत्यर्थः ।

पुनरुपनयने विशेषः ।

पराशरः-अजिनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च ।
निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥ इति ।

इदं च पुनरुपनयनं वेदान्तराध्ययनं चिकीर्षुः कुर्यादिति हरदत्त आह ।

आश्वलायनः-अध्वर्यूणां सामगानामृचमध्येतुमिच्छताम् ।
क्रिया स्यात्परिदानान्ता दीक्षादिर्न विधीयते ॥

ऋचमृग्वेदम् । परिदानम् 'आदित्याय व्रतपतये वटुं ते ददामि' इति विहितम् । अन्ये तु यत्र पुनःसंस्कारो विधीयते तत्रापीयमेवेतिकर्तव्यतेति ।

अथ पुनरुपनयननिमित्तानि भरद्वाजः—

पुनरुपनयननिमित्तानि ।

विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे ।
उपनीतस्त्वनध्याये पुनःसंस्कारमर्हति ॥
अपराह्णे चोपनीतः पुनःसंस्कारमर्हति ॥ इति ।

तथा—प्रदोषे निश्यनध्याये नन्दे कृष्णे गलग्रहे ।
मधुं विनोपनीतस्तु पुनः संस्कारमर्हति ॥ इति ।

पराशरः—अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ ।

विष्णुः—'विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु द्विजातीनां प्रायश्चित्तान्ते पुनःसंस्कारं कुर्यात्' इति ।

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा पुनः ।
उष्ट्रमानुषकेभाश्वारासभीक्षीरभोजनात् ।
उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः ॥

देशान्तरं गतस्यौर्ध्वदेहिके कृते यद्यसौ पुनरायाति तत्रोक्तं संग्रहे—

जीवन्यदि समागच्छेद्घृतकुम्भे निमज्य तम् ।
पुनरुत्थापयित्वाऽस्य जातकर्मादि कारयेत् ॥ इति ।

बौधायनः—

सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः ।
(अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥ इति ।)

अगमने (तीर्थयात्रार्थमङ्गादिगमने ?) तु न दोषः—

अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रमगधांस्तथा ।
तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति ॥

इति श्लोकगौतमोक्तेः । इति पुनरुपनयननिमित्तानि ।

ब्रह्मचारिधर्माः ।

अथ ब्रह्मचारिधर्माः । याज्ञवल्क्यः—

गुरुं वै चाप्युपासीत स्वाध्यायार्थं समाहितः । इति ।

आश्वलायनः—

ब्रह्मचारिधर्माः ।

अञ्जनाभ्यञ्जने क्षौद्रं गन्धपुष्पाक्षतान्व्रती ।
वर्जयेत्पादुके छत्रं यानोष्णीषरथादिकान् ॥
न शयीतान्तरिक्षे तु नाऽशुचौ न परैः सह ।
न वासीत न नग्नश्च नालीकं विभृयाद्व्रती ॥

नार्लीकं नालिकेरकमण्डलुमिति धर्मप्रकाशे—

मनसापि न चोल्लङ्घ्या गुरोराज्ञा कथंचन।
गुरुवद्गुरुपत्नीषु तत्पुत्रादिषु सर्वदा॥
प्रत्यक्षे वा परोक्षे वा चरेत प्रथमाश्रमी।
वेदोदितव्रतैरन्यान्व्रतानन्यान्न संचरेत् (?)।
न स्नायात्सर्वतीर्थेषु न भुञ्जीयादितस्ततः॥

तीर्थयात्रां न कुर्यादित्यर्थः।

भैक्षमाहृत्य भुञ्जीयात्सायंप्रातर्गुरौ वसन्।
देवर्षिपितृपूजां च कुर्याद्वा गुर्वनुज्ञया॥
अच्छिन्नान्धारयेन्नित्यं दण्डाजिनकमण्डलून्।
यज्ञसूत्रपवित्रे च मेखलां च गुरौ वसन्॥
न शावसूतके स्यातां मातापित्रोर्मृतावृते।
प्रतिनद्योत्सवालोकः श्राद्धान्नं च न शस्यते॥
न भक्षयेच्च ताम्बूलमथ मैथुनमेव च।
वर्जयेल्लशुनं लाजान्लाजापूपादिकान्व्रती॥
चरित्वा चतुरो वेदांस्त्रीन्द्वौ चैकमथापि वा।
तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षणः॥ इति।

सुमन्तुः—ब्रह्मचर्यं तपो भैक्ष्यं संध्ययोरग्निकर्म च।
स्वाध्यायं गुरुवृत्तिश्च चर्येयं ब्रह्मचारिणः॥

व्यासः—जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनि। इति

गुरुसेवायाः फलमाह शङ्खः—

गुरुसेवाफलम्। न स्नानेन न होमेन नैवाग्निपरिचर्यया।
ब्रह्मचारी दिवं याति स याति गुरुपूजनात्॥

मनुः—अधःशय्याऽऽसनं चास्य नित्यं स्याद्गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥

प्रसारणादिकं न कुर्यादित्यर्थः। अत्र नित्यग्रहणाद्ब्रह्मचर्योत्तरकालम-प्येतेऽनुवर्तन्ते एव। समासनमप्यनुजानाति क्वचिद्विष्णुः—

'नास्यैकासनो भवेदृते शिलाफलकनौयानेभ्यः' इति।

मनुः—गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥

---

१ नीचैः शय्या इ. पाठः।

सद्दोषकीर्तनं परीवादः । असद्दोषोक्तिर्निन्दा । निन्दादिकरणे फल-माह स एव—

गुरुनि-न्दाफलम् ।

भवेत्खरः परीवादाच्छ्वा वै भवति निन्दकः ।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥

परिभोक्ता अदत्तगुरुदानभोक्ता । हारीतः—

ऋचं वा यदि चार्धर्चं पादं वा यदि वाऽक्षरम् ।
सकाशाद्यस्य गृह्णीयान्नियतं तस्य गौरवम् ॥

मनुः—नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्याऽनुकुर्वीत गतिभाषितचेष्टितम् ॥ इति ।

केवलं नाम न ग्राह्यं किंतु उपाध्यायादिविशिष्टम् । उक्तं च गौतमेन—'नामगोत्रे गुरोः समानतो निर्दिशेत्' इति । मानेन सहितं समानम् ।

याज्ञवल्क्यः—

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ॥ इति ।

मधु क्षौद्रम् । आश्वलायनस्मृतौ क्षौद्रग्रहणात् । शुक्तं निष्ठुरवाक्यम् । यदि मांसभक्षणान्निवर्त्यो व्याधिस्तदा गुरोरुच्छिष्टं भक्षणीयम् । आश्व-लायनस्मृतौ 'स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नी-यात्' इति । आपस्तम्बोऽपि—

'पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्' इति ।

मनुः—वर्जयेन्मधु मांसं च गन्धमाल्यरसान् स्त्रियः ।
शुक्तानि चैव सर्वाणि प्राणिनां च विहिंसनम् ॥
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधं च लोभं च नर्तनं गीतवादने ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥ इति ।

प्रेक्षणालम्भमिति मैथुनशङ्कायामेव । यथोक्तं गौतमेन—'प्रेक्षणा-लम्भने मैथुनशङ्कायाम्' इति ॥ एवं च मान्यस्त्रीणां प्रेक्षणमालम्भः संभाषणं वा न दोषाय। आलम्भः स्पर्शः । मनुर्विशेषमाह—

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटी । इति ।

अत्र त्रयः पक्षाः मुण्डः जटी शिखाजटी वेति । गौतमोऽपि—'मुण्डी शिखी वा' इति । कात्यायनोऽपि—

सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिणः । इति ।

सर्वगुण्ठत्वं सामगत्विमिति केचित्। तथा च विष्णुपुराणे ज्ञापकम्—

एते लूतशिखास्तस्य दशनैरचिरोद्भतैः।
कुशकाशा विराजन्ते वटवः सामगा इव॥ इति।

यमः— 'खट्वासनं च शयनं वर्जयेद्दन्तधावनम्।
स्वपेदेकः कुशेष्वेव न रेतः स्कन्दयेत्क्वचित्॥'

कूर्मपुराणे—

नाऽऽदर्शं वै समीक्षेत नाचरेद्दन्तधावनम्। इति।

याज्ञवल्क्यः—

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि।
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्॥ इति।

ब्रह्मचर्ये स्थितो ब्राह्मणादिरेकमेकसंबन्ध्यन्नं नाद्यात्। एकस्यान्नं न गृह्णीयात् किं तु बहूनां ब्रह्मचारी तु श्राद्धे निमन्त्रितः सन्मधुमांसादिवर्जमेकस्यापि गृहेऽश्नीयात्। अनेन ज्ञायते श्राद्धव्यतिरेकेणैकस्यान्नं न गृह्णीयादिति। तथा—

अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि। इति।

ततः संध्योत्तरम्। संध्याविधिराचारमयूखे विस्तरेण वक्ष्यते। कदाचित्प्रातःसंध्योत्तरमकृतस्याग्निकार्यस्य यावद्भोजनं गौणकालमाह स एव—

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया। इति।

'सायमेवाग्निपूजेत्येके' इति सायमेवाग्निकार्यमित्याहाऽऽपस्तम्बः।

समिदाहरणं मनुराह—

पुरादाहृत्य समिधः स निदध्याद्विहायसि।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः॥ इति।

विहायसि मण्डपादाविति धर्मप्रकाशे। आपस्तम्बः—'नास्तमिते समिद्धारो गच्छेत्' इति।

समित्परिमाणमाह कात्यायनः—

नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित्।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता॥
प्रादेशान्नाधिका नोना तथा न स्याद्विशाखिका।
विशीर्णा विदला ह्रस्वा वक्राः ससुषिराः कृशाः।
दीर्घाः स्थूलाश्च समिधो वर्जनीयाः प्रयत्नतः॥ इति।

अग्निकार्याकरणे प्रायश्चित्तमृग्विधाने—

अग्निकार्याकरणे प्रायश्चित्तम्। मानस्तोके जपेन्मन्त्रं शतसंख्यं शिवालये।
अग्निकार्यं विना भुङ्क्ते न पापं ब्रह्मचारिणः ॥ इति।

इत्यग्निकार्यम्।

ततोऽभिवादनमुक्तं याज्ञवल्क्येन—

अभिवादनम्। ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्। इति।

ततोऽग्निकार्यानन्तरम्। अत्राग्निकार्याभिवादनयोरङ्गाङ्गित्वाभावात्कदाचिदग्निकार्याकरणेऽपि अभिवादनं कार्यमेव। वृद्धा मान्याः। तत्र मान्यो गुरुः। तं विशिनष्टि याज्ञवल्क्यः—

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। इति।

क्रिया निषेकाद्याः। मनुरपि—

निषेकादीनि कर्माणि यः करोति यथाविधि।
संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ इति।

एवं च पितैव गुरुः। निषेकादिक्रियाकर्तृत्वात्तस्य। एवं च—

उपनीय य ऋग्वेदमाचार्यः स उदाहृतः।

इत्याचार्यस्योपनेतृत्वं पित्रभावे द्रष्टव्यम्। यद्यपि क्षत्रियस्य वृत्त्यर्थत्वेनाप्राप्तमध्यापनं तथाप्यापदि धर्मार्थं प्राप्तमेव।

अतश्च—'पितैवोपनयेत्पुत्रम्' इति क्षत्रियादिं प्रत्यापदि प्रवर्तत एव। अयं परो विशेषः। याज्ञवल्क्यवाक्ये संज्ञासंबन्धस्त्रैवर्णिकान्विषयीकरोति। मनुवाक्ये तु विप्रग्रहणात्तमेव विषयीकरोति। एवं च विप्रसान्न (विप्रादन्यत्र ?) संभावनाकरणे गुरुत्वं यद्यपि मनुवाक्यं न प्रतिपादयति तथापि याज्ञवल्क्यवचनात्तत्सिद्धिः। त्रैवर्णिकानां मध्ये यस्यैवैतद्वचनद्वयप्रतिपादितानि निमित्तानि न सन्ति न तस्य गुरुशब्दवाच्यत्वम्। शूद्राणां तु न कदाप्येतद्वचनद्वयप्रतिपादितं गुरुत्वं संभाव्यते। नन्वेवं शूद्राणां गुरुतल्पगमनप्रायश्चित्तं न स्यादिति चेद्यद्यपि[1] गुरुतल्पगमनजन्यं न स्यात्तथापि मातृगमनजन्यं स्यादेवेति न विरोधः।

यद्वा—उपाध्यायः पिता ज्येष्ठो भ्राता चैव महामतिः।
मातुलश्च गुरुस्त्राता मातामहपितामहौ ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः।

---

१ चेन्न यद्यपि ङ. पाठः।

माता मातामही गुर्वी पितुर्मातुश्च सोदराः ।
पितामही स्वसा ज्येष्ठा धात्री च गुरवः स्त्रियः ॥

इति देवलवाक्येन केवलस्यापि पितुर्गुरुसंज्ञाकरणात्तद्भार्यागमने भविष्यत्येव गुरुतल्पगमनप्रायश्चित्तम् । आचार्यं विशिनष्टि मनुः—

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ इति ।

रहस्यमुपनिषदः । उपाध्यायं विशिनष्टि स एव—

एकदेशं तु यो वेदं वेदाङ्गान्यथवा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ इति ।

शङ्खोऽपि—भृतकाध्यापको यस्तु स उपाध्याय उच्यते । इति ।

मासे दिने वर्षे वा एतावद्देयमिति परिच्छिद्य योऽध्यापयति स भृतकाध्यापकः । विष्णुरपि—

' यस्त्वेनं मूल्येनाध्यापयेत्तमुपाध्यायम् ' इति ।

विद्यादिति शेषः । एषु च मध्ये माता मान्यतरेत्युक्तं याज्ञवल्क्येन—

एते मान्या यथापूर्वमेभ्यो माता गरीयसी ॥ इति ।

धर्मप्रकाशे पुराणे तु—

द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः ।
तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥

इति पितुर्गरीयस्त्वमुक्तम् । अत्रेच्छया विकल्पः तुल्यकल्पत्वं वा । अन्यं विशेषमाह विष्णुः—

'बाले समानवयस्यध्यापके गुरुवद्वर्तेत' इति ।

बाल इति नावगणनीय इत्यर्थः । इति गुर्वादिनिरूपणम् ।

अभिवादनप्रकारमाह मनुः—

अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥

अभिवादादभिवादये इति पदात्परं स्वं नाम ग्राह्यम् ।

तथा—भोशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने । इति ।

तथाच अभिवादये देवदत्तोऽहं भो इत्युल्लेखः । एकहस्तेनाभिवादनकरणे दोषमाह विष्णुः—

जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत् ।
धर्मं तन्निष्फलं याति एकहस्ताभिवादने ॥ इति ।

विशेषमाहात्रिः—

दक्षिणं पाणिमुद्धृत्य प्रकाममभिवादयेत् ।
श्रोत्रिये त्वञ्जलिः कार्यः पादोपग्रहणं गुरोः ॥ इति ।

एतस्माच्च वाक्यादेकहस्तेनाप्यभिवादनं गम्यते । एवं च पूर्वोक्तदोषश्रवणं श्रोत्रियादौ ज्ञेयम् । पादोपसंग्रहणप्रकारमाह मनुः—

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥

गुरुचरण इति शेषः । बौधायनः—'श्रोत्रे संस्पृश्य' इति विशेषमाह ।
अन्यविशेषमाह मनुः—

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् । इति ।

अथ प्रत्यभिवादनमुक्तं मनुना—

प्रत्यभिवादनम् ।

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चैव नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥

अत्र न नाम्नोन्तेऽकारो विधीयते किंतु यो नामान्तेऽकारस्तमुद्दिश्य प्लुतमात्रं विधीयते । नाम्नां च सर्वेषामकारान्तत्वाभावादकारग्रहणं नामान्तस्वरोपलक्षणमिति व्याख्यातृसंप्रदायः । सौम्येतिनामग्रहणार्थं तथा च नामान्तस्वरः प्लुतो भवति । शर्मादिप्रयोगोऽपि कार्य इति केचित् । एवं चायुष्मान्भव देवदत्ता ३ शर्मन्निति प्रयोगः । केचित्तु शर्मशब्दान्तर्गताकारं प्लुतं पठन्ति । तच्चिन्त्यम् । शर्मशब्दस्य नामान्तर्गत्यभावात् । तदन्तर्गतौ केवलशर्मप्रयोगाभावादवश्यवक्तव्ये उपपदे त्र्यक्षरनामानुपपत्तिः । इदं च शूद्रस्य न भवति । 'प्रत्यभिवादेऽशूद्रे' इतिस्मृतिरूपपाणिनिसूत्रात् । अनेन च ज्ञायते शूद्रं प्रत्यपि प्रत्यभिवादनं प्राप्तमिति ।

ब्राह्मणस्य क्षत्रियादीनामभिवादने प्रायश्चित्तमाह शातातपः—

क्षत्रवैश्यावभिवाद्य प्रायश्चित्तं कथं भवेत् ।
ब्राह्मणानां दशाष्टौ वा अभिवाद्य विशुध्यति ॥

ब्राह्मणस्य क्षत्रियादीनामभिवादने प्रायश्चित्तम् ।

अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत् ।
ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति ॥ इति ।

अभिवादनापवादमाह विष्णुः—

सभासु चैव सर्वासु यज्ञे राजगृहे तथा ।
नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत् ॥

क्वचिद(न)भिवादनमाह शातातपः—

उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम् ।
अभिवाद्य द्विजो मोहादहोरात्रेण शुध्यति ॥

अनेन निषेधेन ज्ञायते स्त्रियोऽप्यभिवाद्या इति ।

यथोक्तं मनुना—

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥ इति ।

विशेष उक्तस्तेनैव—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

एतच्चाभिवादनमधिकवयसामेव कार्यम्—'ज्यायांसमभिवादयेत्' इति स्मृतेः ।

तथा अत एव ऋत्विगादीनां मान्यत्वेऽपि कनीयसामनभिवाद्यत्वमाह गौतमः—'ऋत्विक्श्वशुरमातुलपितृव्याणां तु यवीयसां प्रत्युत्थानमनभिवाद्याः' इति ।

यत्तु वसिष्ठः—'ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवादयेत्' इति । तदभिवादनसाभिमुख्येन वदनं परिलोपणार्थम् । अत एव बौधायनः—ऋत्विक्श्वशुरपितृव्यमातुलानां यवीयसां प्रत्युत्थायाभिभाषणम् ॥ इति ।

अभिभाषणनियममाह मनुः—

कुशलं ब्राह्मणं पृच्छेत्क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ इति ।

ब्राह्मणेन स्वस्मात्कनिष्ठानां क्षत्रियादीनां चाऽऽशीर्देयेत्युक्तं भविष्यपुराणे—

ब्राह्मणः सर्ववर्णानां स्वस्ति कुर्यादिति स्थितिः ॥ इति ।

विशेष उक्तः शातातपेन—

पाखण्डं पतितं व्रात्यं महापातकिनं शठम् ।

नास्तिकं च कृतघ्नं च नाभिवादेत्कथंचन ॥
धावन्तं च प्रमत्तं च मन्त्रोच्चारकृतं तथा ।
भुञ्जानमाचमनार्हं नाभिवादेत्कथंचन ॥
वमन्तं कृन्तमाणं च कुर्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादयेत् ॥

जमदग्निः—

देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेदहोरात्रेण शुध्यति ॥

इत्यभिवादनप्रत्यभिवादननिर्णयः ।

अथ मान्यतानिमित्तानि । याज्ञवल्क्यः—

विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम् ।

मान्यतानिमित्तानि । अत्र पूर्वपूर्वस्य गरीयस्त्वं ज्ञेयम् । उक्तं च गौतमेन— 'श्रुतं सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्य' इति ।

मनुरपि—पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥ इति ।

दशमीं गत इति नवतेरूर्ध्वावस्थां प्राप्त इत्यर्थः । पञ्चानां विद्यादीनाम् ।

याज्ञवल्क्योऽपि—

एतैः प्रभूतैः शूद्रोऽपि वार्द्धके मानमर्हति । इति ।

मार्गापसारणे विशेषमाह मनुः—

मार्गापसारणे विशेषः । चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः ।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥

वरो विवाहोद्यतः । भारतेऽपि—

अष्टावक्रः पथि राज्ञा समेत्य प्रोत्सार्यमाणो[1] वाक्यमिदं बभाषे ।
अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था भारवाहस्य पन्थाः ।
राज्ञः पन्था ब्राह्मणेनासमेत्य स्नातस्य पन्थाः ब्राह्मणस्यैव पन्थाः ॥ इति ।

इति मान्यतानिमित्तम् ।

अध्ययनधर्माः । मनुः—चर्याविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥ इति ।

---

१ मार्गमाणे ड. पाठः ।

रहस्यमुपनिषत् । श्रुतौ—'तस्मात्स्वाध्यायोऽध्येतव्यः' इति स्वः स्वकीयोऽध्यायः शाखा तदुक्तं भट्टपादैः—

अत्र स्वाध्यायशब्देन स्वशाखैका तु गृह्यते । इति ।

अनेन च स्वाध्यायाध्ययनस्य प्राथम्यमावश्यकत्वं चोक्तं न तु द्वितीयवेदाध्ययनम् ।

एवंच—वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।

इत्यविरुद्धम् ।

अत्र केचित्—बहूनां वेदानामध्ययनेऽपि स्ववेदसंबन्धिनी द्वितीया शाखानाध्येतव्येति व्याचक्षते । यथा आश्वलायनेन शाङ्खायनशाखेति । तदयुक्तम् । आश्वलायनेन यजुःशाखाध्येतव्या न शाङ्खायनशाखेत्यत्र मानाभावात् । न च स्वाध्याय इत्यत्रैकवचनात्तदर्थस्यावरमीमांसादीत्योपादेयगतत्वात्पशुना यजेतेत्यत्र द्वितीयपश्वालम्भवद्द्वितीयशाखाऽनध्ययनमिति वाच्यम् । तत्र हि एकत्वं प्रकृत्यन्तरे व्यावर्तकं संभवति नत्वेवमत्राऽपि स्वाध्यायस्यैकत्वेन परिज्ञातत्वात् । न ह्याकाश इत्यत्रैकत्वं व्यावर्तकं भवति । अतोऽत्र—

एकवेदस्य शाखानां मध्ये योऽन्यां समाश्रयेत् ।
स्वशाखां संपरित्यज्य शाखारण्डः स उच्यते ॥ इति ।

अन्यां स्वशाखाभिन्नाम् । यत्र हि एकवेदशाखानां मध्ये स्वीयां परित्यज्य योऽन्यामधीते स शाखारण्ड इतिवदता तामधीत्यान्यशाखाध्ययनमनुज्ञातं भवति । स एव—

अधीत्य शाखामात्मीयां परशाखां ततः पठेत् । इति ।

तथा 'षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति । विशेषमाह कात्यायनः—

स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः ।
कर्तुमिच्छति दुर्मेधा मोघं तस्य विचेष्टितम् ॥ इति ।

इदं स्वशाखोक्तविरुद्धं न कार्यमित्येवंपरम् । यथोक्तं तेनैव—

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकं यथा ॥ इति ।

अध्ययनधर्ममाह मनुः—

(अध्ययनधर्मः ।) प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ॥ इति ।

प्राक्कूलान्प्रागग्रान्। पवित्रमाह गौतमः—'प्राणोपस्पर्शनं दर्भैः' इति। प्राणा इन्द्रियाणि। संवर्तः—

पवित्रम्। प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित्र्याश्चानुवचनं ततो वृत्तान्तमारभेत्॥ इति।

वृत्तान्तं पत्रस्थापितम्। मनुः—

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम्॥

तिस्रः भूर्भुवःस्वः। ब्रह्मणो वेदस्य मुखमारम्भे पठनीयमित्यर्थः।

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।

इतिवचनादन्ते प्रणवमात्रम्। गौतमः—'प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वा' इति। मनुः—

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः।
ब्रह्माञ्जलिपुटोऽध्याप्यो लघुवासा जितेन्द्रियः॥ इति।

लट्प्रयोगेणाचमनमध्ययनाङ्गम्। शूद्रसन्निधौ नाध्येयमित्याह व्यासः—

शूद्रसन्निधावध्ययननिषेधः। अनध्यायेष्वधीतं यद्यच्च शूद्रस्य संनिधौ।
प्रतिग्रहनिमित्तं यत्तत्काय तदुच्यते॥ इति।

अस्याध्ययने लब्धिर्भविष्यतीत्याशया पठितम्। नारदः—

पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ।
भ्राजते न सभामध्ये जारगर्भ इव स्त्रियाः॥
नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ।
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्॥

नारदः—हस्तेनाधीयमानस्तु स्वरवर्णान् प्रयोजयन्।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥

हस्तस्वराध्ययनं तु सामयजुर्वेदिनाम्।

व्यासः—मेखलाजिनदण्डानां धारणैर्ब्रह्मचारिभिः।
वेदः कृत्स्नोऽधिगन्तव्यः सर्वज्ञाना द्विजातिभिः॥
भिक्षादिभिर्गुरोर्नित्यं शुश्रूषायां रतैः सदा।
आसमाप्तेर्व्रतं कार्यं वेदस्य विधिवद्द्विजैः॥ इति।

शुश्रूषाफलमाह स एव—

शुश्रूषाफलम्। यथा खनन्खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

नारदः—अहेरिव गणाद्भीतः सौहित्यान्नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामुपगच्छति ॥ इति ।

सौहित्यं तृप्तिः । लघुव्यासः—

ऋक्पादमप्यधीयीत मार्गेणोक्तेन धर्मवित् ।
नत्वेव चतुरो वेदानन्यायेन कदाचन ॥
वेदविप्लावनात्तेन वरं मौनं समाश्रितम् ।
वेदविप्लावनाद्भीतो (?) नरकं यात्यधोमुखः ॥ इति ।

वेदविप्लावकस्य लक्षणमाह यमः—

योऽर्थार्थी मां द्विजे दद्यात्पठेच्चैवाऽविधानतः ।
अनध्याये च तं प्राहुर्वेदविप्लावकं द्विजाः ॥

विद्यानाशहेतून्नारद आह—

विद्यानाश-हेतवः ।

द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च ।
स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट् ।

पुस्तकस्य पुराणादेः शुश्रूषा श्रोतुमिच्छा । अन्यान्यपि लोकतो विद्यानाशकारणान्यवगन्तव्यानि ।

इत्यध्येतृधर्माः ।

गुरुधर्मानाह याज्ञवल्क्यः—

गुरुधर्माः ।

कृतज्ञाऽद्रोहिमेधाविशुचिकल्पानसूयकाः ।
अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः ॥

कृतज्ञः उपकारस्य वेत्ता । कल्यो नीरोग इति ।

धर्मप्रकाशे मनुः—

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥

तथा—धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे ॥

यदा विहितामनुष्ठापकाय नास्तिकाय चाध्यापयति तदा धर्माभावः ।

नारदः—

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ॥ इति ।

चतुर्थं साधनम् । यमः—

सततं प्रातरुत्थाय दन्तधावनपूर्वकम् ।
स्नात्वा हुत्वाऽथ शिष्येभ्यः कुर्यादध्यापनं द्विजः ॥ इति ।

शयानस्याध्यापननिषेधः । आपस्तम्बः—'शयानश्चाध्यापनं वर्जयेत्' इति ।

मनुः—अध्येष्यमाणस्तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति वा चरेत् ॥

ताडनमपि स एवाह—

भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्यास्ते रज्ज्वा वेणुदलेन च ॥ इति ।

ताडनं तु शिरसि न कार्यम् । यथोक्तं मनुना—

पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथंचन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चोरकिल्बिषम् ॥

विद्यावतः प्रार्थितस्याध्यापनमावश्यकम् 'ये हि विद्यामधीत्यार्थिने न प्रदद्युर्न ते धर्मभाजः स्युः' इति वसिष्ठस्मरणादध्यापनेनाधीताया विद्यायाः संपूर्णं फलमाप्नोतीत्यर्थः ।

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ।
प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चयः ॥

इतिमनुवचनाद्ब्राह्मणेनैव कार्यम् । इतरौ राजवैश्यौ । अत्र वाक्यत्रयम्—'त्रयो वर्णा ब्राह्मणादधीयीरन्' वक्ष्यमाणवचनस्वरसाद्ब्राह्मणादित्यध्याहार्यम् । 'ब्राह्मण एव प्रब्रूयात्' इति द्वितीयम् । 'नेतरौ' इति प्रतिषेधरूपं तृतीयम् । एवं यदा क्षत्रियादिरध्यापयति तदा तस्याध्येतुश्च दोषः । आपत्सुभयोर्दोषो नास्तीत्याह मनुः—

अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या तु शुश्रूषा यावदध्ययनं गुरोः ॥ इति ।

अनुव्रज्य शुश्रूषेत्यनुगमनमात्रं कार्यं न पादप्रक्षालनादि । इयं चापद्ब्राह्मणाध्यापकाभावरूपाऽध्येतुः । गौतमोऽपि—'आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषाऽऽसमाप्तेर्ब्राह्मणो गुरुः' इति ।

मनुरपि—श्रद्दधानः शुभां विद्यामाददीताऽवरादपि ।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥ इति ।

वेदाध्ययनस्य श्रैष्ठ्यमाह याज्ञवल्क्यः—

यज्ञानां तपसश्चैव शुभानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥ इति ।

विद्यादानस्य फलमाह स एव—

विद्यादान-फलम् । सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।
तद्दत्वा समवाप्नोति ब्रह्मलोकं सनातनम् ॥ इति ।

इति गुरुधर्माः ।

अथानध्यायाः। ते च नित्यनैमित्तिकभेदेन द्विधा। तत्र नित्यास्तावदुच्यन्ते।

मनुः—अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
अनध्यायाः । ब्रह्माऽष्टमी पौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥ इति ।

तथा—अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च । इति ।

अष्टमीत्वेनाष्टकानामुपादानाद्दोषातिशयार्थं पुनर्ग्रहणम् । केचित्तु अष्टमीष्वित्येव पठन्ति । अहोरात्रं चायमनध्यायः । याज्ञवल्क्येन द्युनिशा-मित्यनुवृत्तौ चतुर्दश्यादीनामुपादानात् । रामायणे हनुमद्वाक्यम्—

सा स्वभावेन तन्वङ्गी त्वद्वियोगाद्विशेषतः ।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ इति ।

हारीतोऽपि—

प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः ।
श्वोऽनध्यायेऽद्य शर्वर्यां नाधीयीत कदाचन ॥ इति ।

तथा—प्रदोषेषु त्रयोदश्यां नाध्येयं प्रतिपत्सु च । इति ।

त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति ॥

इत्युक्तप्रदोषे। यद्वा प्रदोष उक्तो बृहन्मनुना—

चतुर्थ्यां च त्रयोदश्यां सप्तम्यामर्धरात्रतः ।
अर्वाङ्नाध्ययनं कुर्यान्नदीच्छेत्तस्य धारणम् ॥

स्मृत्यर्थसारे विशेषः—

चतुर्थ्याः पूर्वरात्रे तु नवनाडीषु दर्शने ।
नाध्येयं पूर्वरात्रे स्यात्सप्तमी च त्रयोदशी ॥
अर्धरात्रात्पुरा चेत्स्यान्नाध्येयं पूर्वरात्रके ॥ इति ।

पूर्वं चतुर्थ्यामर्धरात्रतोऽर्वाङ्नाध्येयमिति तावत्पर्यन्तं चतुर्थीसत्त्वे अन्यथा नवनाडीपर्यन्तम् । यद्वा पूर्ववचनेनार्धरात्रात्प्राग्दोषेऽवगते पुनरत्र नवनाडीग्रहणं दोषातिशयार्थम् ।

दक्षः—प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥

बौधायनः—प्रातःसंध्या त्रिनाडी स्यात्सायंसंध्या तथाविधा ।
महानिशा तु विज्ञेया चतस्रो घटिकास्तथा ।
सायंप्रातःसंध्ययोश्च नाधीयीत महानिशि ॥

तथा—महानिशा तु विज्ञेया रात्रौ मध्यमयामयोः ।
तस्यां स्नानं न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥ इति ।

अत्रापि घटिकाचतुष्टयं दोषातिशयार्थम् । स्मृतिचन्द्रिकायां पुराणे—
महानवम्यां द्वादश्यां भरण्यां च महाद्युते ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ।
माघमासस्य सप्तम्यां रथाख्यायां विवर्जयेत् ॥ इति ।

महच्छब्दस्य द्वादश्या भरण्या च सहान्वय इति धर्मप्रकाशे । महानवमी आश्विनशुक्ला । महाद्वादशी कार्तिकशुक्लद्वादशी । महाभरणी प्रौष्ठपद्यनन्तरेति तत्रैव । नारदीये—

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्तव्यो मन्वादिषु युगादिषु ॥

तथा—युगादिषु च सर्वासु तथा मन्वन्तरादिषु ।
अनध्यायं प्रकुर्वीत या च सोपपदा तिथिः ॥

मन्वन्तरादयो युगादयश्च [1]श्राद्धमयूखे वक्ष्यन्ते । सोपपदा उक्ताः कालादर्शे—

सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता ।
चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥ इति ।

यदि कदाचिदनध्यायतिथिः प्रातः सायं वा तदाप्यनध्याय इत्याह बौधायनः—'यद्यनध्यायतिथिर्द्विमुहूर्तो परिदृश्येत तमनध्यायं प्राहुः' इति । दिनमध्ये परिदृश्येतेत्यर्थः । कालादर्शे स्मृतिः—

चातुर्मास्यद्वितीयासु वेदाध्यायं विवर्जयेत् ॥ इति ।

---

१ तातकृतश्राद्धमयूखे ह्येमाः क. पाठः ।

ता आह गार्ग्यः—

> शुचावूर्जे तपस्ये च या द्वितीया विधुक्षये ।
> चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः ॥ इति ।

विधुक्षयः कृष्णपक्षः । आषाढ्युत्तरा कार्तिक्युत्तरा फाल्गुन्युत्तरा चेत्यर्थः । इति नित्यानध्यायाः ।

अथ नैमित्तिकेषु तात्कालिकानध्यायानाह याज्ञवल्क्यः—

नैमित्तिकानध्यायाः ।

> श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिस्वने ।
> अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥
> देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ।
> भुक्त्वार्द्रपाणिरम्भोऽन्तरर्धरात्रेऽतिमारुते ॥

तात्कालिकानध्यायाः ।

> पांशुवर्षे च दिग्दाहे संध्यानीहारभीतिषु ।
> धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥
> खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ।
> सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ॥ इति ।

बाणो वंशः । शिष्टागमनेऽपि शिष्टाज्ञायां नानध्यायः । यथाह यमः—

> आगतं वाऽतिथिं दृष्ट्वा नाऽधीयीतेव बुद्धिमान् ।
> अथानुज्ञापितस्तेन तस्मिन्नध्येतव्यं प्रयत्नतः ॥ इति ।

यानं रथादिः । इरिणमूषरं महाभूमिर्वा । यावन्निमित्तं शब्दादि तावदेवानध्याय इत्यर्थः । मनुः—

> नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
> धर्मनैपुणकामानां पूतिगन्धे च सर्वतः ॥ इति ।

धर्मस्य नैपुणं संपूर्णत्वं तत्कामयतीति । वसिष्ठो विशेषमाह—'नगरेषु कामं गोमयपर्युक्षिते परिलिखने च ' इति । हेमाद्रौ स्मृतौ—

> सर्वकुत्सितगन्धे च परिवादसभासु च ।
> गोविप्ररोधने सद्य......श्राद्धपङ्क्तिषु ॥
> शाल्मलस्य मधूकस्य कोविदारकपित्थयोः ।
> श्लेष्मातकस्य छायायां चेति तात्कालिकान्विदुः ॥

---

१ गिरिरिति ङ. पाठ. ।

श्राद्धपङ्क्तिषु विहितमन्त्रभिन्नेषु श्राद्धभागेष्वनध्यायः। विहितमन्त्राः श्राद्धमयूखे वक्ष्यन्ते।

मनुः—शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम्।
नाधीयीताऽऽमिषं जग्ध्वा सूतकान्नाद्यमेव च॥ इति।

प्रौढपादः प्रसारितपादः पादारोपितपादो वा। अवसक्थिका जानुनोर्मध्यस्य च बन्धः। स एव—

नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च॥
न विवादे न कलहे न सेनाया न संगरे।
न भुक्तमात्रे नाऽजीर्णे न वमित्वा न शुक्तके।
शस्त्रेण च क्षते गात्रे रुधिरे च परिस्रुते॥

शुक्तके मुखोद्गार इति। धर्मप्रकाशे यमः—'सामशब्दे नाथर्वयजुषी' इति। नाधीयीतेत्यर्थः। आपस्तम्बः—'शाखान्तरध्वनौ साम्नामनध्यायः' इति। गौतमः। 'अभ्रदर्शने चापर्तौ' अपर्तौ प्रावृड्भिन्नर्तौ। हेमाद्रौ स्मृतिः—'गजगण्डसारससिंहव्याघ्रमहापापिकृतघ्नावेक्षणमनध्यायः' इति। एषां यावदवेक्षणं तावदनध्याय इत्यर्थः। प्रचेताः—'चतुष्पथवर्त्ममहापथराजोद्यानेषु नाधीयीत' इति।

शङ्खः—नाधीयीताभियुक्तोऽपि यानगो न च योगतः।
देवायतनवल्मीकश्मशानवनसन्निधौ॥

आपस्तम्बः—'ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्संभाषितुं ब्राह्मणेन संभाष्य तया संभाषेत ब्राह्मणेनैव संभाष्याधीयीत' इति। यावद्ब्राह्मणसंभाषणं न कृतं तावदनध्याय इति। गौतमः—'बाणभेरीमृदङ्गगदार्तस्वरेषु' इति। अनध्याय इत्यर्थः। गदं शकटम्।

तात्कालिकानुक्त्वा सज्योतिरनध्यायानाह मनुः—

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा॥

प्रादुष्कृतेष्विति प्रातःसंध्योपलक्षणम्। सज्योतिरिति सायंसंध्यायां रात्रौ। पूर्वं विद्युत्स्तनितवर्षाणि प्रक्रान्तानि। तत्रोभयोरुक्तम्। शेषे वर्षे यथा दिवा तथा रात्रौ अहोरात्रमित्यर्थः। वर्षे संध्यायामेव। अयं सज्योतिरनध्यायः

१ म इति ड. पाठः।

प्रावृट्काले। यथाऽऽह पैठीनसिः—'यदा वर्षास्वेव विद्युत्स्तनितं वा तदा संज्योतिः' इति। अवर्षासु विद्युदादौ त्रिरात्रं वक्ष्यते। इदं सायंसंध्यायां हारीतेन 'प्रातःसंध्यास्तनितेऽहोरात्रम्' इत्युक्तत्वात्। स्मृत्यर्थसारे 'काकोलूकमूषककुक्कुटमण्डूकाद्यन्तरागमनं दिने चेद्दिनान्तं रात्रौ चेद्रात्र्यन्तमनध्यायः' इति। गौतमः—'श्मशानग्रामान्तमहापथेष्वनध्यायः' इति इति सज्योतिरनध्यायः। अहोरात्रानध्यायमाह याज्ञवल्क्यः—

संध्यागर्जितनिर्घातभूकम्पोल्कानिपातने।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके।
ऋतुसंधिषु भुक्त्वा तु श्राद्धिकं प्रतिगृह्य च॥
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये॥

श्राद्धिकं प्रतिगृह्येति पार्वणसंबन्धि। एकोद्दिष्टे वक्ष्यते। नवश्राद्धेऽन्नजरणपर्यन्तमनध्यायः।

शातातपः—'अष्टकासु त्वहोरात्रमुल्कासु च महोत्सवे' इति।

गौतमः—'सकलोपाहितवेदसमाप्तिछर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रमिति'। सकलोपाहितोऽग्न्युत्पातः। छर्दौ विशेषमाहाऽऽपस्तम्बः—'छर्दयित्वा स्वप्नान्ते घृतं वा प्राश्य' इति। अधीयीतेत्यर्थः। स्वप्नान्तं मैहुनादि। धर्मप्रकाशे। अहोरात्रानुवृत्तौ गोभिलः—

सब्रह्मचारिणि मृते प्रेते भूमिपतावपि। इति।

अनध्याय इत्यर्थः। गौतमः—'ऊर्ध्वं भोजनादुत्सवे प्राधानस्य' इति। अस्यार्थः। उत्सवे विवाहादावूर्ध्वं भोजनादहोरात्रमनध्यायः। प्राधानस्य प्रथमाध्ययने अनुत्सवेऽपि भोजनादूर्ध्वमनध्याय इति।

इत्यहोरात्रानध्यायाः।

आकालिकानध्यायमाह मनुः—

आकालिकानध्यायः।

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥ इति।

विद्युदादित्रयसाहित्यमत्र ज्ञेयम्। द्वन्द्वनिर्देशादिति मेधातिथिः। प्रत्येकं निमित्तत्वेति हेमाद्रिः। इदं च वर्षाकाले,तद्भिन्ने वक्ष्यते। यस्मिन्समये निमित्तं जातं तं कालमारभ्य श्वस्तावत्कालपर्यन्तम्। विद्युदादीनां निमित्तत्वं संध्यायामेव। यथाऽऽह स एव—

एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥

एवं च ऋतावभ्रदर्शने नानध्यायः । अभ्रदर्शनेऽपि प्रादुष्कृताग्न्वय इति धर्मप्रकाशे । आपस्तम्बः—'उल्कापातमग्न्युत्पातं च सर्वासां विद्यानामाकालिकम्' इति । अनध्याय इत्यर्थः । हेमाद्रौ स्मृत्यन्तरे—'अग्न्युत्पाते चाकालवृष्टौ चाकालिकोऽनध्यायः' इति । अग्युत्पातश्च समानग्रामभवः। आपस्तम्बः—'विद्युत्स्तनयित्नुवृष्टयोऽपर्तौ यत्र संनिपतेयुस्त्र्यहमनध्यायो यावद्भूमिर्व्युदका इत्येके । एकेन द्वाभ्यां चैतेषामाकालम्' इति ।

अपर्तुमाह गार्ग्यः—

अनूराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः ।
यावत्प्रवर्तते तावदकालं मुनयो विदुः ॥ इति ।

एवं च मृगमारभ्य विशाखान्तं कालः । इत्याकालिकानध्यायः ।

पक्षिण्यनध्यायमाह मनुः—

पक्षिण्यनध्यायः।

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशम् ॥ इति ।

कालादर्शे मनुः—

उत्सर्गे प्रथमेऽध्याये त्वनध्यायस्त्र्यहं भवेत् ।
धारणाध्ययनादौ तु पक्षिणीं दिनमेव च ॥ इति ।

इति पक्षिण्यनध्यायः ।

त्रिदिनाऽनध्यायमाह मनुः—

त्रिदिनानध्यायः ।

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥ इति ।

अत्र केचिन्नवश्राद्धेऽन्नजरणपर्यन्तमनध्याय एकोद्दिष्टे तु त्र्यहमित्यनौचित्यं मन्वाना नवश्राद्धीयमतिपूर्वान्नभोजनेऽन्नजरणपर्यन्तमेकोद्दिष्टेषु मतिपूर्वे त्र्यहमिति व्यवस्थापयन्ति । मनूक्तैकोद्दिष्टशब्देन नवश्राद्धान्यपि गृह्यन्ते । शङ्खः—'राहुदर्शने शक्रध्वजपतने आचार्ये च मृते त्रिरात्रम्' इति । इदं च संपूर्णग्रहे । खण्डग्रहे तु गौतमोक्तमाकालिकमनध्यायं विद्यादिति तत्रैव । विज्ञानेश्वरस्तु ग्रस्तास्ते त्रिरात्रमन्यथाऽकालिकमित्याह ।

शक्रध्वजकालमाह गार्ग्यः—

द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे तथा ।
............शक्रयष्टिनिपातनम्' इति ।

पौर्णमास्यामिति केचित् । मनुः—
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । इति ।

याज्ञवल्क्यः—
त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।

विश्वामित्रः—
समाप्य वेदं त्रिदिनं वेदानध्ययनं भवेत् । इति ।

हारीतः 'आरण्यशूकरस्य त्र्यहं ग्राम्यस्याहः' इति । अन्तरागमन इत्यर्थः ।

इति त्र्यहानध्यायाः ।

महागुरुनिपाते ब्राह्मणस्य द्वादशरात्रमध्ययनादिनिषेधात्सोऽप्यनध्यायः ।
त्रिमासानध्याय उक्तो हेमाद्रौ—
अविगवयाजन्याग्रनास्तिकादौ त्रिमासम् । इति ।

त्रिमासानध्यायः ।

षण्मासानध्याय उक्तः श्लोकगौतमेन—
गुर्वन्तेवासिनां वेदमध्येतॄणां च मध्यतः ।
ययुः शशाः श्वपाकाऽजा नाधीयीतार्धवत्सरम् ॥ इति ।

षण्मासानध्यायः ।

संवपूर्वमजे मासत्रयमुक्तमतोऽत्र प्रथमारम्भेऽजगमने षण्मासं ज्ञेयम् । संवत्सराऽनध्याय उक्तो वसिष्ठेन उक्तः (स्मृत्यर्थसारे—गजसारससिंहव्याघ्र-महापातकिकृतनादेरब्दमिति) ।

वत्सरानध्यायः ।

इत्यनध्यायाः ।

अथानध्यायापवादमाह मनुः—
वेदोपाकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ इति ।

अनध्यायापवादः ।

नित्यस्वाध्यायो ब्रह्मयज्ञः । शौनकः—
नित्ये जपे च काम्ये च वेदपारायणे तथा ।
नाऽनध्यायोऽस्ति वेदानां ग्रहणे ग्राहणे स्मृतः ॥

तथा—दैवतार्चनमन्त्राणां नानध्यायः स्मृतस्तथा ।
नाऽनध्याये जपेद्वेदान्त्रांश्चैव विशेषतः ।

---

१ अयमनध्यायप्रतिषेधोऽति मन्त्रसिद्धिविषयः ।

पौरुषं पावमानं च गृहीतनियमादृते ॥ इति ।

यदि मयेदमपठित्वा न भोक्तव्यमिति नियमस्तदाऽध्येयमित्यर्थः ।

तथा—चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदा ।
दुर्मेधसामनध्यायस्त्वन्तरा गमनेषु च ।
तत्र विस्मृतिशीलानां बहुवेदप्रपाठिनाम् ॥
चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितासु च ।
वेदाङ्गन्यायमीमांसाधर्मशास्त्राणि चाऽभ्यसेत् ॥ इति पठितम् ।

इत्यपवादाः ।

भिक्षाप्रकारमाह मनुः—

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥
भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदन्तिमः ॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥ इति ।

भिक्षा-प्रकारः ।

भवत्पूर्वमिति 'भवती भिक्षां ददातु । भिक्षां भवती ददातु । भिक्षां ददातु भवती' इति ।

व्यासः—ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम् ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ॥ इति ।

शूद्रादामं ग्राह्यं न तु पक्वम् ।

तस्मादामं ग्रहीतव्यं शूद्रादप्यङ्गिराब्रवीत् ।

इत्यङ्गिरःस्मृतेः ।

यस्तु वेदमधीयानः शूद्रान्नमुपजीवति ।
शूद्रो वेदफलं याति शूद्रत्वं सोऽधिगच्छति ॥

इति पराशरेण सिद्धान्नस्य निन्दितत्वाच्च एतच्चापद्विषयम् ।

चातुर्वर्ण्ये चरेद्भैक्षमलाभे कुरुनन्दन ।

इति भविष्यत्पुराणोक्तेः । मनुरपि—

सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे ।
नियम्य प्रयतो वाचमभिशस्तांश्च वर्जयेत् ॥ इति ।

अभिशस्तवर्जनेनैव पतितवर्जनं सुतरां सिद्धम् । विशेषमाह मनुः—

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।

यत्तु—मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं न निवारयेत् ॥ इति ।

तथा 'अप्रत्याख्यायिनमग्रे भिक्षेताऽप्रत्याख्यायिनीं वा' इति तदुपनयनाङ्गभिक्षापरमिति न विरोधः । एतच्च सायंप्रातः कार्यम्—' सायंप्रातरमत्रेण भिक्षां चरेत् ' इत्यापस्तम्बोक्तेः । अमत्रे विशेषमाह हारीतः—'लौहे मृन्मये वा पात्रे भुञ्जीत' इति । विशेषमाह मनुः—

भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेद्व्रती ॥ इति ।

यमः—आहारमात्रादधिकं न कचिद्भैक्षमाहरेत् ।
युज्यते स्तेयदोषेण कामतोऽधिकमाहरन् ॥ इति ।

कामत इत्युक्त्याऽज्ञानादधिकाहरणे न दोषः । अज्ञानादधिकाहरणे आपस्तम्बः—'न चोच्छिष्टं कुर्यादशक्तौ भूमौ निखनेदप्सु वा प्रवेशयेत्' इति।

गुरवे निवेद्यमित्याह मनुः—

गुरवे निवेदनम् ।

समाहृत्य तु तद्भैक्षं यावदर्थममायया ।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥ इति ।

अमायया गुरुर्ग्रहीष्यतीति भिया स्वादु न गोपनीयमित्यर्थः ।

याज्ञवल्क्यः—

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया ।
अपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥ इति ।

गुरोरसंनिधौ तत्पुत्रादिभ्योऽनुज्ञा ग्राह्या । ' असंनिधौ तद्भार्यापुत्रसब्रह्मचारिसद्भ्यः ' इति गौतमस्मरणात् । आपस्तम्बः—'भुक्त्वा स्वयममत्रं प्रक्षालयेत् ' इति । तच्च भोजनमपरिमितमित्याह वसिष्ठः—

अष्टौ ग्रासा मुनेर्भैक्षं वानप्रस्थस्य षोडश ।
द्वात्रिंशत्तु गृहस्थस्यापरिमितं ब्रह्मचारिणः ॥ इति ।

आपस्तम्बः—आहिताग्निरनड्वांश्च ब्रह्मचारीति ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥ इति ।

आहिताग्नेर्बर्हिःसमिदाहरणादेरवश्यकर्तव्यत्वाद्ब्रह्मचारिणश्च गुरुसेवाया अवश्यकर्तव्यत्वात्तद्विरोधिशरीरनैर्बल्यापादकं काम्यव्रतादि नानुष्ठानार्हमित्यर्थः । अनडुद्ग्रहणं दृष्टान्तार्थम् ।

इति भिक्षाटनम् ।

ब्रह्मचर्यावधिमाह याज्ञवल्क्यः—प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा। 'ग्रहणान्तिकमित्येके' इति।

यावद्ग्रहणं स्वाधीनोच्चारणक्षमत्वं तावद्वा।

यमः—वसेद्द्वादशवर्षाणि चतुर्विंशतिमेव वा।

षट्त्रिंशतं वा वर्षाणि प्रतिवेदं व्रतं चरेत्॥ इति।

यस्तु चतुरो वेदानध्येतुमिच्छति तस्याष्टाचत्वारिंशद्वर्षाणि। यथाहाऽऽपस्तम्बः—'उपेतस्याचार्यकुले ब्रह्मचारिवासोऽष्टाचत्वारिंशद्वत्सरान्' इति। अत्र च पक्षविकल्पे अध्ययनकाल एव 'वैकल्पिकानामादितोऽवधारणम्' इतिन्यायेनैकः पक्षः परिग्रहीतव्यः। तस्मिंश्च द्वादशवर्षपक्षादौ परिगृहीते मध्ये गृहीतेऽपि वेदे कालः पूरयितव्य इति मेधातिथिः।

इति ब्रह्मचर्यावधिः।

द्विविधो ब्रह्मचारी उपकुर्वाणिको नैष्ठिकश्च। तत्र नैष्ठिकस्य विशेष उक्तो याज्ञवल्क्येन—

ब्रह्मचारिणो द्वैविध्यम्।

नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा॥ इति।

वसिष्ठः—'संयतवाक्चतुर्थषष्ठाष्टमकालभोजी भैक्षाशी गुर्वधीनो जटिलः शिखाजटो वा गुरुमुपासीताहूताध्यायी सर्वं लब्धं निवेद्य तदनुज्ञया भुञ्जीत। खट्वाशयनदन्तप्रक्षालनाञ्जनाभ्यञ्जनवर्जी स्थानासनशीलस्त्रिरह्नोऽभ्युपेयादपः' इति। त्रिकालं स्नायादित्यर्थः। देवलेन तु सकृदवगाहनं सकृद्भोजनमुक्तं तदशक्तपरम्। केषांचिन्नैष्ठिकब्रह्मचर्यमेवेत्याह विष्णुः—

कुब्जवामनजात्यन्धक्लीबपङ्ग्वार्तरोगिणाम्।
व्रतचर्या भवेत्तेषां यावज्जीवमनंशतः॥ इति।

अत्रानंशत इति हेतुं वदता दृष्टमूलत्वमुक्तम्। अतः प्रतिग्रहादिना द्रव्यसद्भावे भवत्येव विवाहः। दृष्टं च धृतराष्ट्रे। संग्रहेऽपि—

पङ्ग्वादीनामनंशत्वादसामर्थ्याच्च शास्त्रतः।
नियतं नैष्ठिकत्वं स्यात्कर्मस्वनधिकारतः॥ इति।

न चैवं सर्वनैष्ठिकविधीनां कुब्जादिपरत्वेनोपसंहारादन्येषामनधिकार इति वाच्यम्।

यदि त्वात्यन्तिको वासो रोचेतास्य गुरोः कुले।
युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥

---

१ स्नानेति पाठान्तरम्।

इति मनुप्रतिपादितपाक्षिकत्वविरोधात् कुब्जादीनां नित्यप्राप्तेः ।
नच ब्रह्मचारिद्वैविध्याच्चत्वार आश्रमा इत्यापस्तम्बवचनविरोधः ।

द्वितीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थितः । ।

इति दक्षेणैकाश्रमलोक्तेः । अस्य फलमाह याज्ञवल्क्यः—

अनेन विधिना देहं साधयन् विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः ॥ इति ।

ब्रह्मचर्य-फलम् ।

इदं च फलं ब्रह्मविद्विषयमब्रह्मविदस्तु ब्रह्मलोकमात्रम् 'तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति ज्ञानस्यैव मोक्षसाधनत्वोक्तेरिति । इति नैष्ठिकब्रह्मचर्यविधिः ।

व्रतान्युक्तान्याश्वलायनस्मृतौ—

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम् ।
तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परम् ॥ इति ।

वेदव्रतानि ।

स्मृत्यादौ गोदानस्यैव केशान्त इति संज्ञा । तत्कालमाह मनुः—

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥ इति ।

द्व्यधिके चतुर्विंशे इत्यर्थः । एवं च व्रतानां वर्षत्रयव्यवधानेनानुष्ठेयत्वाद्ब्राह्मणस्य त्रयोदशवर्षादारभ्य व्रतानि भवन्ति । राजन्यस्योनविंशवर्षादारभ्य वैश्यस्यैकविंशादारभ्येति । एषु च व्रतेषु चौलवत्कालनिर्णयः । तदुक्तं श्रीधरीये—

तिथिनक्षत्रवारांशकर्मोदयनिरीक्षणम् ।
चौलवत्सर्वमाख्यातं सगोदानव्रतेषु च ॥ इति ।

तैत्तिरीयाणां नामभेदः—प्राजापत्यं सौम्यमाग्नेयं वैश्वदेवमिति । तेषु च व्रतेषु दण्डादीनाह पराशरः—

यद्यस्य विहितं कर्म यत्सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥ इति ।

स्वकाले व्रतलोपे प्रायश्चित्तमाहात्रिः—

पिता भ्राता परो वापि प्राजापत्यत्रयं चरेत् । इति ।

व्रतलोपप्रायश्चित्तम् ।

बटोरशक्तौ पित्रादीनामनुष्ठानम् । शक्तौ तु तेनैव कार्यम् ।
यथाह शौनकः—

प्रत्येकं कृच्छ्रमेकैकं चरित्वाऽऽज्याहुतीः शतम् ।
हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनकः ॥ इति ।

---

१ न कुब्जादीनां नित्यप्राप्तिरिति पाठान्तरम् ।

अत्र प्रायश्चित्ते स्नानसमानकर्तृकत्वश्रवणाद्बटोरेव कर्तृत्वम् । प्रायश्चित्तोत्तरकालमेतानि समावर्तनेन सह कर्तव्यानीति प्रयोगपारिजाते । तत्र मूलं मृग्यम् । इति व्रतलोपप्रायश्चित्तम् ।

अथाश्रमविकल्पसमुच्चयौ । समुच्चयस्तावदादित्यपुराणे—

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
अप्रमत्तेन मनसा मा गाः पुत्र कुवर्त्मना ॥ इति ।

मनुरपि—ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥ इति ।

गृहस्थप्रभवा गृहस्थोपजीविनः । अश्वस्तनव्रतादीनां गृहस्थानामपि गृहस्थोपजीवित्वाच्चतुर्णां ग्रहणम् । क्रमश इति प्रातिलोम्यं नाभीष्टम् । तथा च दक्षः—

त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात्पापकृत्तरः ॥

त्रयाणामिति ब्रह्मचर्योत्तरेषां ग्रहणम् । तस्यावश्यकत्वादित्यर्थः । मनुर्विशेषमाह—

चतुर्थमायुषो भागं वसित्वाद्यं गुरोः कुले ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
वनेषु च विहृत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥ इति ।

अत्र 'शतायुर्वै पुरुषः' इतिश्रुतेः पञ्चविंशतिवर्षपर्यन्तमेकैकस्मिन्नाश्रमेऽवस्थातव्यमिति निबन्धकृतः । एवं क्रमे स्थिते यदापस्तम्बेनोक्तम् 'चत्वार आश्रमा गार्हस्थ्यमाचार्यकुले वासो मौनं वानप्रस्थम्' इति तत्रोद्देशमात्रे तात्पर्यं न क्रमे । आश्रमसमुच्चयस्य फलमाह हारीतः—

अनेन विधिना यो हि आश्रमानुपसेवते ।
स सर्वलोकान्निर्जित्य ब्रह्मलोकाय कल्पते ॥ इति ।

विकल्प उक्तो जाबालश्रुतौ 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा' इति । भविष्यपुराणेऽपि—

गार्हस्थ्यमिच्छन् भूपाल कुर्याद्दारपरिग्रहम् ।

ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकम्।
वैखानसो वापि भवेत्परिव्राडथवेच्छया॥ इति।

वसिष्ठेन गार्हस्थ्यस्य स्तुतिरुक्ता—

गृहस्थ एव प्रव्रजेद्गृहस्थः स्तूयते यतः।
गार्हस्थ्यस्तुतिः। चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यते॥
सर्वेषामपि वै तेषां वेदस्मृतिविधानतः।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि॥ इति।

ततश्चैवमुक्तम्। प्रथमं ब्रह्मचर्यमावश्यकम्। ततो यदि तत्रैव रुचि-स्ततो ब्रह्मचर्येणैव यावज्जीवं तिष्ठेत्। यदि न रुचिस्ततो गृही वनी यती वा भवेदिति। ततो गार्हस्थ्येनैवायुः क्षपयेद्वनाश्रमेण वा यत्याश्रमेण। तत्राश्रमचतुष्टयं विप्रादिवर्णत्रयस्य 'त्रयाणा वर्णानां चत्वार आश्रमाः' इति कठसूत्रात्। एवम्—

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः।

इतिमनुवाक्ये ब्राह्मणग्रहणं द्विजोपलक्षणमिति धर्मप्रकाशे पि-तामहचरणाः। श्रुतिगतेषु सर्वेषु 'ब्राह्मणो निर्वेदमायात्' इत्या-दिसंन्यासविधिषु ब्राह्मणग्रहणात्तस्य च स्मृत्यनुरोधेनोपलक्षणत्वे प्रमाणाभावात्, प्रत्यक्षश्रुतिविरुद्धा काचित्स्मृतिरप्रमाणम् जाघनीभिः पत्नीः संयाजयन्तीतिवत्?। अथवा क्षत्रियादीनां संन्यासश्रवणं विद्वत्सं-न्यासपरमिति शंकराचार्यादीनामाशयः। इत्याश्रमविकल्पसमुच्चयौ।

समावर्त्तनम्।

स्नानमाह याज्ञवल्क्यः—

गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ इति।

वरं गुरुतोषकारिणीं दक्षिणाम्। संग्रहकारो विशेषमाह—

आहरिष्यामि किं तेऽर्थं भवतो वचनादिह।
त्वयोक्तं हि करिष्यामि कृतार्थः स्यां गृहेण तु॥ इति।
तेनोक्तं च तथा कृत्वा स्नानं शिष्यः समाचरेत्।
अलमर्थेन मे वत्स त्वद्गुणैरस्मि तोषित.॥
'गृहाय त्वानुजानामि'

इत्यनुज्ञापर्यन्तं कार्यम्। तथा चोक्तं कूर्मपुराणे—

वेदं वेदौ तथा वेदान्वेदान्वा चतुरो द्विजः।

अधीत्य चाधिगम्यार्थं ततः स्नायाद्द्विजोत्तमः ॥ इति

इदं च विस्तरतो भट्टपादैः 'अथातो धर्मजिज्ञासा' इत्यस्मिन्सूत्रे प्रपञ्चितमिति नेह प्रपञ्चितम्। दक्षिणा च गुरुतोषार्था न तु मूल्यरूपा। विद्याया मूल्याभावात्। तथाच तापिनी श्रुतिः—

सप्तद्वीपवती भूमिर्दक्षिणार्थं न कल्पते। इति।

छन्दोगश्रुतिरपि—'यद्यप्यस्मा इलामद्भिः परिगृहीतां धनेन पूर्णां दद्यादेतदेव ततो भूय इति'। एतद्विद्याग्रहणम्। हारीतोऽपि—

एकमप्यक्षरं यत्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वाऽप्यनृणो भवेत् ॥ इति।

यद्यप्येवं तथापि देयमाह मनुः—

स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत्।
क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम्।
धान्यं वासांसि शाकं वा गुरवे प्रीतिमावहन्। इति।

आश्वलायन उपकल्प्यद्रव्याण्याह—'अथैतान्युपकल्पयीत समावर्त्यमानो मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्याय च यद्युभयोर्न विन्देताऽऽचार्यायैव' इति। करञ्जफलं पेषयित्वा तेनोद्वर्तनमुन्मर्दनमिति वृत्तौ। इदं च स्वकर्तृकं 'समावर्त्यमानः' इतिसूत्रात्। एवं च तदङ्गभूतं नान्दीश्राद्धं स्वयमेव कार्यम्। शौनकः—

कुर्वीत स्वयमेवेदं कर्मोऽऽचार्यानपेक्षतः।
विधायाभ्युदयश्राद्धं पूर्वेद्युरपरेऽह्नि[1] वा ॥ इति।

अत्र हि क्त्वार्थल्यप्प्रयोगात्समानकर्तृकता गम्यते। अत्र कालनिर्णयश्चौलवत्। उक्तं च शौनकेन—

गोदानेनातिदिष्टत्वात्कर्मणोऽस्योत्तरायणम्।
पूर्वपक्षादियोगं च प्रतीक्ष्य ह्येतदाचरेत् ॥ इति।

स्नातकधर्मा उक्ताः कूर्मपुराणे—

यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्।
छत्रं चोष्णीषममलं पादुके चाप्युपानहौ ॥

धारयेदिति शेषः। आश्वलायनः—'तस्यैतानि व्रतानि भवन्ति न नक्तं

---

१ मपोऽह्नीति पाठः।

नायात्र नग्नः स्नायान्न नग्नः शयीत न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनाद्-
धेति न धावेन्न वृक्षमारोहेन्न कूपमवरोहेन्न बाहुभ्यां नदीं तरेन्न संशयम-
भ्यापद्येत' इति। याज्ञवल्क्यः—

न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः।
न विरुद्धप्रसङ्गेन संतोषी च भवेत्सदा॥

स्वाध्यायो वेदस्तद्विरुद्धं तन्नाशकारकमित्यर्थः। विरुद्धप्रसङ्गो शूद्रादिः।

तथा—राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा।
दम्भिहैतुकपाखण्डिबकवृत्तींश्च वर्जयेत्॥

आपदि गृह्णीयादित्यर्थः। दम्भी द्रव्यार्थं धर्मलिङ्गधारी न श्रद्धया। है-
तुकः सर्वत्र हेतुभिः संशयोत्पादकः। पाखण्डी अस्थिमालादिविरुद्धवेषधारी।
बकवृत्तिरधोदृष्टिर्नैष्कृतिकः स्वार्थसाधन तत्परः 'शठो मिथ्याविनीतश्च बक-
वृत्ति रुदाहृतः' इति मनूक्तेः।

शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः।
न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः॥
न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्।
नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी॥

वार्धुषी निषिद्धवृद्ध्युपजीवी।

दाक्षायणी ब्रह्मसूत्री वेणुमान्सकमण्डलुः।
कुर्यात्प्रदक्षिणं देवं मृद्गोविप्रवनस्पतीन्॥
न तु मेहेन्नदीछायावर्त्मगोष्ठाम्बुभस्मसु।
न प्रत्यग्न्यर्कगोसोमसंध्याम्बुस्त्रीद्विजन्मनः॥
नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्।
न च मूत्रं पुरीषं वा नाशुची राहुतारकाः॥
अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयन्।
वर्षत्यप्रावृतो गच्छेत्स्वपेत्प्रत्यक्शिरा न च॥

'अयं मे वज्रः पाप्मानमपहन्तु' इतिमन्त्रः। गच्छेन्न धावेत्।

ष्ठीवनाऽसृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्।
पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्॥

---

१ नाप्सु वेति पाठः।

जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत् ।
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् ॥ इति ।

जलमिति पेयमात्रोपलक्षणम् । 'नाञ्जलिना पिबेत्' इति गौतमेन पेयविशेषानुपादानादिति कश्चित्तन्न । सामान्यस्यापि गौतमीयस्य विशेषेण याज्ञवल्क्येनोपसंहर्तुं शक्यत्वात् । अतो जलमेव न पेयमात्रमिति । शयानं श्रेष्ठं न प्रबोधयेदिति ।

नैकः स्वप्याच्छून्यगृहे श्रेयांसं न प्रबोधयेत् । इतिमनूक्तेः ।
विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम् ।
केशभस्मतुषाङ्गारकपालेषु च संस्थितिम् ॥

विरुद्धं जनपदकुलविरुद्धम् । नदीतरणं बाहुभ्याम् । अत उडुपादिना पारगमने न दोषः । नदीमिति तडागाद्युपलक्षणमिति कश्चित् । तत्र प्रमाणं मृग्यम् । यदि परं मीमांसाभिज्ञः सन् 'उद्देश्यविशेषणमविवक्षितम्' इति नीत्या नदीग्रहणमविवक्षितमेवं जलग्रहणमिति यदि मन्यसे तर्हि श्रेयांसमितिविशेषणविवक्षाहेतौ किमिति मूकोऽसि । एवं 'न ब्राह्मणं हन्यात्' इत्यत्राप्यतिप्रसङ्गः ।

नाचक्षीत धयन्तीं गां नाऽद्वारेण विशेत्कचित् ।
न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः ॥

परस्य क्षीरादि धयन्तीं गां तस्मै नाचक्षीत । यद्वा वत्सं धापयन्तीम् । अन्तर्भावितण्यन्ताच्छतृप्रत्ययः । न विनिवर्तयेदपि ।

न वारयेद्गां धयन्तीं न चाचक्षीत कस्यचित् । इति मनूक्तेः ।
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ।
दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् ॥

सूनी हिंसाशीलः । चक्री तिलपीडकः । ध्वजी सुराचक्रेण जीवी ।

देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः ।
नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च ॥
विप्राहिक्षत्रियात्मानो नावज्ञेयाः कथंचन ।
आ मृत्योः श्रियमाकाङ्क्षेन्न कंचिन्मर्मणि स्पृशेत् ।
दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् ॥

पादाम्भः पादप्रक्षालनोदकम् ।

श्रुतिस्मृत्युदितं कर्म नित्यं सम्यक् समाचरेत् ।

गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्।
न निन्दाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत्॥

कथं तर्हि कवले गृहीते उच्छिष्टेन पुनः पात्रस्थं स्पृश्यते। भोजनार्थे पात्रस्थे न दोष इति शिष्टविगानाभावात्कल्प्यते।

कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्।
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु॥

अभ्यनुज्ञातमपि भोजनावशिष्टमांसभक्षणादिकं लोकविद्विष्टमत एवास्वर्ग्यं नाचरेत्। धर्मपदेनापिना योगात्र स्वार्थे तात्पर्यम्। केचित्त्विदानीतनानां मधुपर्के पशुवधानाचरणादीनामेतद्वचनमूलकत्वमिति वदन्ति तन्न, कलिनिषिद्धत्वेनैवानाचरणात् विधिविहितबाधकत्वायोगाच्च।

मातृपित्रतिथिभ्रातृजामिसंबन्धिमातुलैः।
वृद्धबालातुराचार्यवैद्यसंश्रितबान्धवैः॥
ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः।
विवादं वर्जयित्वा तु सर्वांल्लोकाञ्जयेद्गृही॥
पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि।
स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च॥

परवारि अनुत्सृष्टोदकम्।

परशय्यासनोद्यानगृहयानानि वर्जयेत्।
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि॥

अदत्तान्यननुज्ञातानीति ग्रन्थकृतः॥

कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम्।
वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम्॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्।
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्।
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम्॥
नृशंसराजरजककृतघ्नवधजीविनाम्।
चैलधावसुराजीवसहोपपतिवेश्मनाम्॥
पिशुनानृतिनोश्चैव तथा चाक्रिकबन्दिनाम्।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥

कदर्य,—आत्मानं धर्मकृत्यं च पुत्रान्दारांश्च पीडयेत्।

लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥

इति लक्षितः। वैणो वेणुच्छेदनजीवी। वीणावादनजीवीति केचित्। गणदीक्षी बहुयाजकः। पराशरस्मृतिव्याख्याने तु गणान्नं दीक्षी दीक्षितस्तस्य चेति व्याख्यातम्। गणान्नं च बहूनामेकपात्रे पक्वं तदुच्यते। दीक्षितान्ननिषेधश्चाग्नीषोमीयपशुसंस्थापर्यन्तं क्रीतराजको भोज्यान्न इत्यस्याप्रामाण्यादिति भाष्यकृतः। आचार्यास्तु वदन्ति। उभयोरपि श्रुतित्वाविशेषेणाबाधान्नाप्रामाण्यम्। तदुक्तम्—

क्रीतराजकभोज्यान्नवाक्यं चाथर्ववैदिकम्।
न च तस्याप्रमाणत्वे किंचिदप्यस्ति कारणम्॥ इति।

तथोभयोर्विषयोऽपि प्रदर्शितः—

आपद्धर्मा यथैवान्ये मुख्यासंभवहेतुकाः।
तथैव प्राणपीडायां क्रीतराजकभोजनम्॥
सामान्येनाभ्यनुज्ञाताद्विशेषश्च विशिष्यते।
विशेषोऽत्यन्तनिर्दोषः स्तोकदोषेतरन्निया॥ इति।

प्रपञ्चितं चैतद्वार्तिककारैरिति काठिन्यभिया नेह विस्तरेण प्रपञ्चितम्। अवीरा पतिपुत्ररहिता। कर्मारो लोहकारः। तन्तुवायः सूचिशिल्पोपजीवी। श्ववृत्तिः श्वभिः वृत्तं जीवनमस्यास्तीति श्ववृत्तिः। राजा पुरोहितश्च 'राजपुरोहितान्नानि वर्जयेत्' इतिशङ्खस्मृतेः। कदर्यादयश्च द्विजातय एव। शूद्राणां वक्ष्यमाणदासादिव्यतिरेकेणाभोज्यान्नत्वात्—

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ इति।

अर्धसीरी कृषिफलभागग्राही। अहं त्वदेकाश्रित इति यो निवेदनमात्मनः करोति। 'शूद्रादीनां भोज्यान्नत्वमापद्विषयम्' इति हरदत्तः। चतुर्विंशतिटीकायां तु—

कन्दुपक्वं शूल्यत्पक्वं पायसं दधिसक्तवः।
एतानि शूद्रान्नाद्याणि भोज्यानि मनुरब्रवीत्॥

इतिवचनोपात्तपरमिति। शूले यत्पक्वमस्पृष्टमित्यर्थः। परं तु कलावेतेषां भोज्यान्नत्वनिषेधान्नातीव परिच्छेदोऽस्माभिः क्रियते। कलिवर्ज्यानि च समयमयूखे दर्शयिष्यामः। माधवीये मार्कण्डेयः—

न म्लेच्छभाषां शिक्षेत न पश्येदात्मनः शकृत्।
वर्जयेन्मार्जनीरेणुं नापेयं च पिबेद्द्विजः॥ इति।

१ कलिवर्ज्यानि च तावचरणव्यूहसमयमयूखे ज्ञेयानि इ. पाठः।

अपेयं काञ्जिकादि। मनुः—

वयसः कर्मणोऽर्थस्य श्रुतस्याऽभिजनस्य च।
[वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह॥
नित्यं शास्त्राण्यवेक्षेत नियमांश्चैव वैदिकान्।
नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन॥]
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्।
न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति॥

वत्सतन्त्री वत्सबन्धनरज्जुः। वत्सग्रहणं च गोत्वजातेरुपलक्षणमिति हरदत्तः।

न चोदके निरीक्षेत स्वं रूपमिति धारणा।
नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत वाश्नतीम्॥
क्षुवन्तीं जृम्भमाणां वा न चासीनां यथासुखम्।
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम्॥
नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे॥
न फालकृष्टे न जले न चित्यां न च पर्वते।
नोदक्ययाऽभिभाषेत यज्ञं गच्छेन्न चावृतः॥

अवृतो यजमानेनानाकारितो लोभान्न गच्छेत्। द्रष्टुं तु कामं गच्छेत्। 'न यज्ञमवृतो गच्छेद्दर्शनाय तु कामम्' इति[1] गौतमोक्तेः।

स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्।
न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद् बुधः॥
न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्।

अनेन चोद्धृतस्नेहतक्रादिभोजनमनाचारः। यत्तु तक्रादिभिन्नपिण्याकादिपरत्वं कल्पयन्ति न तत्र किंचिन्मूलम्। सौहित्यमत्यशनम्।

न नृत्येदथवा गायेन्न वादित्राणि वादयेत्।
न पादौ धावयेत्कांस्ये कदाचिदपि भाजने॥
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते।
उपानहौ च वासश्च धृतमन्यैर्न धारयेत्॥
उपवीतमलंकारं स्रजं करकमेव च।
बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम्॥

---

[1] इत्यधिकं ङ. पुस्तके।

बालातपः शरत्कालातपः । सद्भवातप इत्यन्ये ।

न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम् ।
गवां पृष्ठेन यानं तु सर्वथैव विगर्हितम् ॥

रथादियोगे त्वापद्विगर्हितमिति ज्ञेयम् ।

रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ।
सर्वं च तिलसंबद्धं नाद्यादस्तमयं प्रति ॥
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ।
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविःकृतम् ॥

अयं च साक्षादुपदेशनिषेधः ।

श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः ।

इतिकरणे तु न दोषः । उच्छिष्टं भुक्तावशिष्टं न दद्यात् । शूद्रस्य गौतमेनोच्छिष्टाशनं शिल्पवृत्तिश्चेत्युच्छिष्टाशनस्याभ्यनुज्ञानान्न दोषः । एवं च यदि प्रत्यवायमङ्गीकृत्योच्छिष्टं ददाति तदा दातुस्तु भवत्येव । एवं च यदि प्रत्यवायमङ्गीकृत्योच्छिष्टं ददाति तदा दातुस्तु भवत्येव । यथा कुरुक्षेत्रादौ दातुरभ्युदयः प्रतिग्रहीतुर्दोष एवत्राम-तेन भक्षणीयम् । सांप्रदायिकास्तु उच्छिष्टदानप्रतिषेधो गृहस्थशूद्रविषयः । पीति केचित् । तद्भिन्नाय तु देयम् । तथाच व्याघ्रः—

उच्छिष्टमन्नं दातव्यं शूद्रायाऽगृहमेधिने ।
गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने ॥ इति ।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ।

धर्मं धर्मशास्त्रम् । पूर्वनिषेधस्तु दण्डनीतिविषय इति व्याख्यातारः ।

न संहताभ्यां पाणिभ्यां कण्डूयेतात्मनः शिरः ।
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः ॥

एतत् शिरः । इदं च शिरःस्नानं शक्तस्य ।

न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।

भोजनोत्तरं स्नानस्य निषेधो रागप्राप्तस्य ।

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ॥

शुष्कं फलशून्यम् । एवं विवादोऽपि ।

नाऽज्ञातेन समं गच्छेन्नैको न वृषलैः सह ।
अनातुरः खानि खानि न स्पृशेदनिमित्ततः ॥

खानि छिद्राणि ।

रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ।
प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ॥
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
यमान्सेवेत नियतं नित्यं च नियमान्बुधः ॥
आनृशंस्यं क्षमा सत्यमहिंसा दममस्पृहा ।
ध्यानं प्रसादो माधुर्यमार्जवं च यमा दश ॥
शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः ।
व्रतोपवासौ मौनं च स्नानं च नियमा दश ॥
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनस्तथा ।

अश्राद्धिनः श्रद्धारहितस्य ।

आददीताऽऽममेवास्मादवृत्तावेकरात्रकम् ।
उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह ॥
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ।
गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् ॥
सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ।
येनास्य पितरो याता येन याताः पितामहाः ॥
तेन यायात्सतां मार्गमेवं गच्छंस्तरिष्यति ।
एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पश्च सत्यवृत्तिकरः शुभः ॥ इति ।

अत्र 'स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत्' इत्युपक्रमात्, 'स्नातकव्रतकल्पश्च सत्यवृत्तिकरः शुभः' इत्युपसंहाराच्च मध्येश्रुतानां नञा-मुपपदेनान्वयात्पर्युदासा अङ्गीक्रियन्ते । तदुक्तं भगवता जैमिनिना—'तदु-त्सर्गे कर्माणि पुरुषार्थाय' इति ।

तथा—उपक्रमे श्रुतं कर्मवाचि व्रतपदं यतः ।
तदन्वयबलात्कर्मविशेषोऽतोऽत्र चोद्यते ॥
तेन लक्षणयाप्यत्र पर्युदासः स च क्रतोः ।
बहिःश्रुतः फलाकाङ्क्षी पुरुषार्थत्वमृच्छति ॥ इति ।

संकल्प एव चात्र लक्ष्यते । उदाहृता च तन्त्ररत्ने स्मृतिः—
त्रिसन्ध्यं जप्त्वा तेन सावित्रीं नेक्ष इत्ययम् ।

---

१ 'द्विजः' इति पाठः । २ 'येन गच्छन्नरिष्यते' इति मुद्रितमनुस्मृतौ पाठः ।

आदित्यं ध्यायता कार्यः संकल्पः पापनाशनः ॥ इति ।

विस्तरस्तु तन्त्ररत्नादौ द्रष्टव्यो दुर्गमत्वभिया नेह प्रपञ्चितः । अन्ये च स्नातकधर्मा मानवगौतमीयादिशास्त्रे द्रष्टव्याः । विस्तरभयात्तु नेह प्रपञ्चिताः ।

इति स्नातकधर्मप्रकरणम् ।

स्नातकभेदा उक्ता गोभिलेन—

'विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च' इति । विद्यामेवाधीत्य स्नानं कृतवानिति विद्यास्नातकः । व्रतान्येव कृत्वा स्नानं कृतवानिति व्रतस्नातकः । विद्यामधीत्य व्रतानि कृत्वा च यः स्नाति स उभयस्नातकः । तेषामन्त्यः श्रेष्ठः । उभौ तुल्यौ ।

स्नातकभेदाः ।

इति स्नातकभेदाः ।

विवाहप्रकरणम् ।

उपकुर्वाणकस्य गार्हस्थ्यं कर्तुं विवाह उक्तो याज्ञवल्क्येन—

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥ इति ।

कन्यालक्षणानि ।

अस्यार्थः । लक्षण्यां बाह्याभ्यन्तरलक्षणैर्युक्ताम् । बाह्यानि मनुनोक्तानि—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ॥ इति ।

वर्ज्या आह स एव—

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकाम् ॥ इति ।

वर्ज्यकन्याः ।

विष्णुपुराणे—

न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ।
न घर्घरस्वरां क्षामां तथा काकस्वरां न च ।
नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद् बुधः ॥

अनिबद्धेक्षणां मनोनुरञ्जनेक्षणरहिताम् ।

१ नच भंडारकरे मुद्रितमनुस्मृतिपुस्तके पाठः ।

यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ।
गण्डयोः कूपकौ यस्या हसन्त्यास्तां च नोद्वहेत् ॥
नातिरक्तच्छविं पाण्डुकरञ्जामरुणेक्षणाम् ।
आपीनहस्तपादां च न कन्यामुद्वहेद् बुधः ॥
न वामनीं नातिदीर्घां नोद्वहेत्संगतभ्रुवम् ।
नचातिच्छिद्रदशनां न करालमुखीं नरः ॥ इति ।

आभ्यन्तराण्युक्तान्याश्वलायनेन—'अष्टौ पिण्डान्कृत्वा ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्टितम् । यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतःसस्याद्गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्या-द्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसंपन्ना देव-नात्कितवी चतुष्पथाद्द्विप्रव्राजिनीरिणादधन्या श्मशानात्पतिघ्नी' इति । देवनं द्यूतम् । ईरिणमूषरम् । न अन्यः पूर्वो यस्याः साऽनन्यपूर्विका । दानेनोपभोगेन वा । कान्तां मनोनयनानन्दकारिणीम् । यथोक्तमापस्त-म्बेन—'यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिः' इति । इयं च परीक्षा कुलपरीक्षोत्तरं कार्या 'कुलमग्रे परीक्षेत' इत्याश्वलायनस्मृतेः ।

मनुः—उत्तमैरुत्तमो नित्यं संबन्धानाचरेत्सदा । इति ।

उत्तमानाह स एव—

विशुद्धाः कर्मभिश्चैव तथा श्रुतिनिदर्शितैः[1] ।
अविप्लुतब्रह्मचर्या महाकुलसमन्विताः ।
अक्रोधनाः सुप्रसादाः कार्याः संबन्धिनः सदा ॥

उत्तमा वंशाः ।

नीचानाह स एव—

ये स्तेनाः पिशुनाः क्लीबा ये च नास्तिकवृत्तयः ।
विकर्मणा च जीवन्तो विकृताकृतयस्तथा ॥
प्रवृद्धवैराः शूद्रैर्ये राजकिल्बिषिणस्तथा ।
ब्रह्मस्वादननिन्द्याश्च कदर्याश्च विगर्हिताः ॥
अप्रजा येषु वंशेषु स्त्रीप्रजाप्रसवास्तथा ।
पतिघ्न्यश्च सुवासिन्यस्तांश्च यत्नेन वर्जयेत् ॥ तान् वंशान् ।
महान्त्यपि समृद्धानि गोजाविधनधान्यतः ।

अधमा वंशाः ।

---

१ श्रुतिस्मृतिनिदर्शितैः ज० पाठः ।

स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत् ॥
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥

तथा—कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥
शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणा ।
कुलान्यकुलतां यान्ति यानि हीनानि मन्त्रतः ॥ इति ।

विष्णुः—अश्वं पित्रा परीक्षेत मात्रा कन्या परीक्षयेत् ।
कृष्या भूमिं परीक्षेत आचारेण कुलं तथा ॥ इति ।

नारदेन कन्यालक्षणान्युक्तानि—

नारदोक्तकन्यालक्षणानि ।

पूर्णचन्द्रमुखी कन्या बालसूर्यसमप्रभा ।
विशालनेत्रा रक्तोष्ठी सा कन्या लभते सुखम् ॥
अङ्कुशं कुण्डलं चक्रं यस्याः पाणितले भवेत् ।
पुत्रं प्रसूते सा नारी नरेन्द्रं लभते सुतम् ॥
यस्याः पाणितले रेखा प्राकारं तोरणं तथा ।
अपि दासकुले जाता राजपत्नी भविष्यति ॥
यस्याः संकुचिताः केशा मुखं च परिमण्डलम् ।
नाभिश्च दक्षिणावर्ता सा नारी प्रियभाग्भवेत् ॥
दीर्घाङ्गुली च या नारी दीर्घकेशा च या भवेत् ।
दीर्घमायुरवाप्नोति धनधान्यविवर्धिनी ॥ इति ।

अन्यान्यपि सामुद्रिकलक्षणानि तद्ग्रन्थतोऽवगन्तव्यानि । विस्तरभयान्नेह लिख्यन्ते ।

असपिण्डामिति । अत्र केचित्—

सापिण्ड्यम् ।

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥

इति मात्स्यात्सप्तपुरुषपर्यवसायिनी सपिण्डता । तथा च देवदत्तस्य पित्रादिभिः षड्भिः सापिण्ड्यं पुत्रादिभिश्च षड्भिरिति । साप्तपौरुषमिति सप्तपुरुषानभिव्याप्येत्यर्थं इत्याहुः । नन्वेवं भगिन्यादिभिः सापिण्ड्यं न

यात् । अत्र समादधिरे माधवाचार्याः—'उद्देश्यदेवतात्वेन सापिण्ड्यनि-
र्वाहः' इति । तथाच देवदत्तकर्तृके श्राद्धे भगिन्यादीनामप्युद्देश्यत्वाच्चास्त्ये-
व सापिण्ड्यम् । तथा सति महालयादिश्राद्धे गुरुशिष्यादीनामपि सापिण्ड्यं
स्यात् । अतो निर्वाप्यपिण्डान्वयपक्षं विहाय अवयवानुवृत्तिपक्षमङ्गीचक्रु-
र्विज्ञानेश्वरादयः । तथाहि समानः पिण्डो देहो देहावयवा यस्याः सा स-
पिण्डा न सपिण्डा असपिण्डेति । तथाहि पितुरवयवानां रक्तमज्जादीनां
पुत्रशरीरे साक्षात्प्रवेशः । पितामहस्य पितृद्वारा । एवं प्रपितामहादीनामपि
यथाकथंचित्परंपरयाऽवयवानुवृत्तिरस्त्येवेति । एवं मात्रादिभिरपि । एवं
पत्या पत्न्या एकशरीरारम्भकत्वेन । क्वचिच्चैकावयवाधारत्वेनापि सापि-
ण्ड्यम् । यथा यात्रोर्भर्तृद्वारा श्वशुरावयवाधारत्वम् । एवं यथाकथंचित्सा-
पिण्ड्यमन्यत्राप्यूह्यम् । यद्वा यत्राभियुक्तानां सपिण्ड इति प्रसिद्धिस्तत्र
सापिण्ड्यमिति । अत्र यद्यप्यसपिण्डामिति नञ्समासेन पर्युदासस्तथा
प्ययं निषेधफलकः सपिण्डापरिणयने प्रायश्चित्ताम्नानात् ।
एवमेकशरीरावयवान्वयरूपे सापिण्ड्ये विधातृशरीरेणापि परंपरया
सापिण्ड्यापत्तिरतः संकोच उक्तो याज्ञवल्क्येन—

'पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा' इति ।

मातृतः पञ्चमात् पितृतः सप्तमादिति तथाच पङ्कजशब्दवत्सपिण्डशब्दो
योगरूढः । एतन्निष्कर्षश्चाभियुक्तैः कृतः—

वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः ।
पञ्चमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्तते ॥ इति ।

कूटस्थो मूलपुरुषः । यतः संतानभेदस्ततो गणयेत् । नारदोऽपि—

मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमात्तथा ।
गृहस्थ उद्वहेत्कन्यामन्यथा गुरुतल्पगः ॥ इति ।

पैठीनसिरपि—'पञ्चमी मातृतः परिहरेत्सप्तमीं पितृतः' इति ।
अत्र वधूवरयोः पितृद्वारकसापिण्ड्यविचारवेलायां मूलपुरुषगणने पञ्च-
म्या मातुः संताने निवृत्तमपि सापिण्ड्यं मण्डूकप्लुत्या तस्याः पुत्रसंताने-
ऽनुवर्तत एव । वधूवरयोः पितुः पञ्चत्वादिति सांप्रदायिकाः ।
यत्तु विष्णुपुराणे—

पञ्चमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिना नृप ॥

---

१ महादिश्वपीति च. पाठः ।

यच्च वासिष्ठे—

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा । इति ।

तदुभयमप्यतीत्येति व्याख्येयं पूर्वोक्तवचनविरोधात् ।

सप्तमे पञ्चमे चैव येषां वैवाहिकी क्रिया ।
क्रियापरा अपि हि ते पतिताः शूद्रतां गताः ॥

इति मरीचिना दोषोक्तेश्च ।

यत्तु षट्त्रिंशन्मते—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ॥ इति ।

यदपि पैठीनसिस्मृतौ—'त्रीनतीत्य मातृतः पञ्चातीत्य पितृतः' इति तदर्वाग्दोषातिशयार्थम् । अन्यथा 'पञ्चमात्सप्तमादूर्ध्वम्' इत्यनेन पञ्चमसप्तादौ क्रियमाणो विवाहोऽनिष्टसाधनं षट्त्रिंशन्मतादिभिस्त्विष्टसाधनमिति विरुद्धबोधद्वयस्याशक्यत्वात् । दोषातिशयार्थत्वं कथमिति चेदुच्यते । पञ्चमात्सप्तमादूर्ध्वमित्यनेन पूर्वं बोधितो दोषः क्वचिदल्पः क्वचिद्भूयानिति बोधयितुं शक्यत्वात् । तस्य च प्रयोजनं प्रायश्चित्ताल्पत्वबहुत्वादि । नहि सापिण्ड्याविशेषे भगिनीगमने यावानेव दोषस्तावानेव पञ्चम्यामिति वक्तुं शक्यम् । अतः पूर्वोक्तमेव ज्याय इति । षट्त्रिंशन्मतादिवाक्यान्यापद्विषयाणि । अनुज्ञातं च निषिद्धमप्यापदि चातुर्वर्ण्यभैक्ष्यादि ।

दोषाभावोऽप्युक्तस्तत्र निबन्धकृद्भिरिति चेन्न । तत्रापि—

आपत्कल्पं द्विजः कृत्वा प्रायश्चित्तं पुनश्चरेत् ।

इतिवचनेन दोषस्योक्तत्वात् । स्तोकदोषाच्च दोषाभाववचनम् । यद्येवमङ्गीकृत्य तृतीयापरिणयनमिष्टं तदा क्रियतां नाम न तु सर्वथा दोषाभावः ।

विशेषान्तरं गृह्यपरिशिष्टे—'अविरुद्धसंबन्धामुपयच्छेत' इत्युक्त्वा 'दम्पत्योर्मिथः पितृमातृसाम्ये विरुद्धसंबन्धः यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा च' इत्युक्तम् । अत्र गृह्यपरिशिष्ट एव विरुद्धसंबन्धस्योक्तत्वान्नाधिककल्पनायां मानमस्तीति भार्यास्वसृकन्या पितृव्यपत्नीस्वसा चापरिणेयेति ।

अत्र विन्ध्यदक्षिणवासिनः केचित्—

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥

इत्यादिबहुस्मृतिनिषिद्धमपि मातुलकन्यापरिणयनमाचरन्ति। स च दुराचार इति भट्टपादादयः। भट्टसोमेश्वरस्मृतिचन्द्रिकाकारमाधवादयस्तु दुराचारत्वं नास्तीत्याहुः। बलाबलाधिकरणे 'श्रुत्या लिङ्गं बाध्यते' इत्युक्त्वा—"कश्चिच्छ्रौतेन लिङ्गेन विरोधाधिकरणरीत्या संभवदन्यमूलायाः स्मृतेर्बाधः। यथा 'गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः' इति दाशतय्यां श्रुतम्। तस्यार्थः—यमी यमं स्वभ्रातरं मिथुनार्थं प्रोवाच। सा च यमेन भ्रात्रेदमयुक्तमिति प्रत्याख्याता वदति। कः प्रजापतिर्विश्वरूपो विश्वात्मा त्वष्टा सविता नौ आवयोर्भ्रातृभगिन्योर्गर्भे दम्पती जनिता जनयिष्यति। आवयोरपत्ययोरवश्यं दंपतीत्वं भावि तद्वरमावामेव दम्पती भवाव इति लिङ्गमनन्यगति। तथा "आयाहीन्द्र पथिभीरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व। तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव"। अस्यार्थः। हे इन्द्र त्वमीडितेभिः प्रशस्तैः पथिभिः मार्गैर्नोऽस्माकं यज्ञमायाह्यागच्छ आगत्य तृप्तामाज्यसिक्तां वपां भागधेयं वपारूपं भागं जुषस्व सेवस्व। तत्र वपाभागत्वे दृष्टान्तद्वयम्। यथा मातुलस्य जहुरपत्यरूपा योषा स्त्री कन्येत्यर्थः। सा मातुलशब्दस्य संबन्धिशब्दत्वाद्भागिनेयोपस्थितेस्तस्य भागः भजनीया सेव्येत्यर्थः। यथा पैतृष्वसेयी मातुलपुत्रस्य भाग इति च लिङ्गम्। स्मृतिचन्द्रिकायां व्याख्याने कश्चिद्विशेषः। आगत्य भागं सेवस्व। एते यजमानास्त्वामुद्दिश्य वपां जहुस्त्यक्तवन्तः योषा दुहिता। अन्यत्पूर्ववत्। तथा वाजसनेयिश्रुतौ स्रुग्व्यूहनार्थवादे 'तृतीये संगच्छामहै चतुर्थे संगच्छामहै' इत्यपि लिङ्गम्। नचास्यार्थवादत्वात्स्वार्थापरत्वमिति वाच्यम्। अप्राप्तार्थस्य 'उपरि हि देवेभ्यो धारयति' इत्यादिवद्विधिपरत्वात्। एवं स्थिते मातुलकन्यापरिणयने प्रायश्चित्तादिस्मरणं तदासुरादिविवाहोत्पन्नाविषयं द्रष्टव्यम्। किं तत्र प्रमाणमिति चेदुच्यते—

> गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।
> गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥

इति मनुवचनेनोद्देश्यविशेषणस्य पुंस्त्वस्याविवक्षितत्वेन दानकर्मीभूतस्य जनककुले संबन्धमात्रनिवृत्त्या सापिण्ड्यस्यापि निवृत्तिः प्रतीयते। अतः कन्याया अपि ब्राह्मादिविवाहचतुष्टये दानसद्भावात्तत्र च सापिण्ड्यस्यापि निवृत्तेस्तत्परं मातुलकन्यापरिणयनम्। आसुरादिविवाहेषु दा-

नाभावात्सापिण्ड्यानिवृत्तेस्तत्परो निषेध इति । कथमिदानीं मातुलकन्या-वत्पैतृष्वस्रेयी दौहित्री वा न परिणीयते ।

अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ।

इतिनिषेधादतो न दुराचारत्वमिति । अत्रोच्यते । 'गर्भे नु नौ' इत्य-स्यामृचि पूर्वेषामाचरितं स्मृत्यनुमेयश्रुतिविरोधान्न तादृशविधिकल्पकम् । यत्र हि नान्यविरोधोऽप्राप्तार्थकत्वं च तत्रैव विधिनिषेधकल्पनम् । यथा 'उल्मुकैर्ह स्म पूर्वे समाजग्मुः' इत्यादिषु । अन्यथा 'प्रजापतिरुपसमभ्यैत्स्वां दुहितरम्' इत्याद्यर्थवाददर्शनादन्यैरपि दुहितृगमनं कर्तव्यमिति कल्पनं त्वदुक्तरीत्या केन निवार्येत । मन्त्रार्थवादेषु च बहवोऽर्थाः । केचन सिद्धार्थानुवादका यथा 'अग्निर्हिमस्य भेषजं', 'वायुर्वै क्षेपिष्ठा देवता' इति । केचन रागप्राप्तानुवादकाः । यथा 'तस्माद्वत्सो मातरं स्वसारं चाधिरो-हति' यथाच 'तस्माच्छ्वश्रूः श्वशुरश्च पुत्रश्च दुहिता च सुरां पीत्वा विलप-पन्त आसते' इत्यादि । केचन प्रायोदृष्टानुवादकाः । यथा 'तस्मात्प्रजा दश मासान्गर्भे धृत्वा एकादशमनु प्रजायन्ते' इत्यादयः । नैतावता-विध्यादिकल्पनम् । अत एव स्वार्थे तात्पर्याभावान्न विधिपरत्वमङ्गी-कृतम् 'सोऽरोदीत्' इत्येवमादीनां मीमांसकैः । एवमत्रापि 'गर्भे नु नौ' इत्यस्यां पूर्वाचरितमात्रं कीर्त्यते"—इत्यादि शास्त्रदीपिकाप्रकाशे पितामहचरणैर्विस्तरेणोक्तमेव । वस्तुतस्तु नौ आवां जनिता जनयिता गर्भे नु गर्भे एव कः कृतवानिति माधवाचार्यव्याख्यानमेव युक्तम् । करित्यस्यानुदात्तत्वेन पाठाद्रेफान्तत्वदर्शनाच । जनितेत्यस्यान्तोदात्तत्वेन पाठात्तृजन्तमेव न तु लुडन्तम् 'तिङ्ङतिङः' इत्यनुदात्तत्वापत्तेः । तेन जनितेत्यस्य जनयिष्यतीतिव्याख्यानमयुक्तम् । अत एव "न वा उ ते तन्वा तन्वा१ं संपपृच्यां पापमाहुर्यः स्वसारं निगच्छात् । अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत्" इति यमोक्तमप्रत्याख्यानं संगच्छते । अस्यार्थः—हे सुभगे ते तव तन्वा शरीरेण तन्वां स्वीयां तनूं न वा उ नैव संपपृच्याम् । संपर्कयिष्यामीति । तत्र हेतुः । यः स्वसारं निगच्छात् यः स्वसारं गच्छ-ति तं लोका देवाश्च पापिष्ठमाहुः तर्हि मत्संतोषः कथं स्यात्तत्राह मत् मत्तः जायमानाः प्रमुदः त्वमन्येन पुंसा कल्पयस्व अर्जयस्व ते भ्राता यमः एतत्कर्म न वष्टि न काङ्क्षतीति दिक् । 'आयाहीन्द्र' इत्यस्यां च रागप्राप्तस्यानुवादः । कथमनियतप्राप्तस्य नित्यवदनुवाद इति चेत् 'तस्मा-

त्मजा' इत्यस्य वा क नित्यप्राप्तिः । तत्र यथैवानियतप्राप्तिमुपजीव्या-नुवादोपपत्तिरेवमत्रापि ।

यत्तु दानेन सापिण्ड्यं निवर्तत इति । तत्रोच्यते—

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ॥

इति पुंस्त्वविशिष्टानुवादेन संज्ञाकरणात्कन्यायाश्च दत्रिमसंज्ञाभावादत्रि-मानुवादेन विधीयमानाऽपि सापिण्ड्यनिवृत्तिर्न कन्याया भवति ।

नन्वेवं दत्रिमस्य सापिण्ड्यनिवृत्तौ जनककन्यादिपरिणयनं स्यात् । स्यादेव यदि 'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो मातृबन्धुभ्यः पञ्चमाद्बीजिनश्च सप्तमात्' इति वाक्यं नाभविष्यत् । अत्र हि बीजिग्रहणेन दत्रिमस्य जनक-कुले सापिण्ड्यमस्तीति ज्ञायते । गोत्रनिवृत्तिस्तु ।

स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इत्यनेन वचनेन न त्वनेन । अतो मातुलकन्यापरिणयनं दुराचारः । अत एव भट्टपादैरुक्तम्—

वासुदेवाङ्गजाता च कौन्तेयस्य विरुध्यते । इति ।

बौधायनेन च दुराचारान्परिगणयता स्पष्टमेवोक्तम्—'पञ्चधा विप्रतिप-त्तिर्दक्षिणतस्तथोत्तरतो यानि दक्षिणतस्तान्यनुव्याख्यास्यामो तथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमन-मिति । अथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं समुद्रयानमिति । तत्रेतरदितरस्मिन् कुर्वन् दुष्यति तद्देशप्रामाण्यान्मि-थ्यैतदिति गौतमः उभयमेव नाद्रियेत शिष्टस्मृतिविरोधदर्शनात्' इति मन्येन । सीधु मद्यम् । उभयतो दन्ता येषां ते उभयतोदतः । तैरुभयतो-दद्भिः । व्यवहारस्तत्करणकक्रयविक्रयरूपः यानादिरूपो वा । आयुधीयकम् आयुधेन जीवनम् । बृहस्पतिरपि—

उद्वह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ॥
उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वलाः ।
सजातास्थापि गृह्णन्ति भ्रातृभार्याममर्तृकाम् ।
सर्वदेशेष्वनाचारो ख्याताम्बूलचर्वणम् ॥ इति ।

विशेषः स्मृत्यन्तरे—

गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्विजः ।
गुरोश्च कन्यां शिष्यो वा तत्संतत्याऽपि नेष्यते ।
पुरुषत्रयपर्यन्तं भ्रात्रादेर्नैतदिष्यते ॥ इति ।

सपत्नमातामहकुले सापिण्ड्यमाह सुमन्तुः—'पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयान्यन्यथा संकरकारिणः स्युः' इति । द्वितीयतच्छब्देन मातृपरामर्शः । अत्र 'यावद्वचनं वाचनिकम्' इति न्यायात्परिगणितेष्वेव सापिण्ड्यं न सप्तमादिपर्यन्तम् । एतत्सापिण्ड्यविषयमेव—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

इति मनुवाक्यमिति निबन्धकृतः । एतदुपपत्तिश्च द्वैतनिर्णये उक्ता । अत्रासपिण्डामिति निषेधः सार्ववर्णिकः । असमानार्षगोत्रजामिति त्रयाणाम् । तत्र क्षत्रियवैश्ययोः पुरोहितगोत्रं न स्वत इति । यवीयसीमिति वयसा परिमाणेन च न्यूनाम् । वयोन्यूनतायां विशेषमाह मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥ इति ।

त्र्यष्टवर्षश्चतुर्विंशतिवर्षः । बृहस्पतिर्विशेषमाह—

त्रिंशद्वर्षो दशाब्दां तु भार्यां विन्देत नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ इति ।

भ्रातृमतीमिति पुत्रिकाकरणशङ्कानिवृत्तये । तथाच मनुः—

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वै पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥ इति ।

अनेन पितुरभिप्रायमात्रेणापरिभाषिताऽपि पुत्रिका भवतीति गम्यते । अत एव गौतमः—'अभिसंधिमात्रा पुत्रिकेत्येकेषां तत्संशयान्नोपयच्छेदभ्रातृकाम्' इति । पुत्रिकाकरणप्रकारादिकं [1]व्यवहारमयूखे दर्शयिष्यामः ।

असमानार्षगोत्रजामिति । आर्षं च गोत्रं चार्षगोत्रे समाने च ते आर्षगोत्रे च समानार्षगोत्रे समानार्षगोत्रयोर्जाता समानार्षगोत्रजा न तादृशी असमानार्षगोत्रजा । अत्र च प्रत्येकं प्रतिषेधः । समानार्षी नोद्वाह्या

---

१ दायविभागे पुत्रनिरूपणे स्पष्टेति क.; व्यवहारमयूखे वक्ष्यमिति च. पाठः ।

सगोत्रा च नोद्वाह्येति प्रत्येकं प्रायश्चित्ताम्नानात् । तच्च प्रायश्चित्तमयूखे वक्ष्यते । आर्षः प्रवरः गोत्रप्रवर्तकस्य ऋषेर्व्यावर्तको मुनिविशेषः । वत्सार्ष्टिषेणयोः गोत्रभेदे प्रवरैक्यात्, द्व्यामुष्यायणानां संकृतीनां प्रवरभेदेऽपि सगोत्रत्वादुभयोपादानम् । मातामहगोत्राऽप्यपरिणेया । तथा च मनुः—

> मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
> समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥ इति ।

अत्र सगोत्रा नोद्वाह्येत्यनेनैव मातृगोत्रपर्युदासे सिद्धे मातृगोत्रग्रहणं मातुर्विवाहात्पूर्वगोत्रनिवृत्त्यर्थम् । तथा च मातामहगोत्रा नोद्वाह्येति फलितम् । तच्च माध्यन्दिनीयानाम् । तथा च चतुर्विंशतिमतटीकायां सत्याषाढवचनम् 'मातृगोत्रं माध्यन्दिनीयानाम्' इति ।

अथ गोत्रप्रवरनिर्णयः । तत्र स्मृत्यर्थसारे गोत्रलक्षणमुक्तम् ।

गोत्रप्रवर-निर्णयः ।

> जमदग्निर्भरद्वाजविश्वामित्रात्रिगौतमाः ।
> वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ।

कानि तानि गोत्राणि यत्प्रवर्तकास्तेषामित्यत आह—

> एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते ॥ इति ।

अपत्यानीति न साक्षात् किंतु पुत्रपौत्रादिपरंपरया । तथा बौधायनोऽप्याह—'एतेषामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते' इति । एवमुच्यमाने भृग्वादीनां गोत्रत्वं न स्यात् । तत्र केचिदिष्टापत्त्या परिहरन्ति । अपरे भृग्वादिष्वनादिशिष्टानां गोत्रत्वसमाख्यानात्प्रवरमञ्जरीप्रयोगपारिजातमदनपारिजातादिग्रन्थविरोधाच्च न गोत्रत्वमपलपितुं शक्यम् । किंतु यत्र शिष्टानां गोत्रत्वप्रसिद्धिस्तद्गोत्रं मन्त्रत्वादिवदित्याहुः । वस्तुतस्त्वेतस्य पक्षस्य सूत्रानारूढत्वात्प्रवरवत्त्वं गोत्रलक्षणं युक्तमुत्पश्यामः । तथा च सत्याषाढसूत्रे प्रवरानुक्त्वा तैर्गोत्राणि इत्युक्तम् । व्याख्यातं च शबरस्वामिभिः 'प्रवरैर्गोत्राणां गणव्यवस्था समानता च' इति । एवं च स्वरूपतः समानतया च गोत्रज्ञाने प्रवराणां हेतुत्वमुक्तम् । तथा च तेद्गोत्रमित्युक्तं भवति । ततश्च यमेवैकमविकृत्य प्रवराम्नानं सोऽधिकृतो गोत्रम् । तस्य चैकस्याधिकृतस्य येषु स्वस्वगणान्तर्गतेष्वनुवृत्त्याख्यं साम्यं भवति ते सगोत्रा इति फलितमिति पितामहचरणोक्तपक्ष एव श्रेयान् । एवं च

---

१ यत्रशिष्टानामिति च. पाठः । २ प्रवरवत्त्वमेव गोत्रमिति पाठान्तरम् ।

शिष्टाचारोऽप्यनुगृहीतो भवति बहुग्रन्थविरोधश्च परिहृतो भवति । यत्तु बौधायनसत्याषाढादिभिरगस्त्याष्टमानामपत्यं गोत्रमित्युक्तम्, न तल्लक्षणाभिप्रायेण किंत्वयोगव्यावृत्त्येति ज्ञेयम् । नचैवं वत्सविदयोरार्ष्टिषेणादिभिः सगोत्रतापत्तिरिति वाच्यम् ।

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात् ॥

इति बौधायनेन पर्युदासात् । अनेन च पर्युदासेन ज्ञायते भृग्वङ्गिरोगणेष्वस्ति गोत्रत्वमिति । यत्तु प्रवरमञ्जरीकृता क्वचिन्नास्त्येवैषां गोत्रत्वमित्युक्तं तत्पूर्वापरग्रन्थविरोधात्परमताभिप्रायेण । यत्तु विश्वनाथदेवेनोक्तम्—

भृग्वङ्गिरोन्यद्यत्किंचिदृषेर्यावत्सु वर्तनम् ।
तावत्समानगोत्रत्वमिति केचित्समूचिरे ॥
तत्रैवं सति सर्वत्र सगोत्रत्वनिबन्धने ।
अनुद्वाहे तु कुत्र स्यात्प्रवरैक्यं प्रयोजकम् ॥ इति ।

तदस्माभिः पूर्वमसंकीर्णोदाहरणोपन्यासादपास्तम् । तस्मादस्ति हरितादीनामपि गोत्रत्वम् । यद्यपि गोत्राणामानन्त्यं तथापि याननधिकृत्य प्रवरा आम्नातास्तादृशगणा एकोनपञ्चाशत् । उक्तं च बौधायनेन—

गोत्राणां च सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥ इति ।

ते च गणा यथा—भृगूणां सप्त ७, जमदग्नेस्तदन्तर्भावः । विश्वामित्राणां दश १०, अत्रेश्चत्वारः ४, अङ्गिरसां सप्तदश १७, अत्रैव गौतमभरद्वाजयोरन्तर्भावः । कश्यपानां त्रयः ३, वसिष्ठानां चत्वारः ४, अगस्तेश्चत्वारः ४. तथा च संग्रहे उक्तम्—

सप्तेह भृगवः सप्तदशाङ्गिरस एव च ।
ततोऽत्रयश्च चत्वारो बोद्धव्याः कश्यपास्त्रयः ॥
चत्वारोऽत्र वसिष्ठाः स्युर्विश्वामित्रास्ततो दश ।
अगस्त्यस्तु चत्वार इति संग्रहकृद्वचः ॥

प्रवराः शिष्टपरंपराप्रसिद्धाः । इतिगोत्रप्रवरलक्षणम् ।

---

१ 'अन्यत्र भृग्वङ्गिरसां गणात्' इति च. पाठः । २ अत्र सर्वेषु लिखितमुद्रितपुस्तकेषु 'न स एव'; 'नत्स एव' इति च पाठो दृश्यते तथापि नार्थसंगतेरिति पाठो पुनरत्र कल्पितः ।

अथोद्दिष्टगणक्रमेण बौधायनादिसूत्रोक्तानि गोत्राणि प्रदर्श्यन्ते । तत्र तावद्भृगूणां सप्तान्तर्गणाः । तत्राजामदग्न्याः केवलभृगवः पञ्च । आर्ष्टिषेणा यस्काः मित्रयुवो वैन्याः शुनका इति । तद्यथा ।

आर्ष्टिषेणा नैरथ्यो ग्राम्यायणयः कात्यायनाश्चान्द्रायणाः पैठकलायनाः सिद्धाः सुमनायनाः गौराम्भिराम्भिः इत्येते आर्ष्टिषेणाः । तेषां च पञ्चार्षेयाः—भार्गवच्यावनाप्नवानार्ष्टिषेणानूप' इति । एषामविवाहः । इत्यार्ष्टिषेणगणः ।

यस्को मौनो मूको वाधूलो वर्षपुष्पो सापो राजतैनो दुर्दिनो भास्करो दैवन्तायनो जैमन्तायनो वाकल्यो मध्यमेयो वासयः कौशाम्बेयाः कौटिल्याः सात्यकेयाः कौञ्जिकौञ्चिल्याः सत्यकयश्चित्रसेनाः भागन्तयस्ताकश्चिकेयाः औक्ल्याः औगविंग्रतयः भागुरिश्च इत्येते यस्काः । तेषां त्र्यार्षेयाः प्रवराः । 'भार्गववैतहव्यसावेतस' इति । इति यस्कगणः ।

मित्रयवो रौकपायणा नाशायजना रोक्षायना रौक्यायनाः सपण्डिनाः सुरभिनेया माल्याया वाल्याया महावाल्यास्ताक्ष्यायणा औरक्षायणा माजाधयः 'कैलवायना' इत्येते मित्रयुवस्तेषां त्र्यार्षेयः प्रवरः । 'भार्गववाध्यश्वदैवोदास' इति । इति मित्रयुगणः ।

वैन्याः पार्था वाष्कलाः श्येनाः, तेषां त्र्यार्षेयः प्रवरः 'भार्गववैन्यपार्थ' इति । इति वैन्यगणः ।

शुनकाः समदा यज्ञपयः सौगन्धयः खादेमायना गौङ्गायना मत्स्यगन्धा भार्गायणाः श्रोत्रियास्तैत्तिरीया इत्येते शुनकास्तेषा मेकार्षेयः प्रवरः । 'शुनक' इति। 'गृत्समद' इति वा। इति शुनकगणः। इति केवलभृगवः ।

अथ गणद्वयं सप्तर्ष्यन्तर्गतं वत्सविदाख्यं तदुच्यते मार्कण्डेया माण्डव्या—माण्डूकेयाः कांसय आलेखना दार्भायणाः शार्करायणा दैवतायनाः शौनकायनकयो वैश्वानरयो वैहीनरयो विरोहिता वाहा गौद्रायणाष्टैकयः काशकृत्स्ना वाहूतकाः कृतभागा एतिशायनाः सौकृतयो मण्डविसौविस्तयः हस्त्यग्नयो हस्ताभयः शौद्रायकाः वैकेपाया द्रोणजिह्वय औरसयः काम्बरोदरयः कण्ठोरकृतो वैहल्यो विरूपाक्षा मिकाश्वा उच्चैर्मन्यवो

१ अयसथिको ङ. । २ कौम्बिल्या ङ. पाठः । ३ औतया: ङ. पाठः । ४ औगुंविग्रतयः ङ. पाठ.। ५ रौक्यायणा ङ. पाठः । ६ औरक्षीयणा दाजायना उक्षपणामाजाधेया ङ. पाठ.। ७ गात्रायना ङ. पाठः । ८ कासय अलेखना दार्भायणाः शार्कराः दौदेवैतायना. शौनकायन(मर्कंडेयाः पार्थिकाः कांसाः प्रतापना.पैङ्गलायनाः इति ङ. पाठः ।

वैमत्या आर्यायणा माकोयणाः काह्नायना वायवा दैवमत्या आर्कयणाः काह्नायना वायानिनः शांकरवश्चान्द्रामसा गाङ्गेयाः तोयेया याज्ञिया परिमण्डलयो जावालयो बाहुमित्रायणा आपिशलयो वैष्ट्रपुरयो लोहिशायना उष्ट्राविायानिनः शारद्वन्तायना राजितवाहा वात्सा वात्स्यायना इत्येते वत्सास्तेषां पञ्चार्षेयः प्रवरो 'भार्गवच्यावनाप्रवानौर्वजामदग्न्य' इति। इति वत्सगणः।

विदाः शैला अवयः शौलाः प्राचीनयोग्या अभयदानाः काण्डरथयो वैतभृताः पुलस्तय आर्कायणास्तान्त्रायणाः कामला इत्येते विदास्तेषां पञ्चार्षेयः प्रवरो भवति 'भार्गवच्यावनाप्रवानौर्ववैद' इति। इति विदगणः।

आपस्तम्बस्तु विशेषमाह स उच्यते—तत्र यस्कगणो वीहव्यगणत्वेन व्यपदिष्टः। सावेतसेत्यत्र सावेदसेति। शुनकगणो गार्त्समदत्वेन व्यपदिष्टः। मित्रयुगणो वध्र्यश्वगणत्वेन व्यपदिष्टः। विदगणो नोक्तः। कात्यायनेन भृगोर्द्वादश गणा उक्ताः। तद्यथा वात्स्यायना आवाच्या वैजवाः शाठरमाठरा विदा आर्ष्टिषेणा वत्सा वेदविश्वज्योतिषः पार्श्वश्वेता आपिशायना वीतहव्या गृत्समदाश्चेति। वात्स्यायनानां पञ्चार्षेयाः 'भार्गवच्यावनाप्रवानौर्वजामदग्न्य' इति। आवाच्यानां 'भार्गवच्यावनावाच्या' इति। वैजवानाम् 'भार्गवच्यावनाप्रवानवैजवनैमथित' इति। शाठरमाठराणाम् 'भार्गवशाठरमाठर' इति। विदानाम् 'भार्गवच्यावनाप्रवान' इति। आर्ष्टिषेणानां पूर्वोक्तः। वत्सपुरोधसां 'भार्गवच्यावनाप्रवानवैजवनैमथित' इति। शाठरमाठराणां भार्गवशाठरमाठर' इति। विदानाम् 'भार्गवच्यावनाप्रवान' इति। आर्ष्टिषेणानां पूर्वोक्ताः। वत्सपुरोधसाम् 'भार्गवच्यावनाप्रवानवात्सपौरोधस' इति। 'भार्गववत्सपौरोधस' इति वा। वेदविश्वज्योतिषाणाम् 'भार्गववेदवैश्वज्योतिष' इति। पार्श्वश्वेतानाम् 'भार्गववैन्यपार्थ' इति। आपिशायनानाम् 'भार्गववाध्र्यश्वदैवोदास' इति। वीतहव्यानाम् 'भार्गववैतहव्यसावेधस' इति। गृत्समदानाम् 'गार्त्समद' इति। भार्गवगार्त्समद' इति वा। लौगाक्षिस्तु सप्तगणेषु विशेषमाह—गणास्तावत् 'वत्सा विदा वात्स्या आर्ष्टिषेणाः लालायना वीतहव्या गार्त्समदाश्च' इति। तत्र वात्स्यानां पूर्ववत्। विदानां त्र्यार्षेया 'भार्गवौर्वजामदग्न्य' इति। वात्स्यानां 'भार्गवच्यावनाप्रवान' इति। आर्ष्टिषेणानां

---

१ उष्ट्राक्षा माह्यायनाः ङ. पाठः। २ वाजिनवाहा ङ पाठः। ३ वो ङ. पाठः। ४ विहव्य इति ङ. पाठः।

पूर्ववत्। सालायनानां मित्रयुववत्। वीतहव्यानां 'भार्गववैतहव्यसावेतस' इति। एवं पूर्वोक्तेषु वत्सविदार्ष्टिषेणानामन्योन्यमविवाहः। गोत्रप्रवरैक्यात्। यस्कमित्रयुवैन्यशुनकाः परस्परं न विवहेयुः। बौधायनमते प्रवरैक्यात् पूर्वोपपादितप्रकारेण गोत्रैक्याच्च। यस्कादिचतुर्भिर्विदादित्रिभिर्भवत्येव विवाहः। सगोत्रत्वाभावात्। ननु भार्गवरूपैकप्रवरसाम्यात्कथं विवाहः। उच्यते—

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेत्॥

इति बौधायनवचनेन भृगुगणे एकानुवृत्तेरप्रयोजकत्वात्। एवमग्रेऽपि द्रष्टव्यम्।

इति भार्गवनिर्णयः।

अथाङ्गिरोनिर्णयः। तत्र तद्गणास्त्रयः केवलाङ्गिरसो गौतमा भरद्वाजाश्चेति। तत्र केवलाङ्गिरसः षट्, चत्वारो भरद्वाजाः, सप्त गौतमा इत्येवं सप्तदश। तत्र केवलाङ्गिरसां षड्गणमध्ये एकः संकृतिर्व्यामुष्यायणः। तत्तत्प्रकरणे निरूपयिष्यामः। अवशिष्टाः पञ्च तद्यथा। विष्णुवृद्धकण्वहरितरथीतरमुद्गलाख्याः। त उच्यन्ते।

विष्णुवृद्धाः शठा मठाः भद्रणा मद्रणा बादरायणाः सात्यकिः[1] शालङ्कायना नैतुधाः स्तुसा भारुण्या वैहोढा देवस्थालयः इत्येते विष्णुवृद्धास्तेषां त्र्यार्षेयः प्रवरः 'आङ्गिरसपौरुकुत्सत्रासदस्यव' इति। इति विष्णुवृद्धगणः।

कण्वाः औपसः कठायना वाष्कलाः पौलाः हलिनो माञ्जिः माञ्जयः मौञ्जिगन्धा विजिवा जया वाजश्रवा इत्येते कण्वास्तेषां त्र्यार्षेयः प्रवरः 'आङ्गिरसाजमीढकाण्व' इति। इति काण्वगणः।

हरिताः कौत्सः साङ्ख्यो दाभ्यो भैम्यो भैमगवो मलायुर्लम्बोदरो वलोदरो महोदरो नैमिश्रयो मिश्रादिना मिश्रयः कौतपाः कारपियः कौलयः पौलयः मौद्गलोमा माधूपमान्धातृमाण्डकारय इत्येते हरितास्तेषां त्र्यार्षेयः प्रवरः। 'आङ्गिरसाम्बरीषयौवनाश्व' इति। इति हरितगणः।

रथीतरा हास्तिदासिका ह्लायना नैतिरक्षयः ऐशानयः शैलाल्यो मितैभिला भायसा वह्वा भैक्षवाह्य ठैमगवा इत्येते रथीतरास्तेषां त्रयः प्रवराः 'आङ्गिरसवैरूपराथीतर' इति। इति रथीतरगणः।

---

[1] सात्यकयो ङ. पाठः।

मुद्गला हिरण्याक्षा ऋषभामिनाः क्षपासस्या झपायणा दीर्घजङ्घाः प्रबलजङ्घाः स्तरणमिन्दव इत्येते मुद्गलास्तेषां त्रयः प्रवराः। आङ्गिरसभार्म्यः श्वमौद्गल्य' इति। इति मुद्गलगणः। इति केवलाङ्गिरसः।

एषु पञ्चसु स्वं स्वं गणं हित्वा परस्परं विवाहः। यद्यप्याङ्गिरसेति प्रवरैक्यं सर्वत्र तथाप्यङ्गिरोगणत्वाददोषः।

अथ भरद्वाजाङ्गिरसः। तद्गणाश्चत्वारः भरद्वाजाः कपयः गर्गा रौक्षायणा इति। ते उक्ता बौधायनेन।

भरद्वाजा क्षाम्यायणाः संङ्गडा[1] देवाश्वा उद्वहन्याः प्राग्वंशय वाह्लभा वाद्यो गावसानायना वैदेहा आन्ना औक्षा भूरयः परिणद्धेयाः केशखेयाः शौद्धय उरूढाः खारिग्रीवय औपसयो वयोक्षिभेदा अग्निवेश्या न्ययाः शठा गौरिवा लेखायनाः स्तनकर्णा ऋक्षा माणिमिन्द्याः कठोदकाः सौद्धलयो वैलाः खारुडा देवयो भाद्रपद्यय: सौरभराः शुङ्गा देवमतय इषुमता औदमैधयः प्रवाहणेयाः कुल्मापा राजस्तम्भयः सुधापकृतो वाराह्यो वल्मीकयो रुद्राङ्गपथाः शालाहल्यो वेदवेला नृत्यायनाः शालालयः शार्दूल्यः शाकला वाष्कलाः सत्यकेयाः क्रोडायनाकौण्डिन्या ब्रह्मस्तम्भा राजस्तम्भा आपस्तम्भाः ये चान्ये स्तम्भस्तम्बशब्दान्ता अरुणिः सिन्धुः कौमुदगन्धिः इति पृथग्भामान्यन्यत्र आरणसिन्धुकौमुदगन्धयः शिखायना आत्रेयायणा भामाण्याः कुक्षाः कौकक्षिपो[2] नैतुन्तयो दार्भयः श्यामेघाः मत्सकाथाः करुणायनाः कारुपथयः कारिपायणाः काम्बल्या इत्येते भरद्वाजास्तेषां त्र्यार्षेयः प्रवरः 'आङ्गिरसबार्हस्पत्यभारद्वाज' इति। इति भरद्वाजगणः।

रौक्षायणाः कपिलाः शक्तिफलाः शैफिला वैकिडोऽकौथुमोऽग्निजिह्वी च कणिश्चसूतिश्चेति रौक्षायणास्तेषां पञ्च प्रवराः 'आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचस' इति। इति रौक्षायणगणः।

गर्गाः सौम्भरायणाः[4] सांख्यानायना गन्धरायणा वालुकयो भ्राष्ट्रका भ्राष्ट्रविन्दवः क्रोष्ट्रकयः सौयामुनिः भ्राजिनाक्षयो होत्रयः सपचपचयो यंवा नवपलाशाः शालावनयः संमहकल्पा वेणुभिरिः सौहमकारि रौतिकौचाल्या राजवत्यो लवाः इत्येते गर्गास्तेषां पञ्चप्रवराः 'आङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति' त्रयो वा 'आङ्गिरससैन्यगार्ग्येति।' इति गर्गगणः।

१ मङ्गडा इति ङ. पाठः। २ कौकक्षियो ङ. पाठः। ३ श ङ. पाठः। ४ साम्भरायणाः ङ. पाठः। ५ जवा ङ. पाठः।

कपयः वैतलायनाः पतञ्जलीनाः तरस्विनः ताण्डिनः भोजक्षयः सार ङ्गरवाः खराशिखण्डिनः मौशितकिः संशयः पौप्ययः ऐतिशायना इत्येते कपय- स्तेषां त्रयः प्रवराः । 'आङ्गिरसामहीयवौरुक्षयस' इति । इति कपिगणः । भरद्वाजानां चतुर्णामविवाहः । इति भरद्वाजाङ्गिरसः ।

गौतमाङ्गिरसां सप्त गणाः । आयास्याः शरद्वन्ताः कौमण्डा दीर्घतमसः कारेणुपाल्यो वामदेवा औशनसाश्चेति । त उच्यन्ते ।

आयास्या आणिवेया मूढरथाः कावाक्षयो वैदेहाः कौमारवत्यादिः दर्भिः दतौष्किः सात्यमुग्रिकौवाखाः वौम्याः नैक्रुधिष्टिः स्वैकपिः किरालयः कारुणिः कठोरिः काशीवाः कार्क्षीवा इत्येत आयास्यास्तेषां त्रयः प्रवराः ' आङ्गिरसायास्यगौतम ' इति । इत्यायास्यगणः ।

शरद्वन्तः अभिजितो रोहिण्याः क्षीरकरभाः सौमुचयः सौयामुनाः कौ- पविन्दवो राहूगणा गणयोमयणा इत्येते शरद्वन्तास्तेषां त्रिप्रवराः ' आ- ङ्गिरसगौतमशारद्वन्त ' इति । इति शरद्वद्गणः ।

कौमाण्डा मानसरेपणा मासुराक्षाः काण्वरेभय आञ्जायना वाजायना इत्येते कौमाण्डास्तेषां पञ्चार्षेयः प्रवरः 'आङ्गिरसौचथ्यकार्क्षीवतगौ- तमकौमण्ड ' इति । कौमाण्डगणः ।

दीर्घतमसां पञ्च ' आङ्गिरसौचथ्यकार्क्षीवतगौतमदैर्घतमस ' इति । इति दीर्घतमोगणः ।

कारेणुपाल्यो वास्तव्याः श्वेतीयाः पौञ्जिष्ठ औदजायना मान्धुक्षारा अजगन्धय इत्येते कारेणुपाल्यस्तेषां त्रिप्रवराः 'आङ्गिरसगौतमकारेणुपाल ' इति । इति कारेणुपालिगणः ।

वामदेवानां त्रयः ' आङ्गिरसगौतमवामदेव ' इति । इति वामदेवगणः ।

औशनसा दिश्याः सुरूपाः प्रशस्ताः सुरूपाक्षा महोदरा विकंहृताः सुबुध्या निहता इत्येत औशनसास्तेषां त्र्यार्षेयः प्रवरः । 'आङ्गिरसगौतमौ- शनस ' इति । इत्यौशनसगणः । गौतमानां सप्तानामविवाहः ।

इति गौतमाङ्गिरसः ।

अथ विश्वामित्रास्तेषां गणा दश । कुशिकलौहितरौक्षककामकायनक- तवधनञ्जयाऽजाऽघमर्षणपूरणेन्द्रकौशिकाख्याः । त उच्यन्ते ।

कुशिकाः पार्णजङ्घा वाल्कल्या औदरिः माणिः बृहदग्निः गल्वः राधदिः आपद्यल्याः कामन्दैतका बद्धकथाः श्रिकिताः कामकायना शालङ्कायनाः ।

शाङ्कायनाः यमदूता आनतिन्नाः तारकायणा चार्वासा जावालयः याज्ञवल्क्याः विदण्डाः भुवनयनाः सौश्रुतयः औपदहनयः औदुम्बरिः श्राभ्रेया श्यामेयाः चैत्रेयाः साश्वता मयूराः चित्रभावनाः श्येतभावना अनुतन्तवयो मान्तवा ये चान्ये व्रतशब्दान्ताः वाभ्रव्याः कालोत्सरा इत्येते कुशिकास्तेषां त्रिप्रवराः 'वैश्वामित्रदेवरातौदल' इति। इति कुशिकगणः।

रोहिता दण्डकयः चाक्रवर्मोषिणः खजूरायिणः वाञ्जायनाः वासयः इत्येते रोहितास्तेषा त्र्यार्षेयः प्रवरः 'वैश्वामित्राष्टकरोहित' इति। इति रोहितगणः।

रौक्थकाः खोद्वहा वला रेवणाश्च तेषां त्रयः वैश्वामित्ररौक्थकरैवण इति। इति रौक्थकगणः।

वैश्वामित्रा दैवश्रवसो दैवतरस औमनज्याः कामकायनास्तेषां त्रयः 'वैश्वामित्रदेवश्रवसदैवतरस' इति। इति कामकायनगणः।

कताः सैरन्ध्राः करभा वाजायनाः सांहितेयाः कौकुल्याः। पिण्डग्रीवा नारायणा नाराधा इत्येते कतास्तेषां त्रयः 'वैश्वामित्रकात्यात्कील' इति। इति कतगणः।

धनञ्जयाः पारिजामयः आश्रयेनावायव्याः सैन्धवायनः पुष्कराक्षास्तेषां त्रयः 'वैश्वामित्रमाधुछन्दसधानञ्जय' इति। इति धनञ्जयगणः।

आजानां त्रयः 'वैश्वामित्रमाधुछन्दसआज' इत्याजगणः।

अघमर्षणाः कौशिकाः तेषां त्रयः 'वैश्वामित्राघमर्षणकौशिक' इति। इत्यघमर्षणगणः।

पूरणाः वारिधापयः तेषां द्वौ ॥ 'वैश्वामित्रपौरण' इति। इति पूरणगणः।

इन्द्रकौशिकानां द्वौ 'वैश्वामित्रेन्द्रकौशिक' इति। इतीन्द्रकौशिकगणः।

सर्वेषां वैश्वामित्राणामविवाहः।

इति विश्वामित्राः।

अथात्रयश्चतुर्भेदाः। अत्रयः वाद्भूतका गविष्ठिरा मुद्गलाश्चेति। त उच्यन्ते।

भूरयः छान्द्रिश्छान्दोगिः पौष्टिका मौद्गल्यः सोपानच्छराला-श्छागलाः स्तूणविन्दुः भागन्तयः मालरुचः व्यालयः साम्भव्यायनाः सावव्यायनाः कर्मर्थायाः कामप्यायनिः दाक्षिः वैदेहा गणपतयः औद्दालकिः द्रोणभावाः गौरिग्रीवयः गाविष्ठिराः शिशुपालाः कृष्णात्रेयाः गौरात्रेया

तृणात्रेयाः अरुणात्रेयाः गोपवनाः कालापयवयः आर्नालायना आर्नीशायनाः आनन्दिः मानन्दिः गौरन्दिः सैरन्दिः पुष्पयः शेफयः साकेतायना शाकटायना भरद्वाजनयः इन्द्रातिथिः इत्येतेऽत्रयः । तेषां त्रयः प्रवराः 'आत्रेयार्चनानसश्यावाश्व' इति । इत्यत्रिगणः ।

वाद्भूतकानां त्रयः 'आत्रेयार्चनानसवाद्भूतक' इति । इति वाद्भूतकगणः ।

गविष्ठिराणां त्रयः 'आत्रेयार्चनानसगाविष्ठिर' इति । इति गाविष्ठिरगणः ।

मुद्गलाः व्यालिसन्धिः अर्णवाः बौधाः क्षावाजकिः गविष्ठिराः शिरीषयः शालिमताः व्रीहिमताः गौरिवीताः गौरिकिः वयोवायवनाः वाष्कलाः इत्येते मुद्गलास्तेषां त्रयः प्रवराः 'आत्रेयार्चनानसपौर्वातिथ' इति । इतिमुद्गलगणः । अत्रीणां सर्वेषामविवाहः ।

इत्यत्रयो निर्णीताः ।

अथ वसिष्ठास्तेषां चत्वारो गणा आद्यावसिष्ठाः कुण्डिना उपमन्यवः पराशराश्चेति । ते उच्यन्ते ।

चैतलकिः वारुकिः सारवला गौरिश्रवस आश्वलायनाः कपिष्ठाः शौचिवृक्षा व्याघ्रपादो वाह्यकायनिः वाढव्या जातूकर्ण्या औडुलोमिः कैभोजिः कौलायनाः सुन्दहरितः काण्डवृद्धिः सौवत्सायना आलम्भायनाः लोमन्यः स्वस्त्याः कर्पिताः पार्णकायनाः पार्णवल्क्यः देवलका गौरव्या विश्वावना वाहुकपय आविक्षिपयो वंद्यजपयः पूर्णवेला विशिखा इत्येते वसिष्ठास्तेषामेकप्रवरो 'वासिष्ठ' इति । इत्याद्यवसिष्ठगणः ।

कुण्डिना होलायना गौणा आश्वत्था वैकर्णेय आनिल्वा वदरा आश्मरथ्या माहवः क्रौंकोक्याः साङ्कलिनः कापटवः पेटका नमग्रामा हिरण्याक्षाः पैष्टपाः पैप्पल्यादयः माध्यन्दिनाः शान्तिसौपत्तिः इति कुण्डिनास्तेषां त्रयः प्रवराः 'वासिष्ठमैत्रावरुणकौण्डिन्य' इति । इतिकुण्डिनगणः ।

उपमन्यव औपगवा माण्डलेखयः कापिञ्जला जलागृहाः तपोलोकाः कैत्रणाः स्वेपाः तागुरिः स्वराक्षरा मौलयः चैल्हलिनः महाकर्णायना वालशिखा औदाहमानयः चलायना भागुरिः रथायनाः कुण्डोदरायणाः कायाभयः मार्कोभय आनुक्षरव आलवाः कपिकेशा इत्येते उपमन्यवस्तेषां त्रयः प्रवराः 'वासिष्ठेन्द्रप्रमदाभरद्वसव्य' इति ।

पराशराः कुण्डशयो वाजयो वाजिमन्तयो वैभातायना गोवालिः । प्रत्येहयः वैकलयः शाक्षयः कौमुदादय अहार्यैश्विः । खल्वायना गोपायनाः तालय

आरुणिः वारुणिः । भालुक्या वाजरिः चक्राव्हयनाः कौङ्कलयः कैमतिः । कृष्णाजिनाः कपिमुखाः स्वस्त्ययनयः श्वेतयूपयः पौष्कलव्यादिः । गार्ग्यायणयः वार्णयः श्यामेयाः श्रौनुहिः सहचौलिस्तेषां त्र्यार्षेयः 'वासिष्ठशाक्त्यपाराशर्य' इति ॥ अत्र गोवाल्यन्ताः कृष्णाः पराशराः । अहार्यश्व्यन्ताः गौराः । वारुण्यन्ताः अरुणाः । कैमत्यन्ताः नीलाः । पौष्कलसाव्यन्ताः श्वेताः । सहचौल्यन्ताः श्यामा इति संज्ञा । इतिपराशरगणः । वासिष्ठानां सर्वेषां परस्परमविवाहः ॥ आपस्तम्बस्त्वाद्यवसिष्ठानामपि 'वासिष्ठशाक्त्यपाराशर्य' इति त्रिप्रवरानाह ।

इति वसिष्ठाः ।

अथ कश्यपास्तेषां त्रयो गणाः । निध्रुवा रेभाः शाण्डिलाश्चेति । त उच्यन्ते ।

कश्यपाः छागलेया माठरा ऐतिशायना आभूत्या वैशिखा धूम्रायणाः सौम्या धर्म्यायणा औदवृत्तिः आग्नायणाः पैन्वकयः प्रावार्यहद्रोगा आनयाः पाश्वायतिका मौर्षीतकिः साममया माधवयः सारावयः सौधवयः सापस्था आसुरायणाः छागव्याः सोमधाः[1] स्थौलकेशयः वार्द्धकय औपव्या लाक्षायणाः क्रोष्ठाजीवनयः खाद्रायणा रोहितायना मितकुम्भाः पिङ्गाक्षय औडलयः मारयणाः पचयः वैकर्णेयाः कौशीतकेयाः धूमलक्ष्मणयः सुराः गौरिवायना विमध्या अग्निशर्मालायणाः औक्षायनयः काम्बोदरयः[2] देवराताः धैदूराः वावेलाः महावक्रेयाः पैठीनस्याः पाःनस्याः वृषगणाः द्राक्षमाणयः भालन्दनाः शाङ्गमित्रेयाः हिरण्मयाः वालाः जारमाण्याः साविश्रवसः वैशम्पायनाः स्वैरकिः कांसतयाः उल्कायनिः मार्जलायनाः कांसलायनाः देवोहोताः सुरुचयः स्वरेभाः आयस्थूणाः भागुरयः पाथिकायाः गोपायनाः हिरण्मयाः आग्निवेविः तथ्यशौर्याः मुसलाः आविश्रेण्या उत्तरतोगण्डूपाः दलोः[3] मन्त्रिताः वैकर्णयः स्थूलबिन्दव इत्येते निध्रुवास्तेषां त्रयः प्रवराः 'काश्यपावत्सारनैध्रुव' इति इति निध्रुवगणः ।

रेभाणां त्रयः 'काश्यपावत्साररैभ्य' इति । इति रेभगणः ।

शाण्डिलाः कौहलाः पार्यकाया औदमवयः सौदानवःसैपशवः कारेयाः कौकटयः शैशिकयः माहकयः वर्हुदेहा[4] गोमूत्राः वाक्यशठाः जालन्धरिः धन्वन्तरिः इत्येते शाण्डिलास्तेषां त्रयः प्रवराः 'काश्यपावत्सारशाण्डि-

---

१ सोमधा क. पाठः । २ कम्बलोदरि: ङ. पाठः । ३ दंदलाः ङ. पाठः । ४ वहुदवयः ङ. पाठः ।

स्य ' इति । १ ' कश्यपावत्सारदेवल ' इति वा । २ ' काश्यपावत्सारासित ' इति वा । ३ ' शाण्डिल्यासितदेवल ' इति वा । ४ ' काश्यपासितदेवल ' इति वा । इतिशाण्डिलगणः ।

आपस्तम्बसूत्रे निरुपदाः कश्यपा उक्ताः । रैभशाण्डिलास्तु त्र्यार्षेयाकृयार्षेया वा । ' देवलासित ' इति । ' काश्यपदेवलासित ' इति । कश्यपानां सर्वेषामविवाहः ।

इति कश्यपनिर्णयः ।

अथागस्तयः । ते त्रयः । आद्यागस्तयः साम्भवाहाः सोमवाहाश्चेति । त उच्यन्ते ।

अगस्तयः विशालाद्याः शालङ्कायना औदृहतयः कुल्माषदण्डिनाः पर्णार्घ्यः सावर्णिः वकन्दयः वैरणयः वृथोदरयः सौचपथयः शाल्वातयाः मौञ्जिकराः शत्रयः हृद्योमाः शाण्डिधाराः पयोद्रताः हरिग्रीवाः रौहिण्याः सौसलयः इत्येतेऽगस्तयः । तेषां त्रयः प्रवराः ' आगस्त्यदार्ढ्यच्युतेध्मवाह ' इति ॥ अन्यत्र तु चत्वारः प्रवरा उक्ताः ।

इध्मवाहाः इच्छावाहाः साम्भवाहाः सोमवाहाः यज्ञवाहाश्चेति । इध्मवाहानां त्रयः ' आगस्त्यदार्ढ्यच्युतेध्मवाह ' इति ।

साम्भवाहानाम् ' आगस्त्यदार्ढ्यच्युतसाम्भवाह ' इति ॥
सोमवाहानाम् ' आगस्त्यदार्ढ्यच्युतसोमवाह ' इति ।
यज्ञवाहानाम् 'आगस्त्यदार्ढ्यच्युतेध्मवाह ' इति ॥

कात्यायनलौगाक्षिभ्यामगस्तिगणमध्ये पुलस्त्यः पुलहः क्रतुः इत्याद्युक्त्वा 'आगस्त्यमाहेन्द्रमायोभुव' इति । इति प्रवरा उक्ताः । ततः पूरणादीनुक्त्वा 'आगस्त्यपौर्णमासपौरण' इति प्रवरा उक्ताः । सत्याषाढस्तु आद्यागस्तीननुक्रम्य 'आगस्त्यदार्ढ्यच्युतेध्मवाह' इति त्रीन् । आगस्तीनां सर्वेषामविवाहः ।

इत्यगस्त्यनिर्णयः ।

द्व्यामुष्यायणाः। अथ द्व्यामुष्यायणाः । तत्र भरद्वाजानां केवलाङ्गिरसामन्त्रीणां कश्यपानां वसिष्ठानां विश्वामित्राणां च द्व्यामुष्यायणाः । नान्येषाम् । त उच्यन्ते ॥ तत्र संकृतिगणो द्व्यामुष्यायणः । स यथा । संकृतयः मेत्काः पौलास्तैण्डिशंखुशैवगवाः परिसवास्ताकाद्याः हारिग्रीवाः ऐतरेयाः पेणायाः आरायणाः आश्वलायनाः औतायनाः आमायणाः

१ प्रत्येकं भिन्नाः ।

आर्ष्टिभयः चान्द्रायणाः आग्रापयः पूतिमापाः इत्येते संकृतयस्तेषा त्र्यार्षेयः ‘ आङ्गिरससांकृत्यगौरिवीत ’ इति । आश्वलायनस्तु ‘ शाक्त्यगौरवीत-सांकृत्य ’ इति प्रवरानाह । एतैः पूर्वोक्तैः परस्परं चतुर्विधवसिष्ठैश्च सह न विवाहः । चतुर्विंशति(मत)टीकायां तु कश्यपैस्त्रिभिरविवाह इत्युक्तम् । श्लोकोऽप्युक्तः—

काश्यपेयगणस्यापि वसिष्ठस्य गणस्य च ।
संकृतिपूतिमापाभ्यां विवाहो न परस्परम् ॥ इति ।

तत्राकरो मृग्यः । लौगाक्षीणां त्रयः प्रवराः ‘ काश्यपावत्सारवासिष्ठ ’ इति ॥ एषां वासिष्ठकश्यपैरविवाहः । तथा धनञ्जयानां विश्वामित्रात्रि-भिरविवाहः । एवं वामरथ्यानां जातूकर्ण्यानां वसिष्ठात्रिभिरविवाहः । विश्वामित्रभरद्वाजैः शौङ्गशैशिरीणां न विवाहः । अस्य प्रवराः । ‘ आङ्गिरसबार्हस्पत्यभारद्वाजकात्यात्कील ’ इति । कचित्तु देवरातेन विश्वामित्रजमदग्निभिः सह न विवाह इत्युक्तम् ॥ तत्र केषांचित्काशी-स्थानामनादरः । विपरीतानुष्ठानात् । दक्षिणदेशे तु न कुर्वन्ति । तत्र मूलं [प्रयोगपारिजाते संग्रहे—

जमदग्निगणस्यापि विश्वामित्रगणस्य च ।
न देवरातगोत्रेण विवाहः स्यात्परस्परम् ॥ इति ।

हरिवंशे तु—

और्वस्यैवमृचीकस्य सत्यवत्यां महायशाः ।
जमदग्निस्तपोवीर्यो जज्ञे ब्रह्मविदां वरः ॥
मध्यमश्च शुनःशेपः शुनःपुच्छः कनिष्ठकः ।
इत्युक्त्वा—दैवैर्दत्तः शुनःशेपो विश्वामित्राय भार्गवः ॥
दैवैर्दत्तः स वै यस्माद्देवरातस्ततोऽभवत् ॥

इति देवरातस्य जमदग्निसंबन्धकथनाज्जामदग्न्यत्वमुक्तम् ।] मृग्यम् ।

इति द्व्यामुष्यायणाः ।

यत्तु ‘ मानवेति वा सर्वेषाम् ’ इति प्रवर उक्तः स वरणे ननु विवाहादौ तस्योपयोगः ॥ राजन्यवैश्यानां समानार्षेयत्वादिकं पुरोहित-गोत्रादिभिर्विचारणीयम् ।

---

१ कश्यपैस्त्रिभिरिति ज पाठः । २ गणस्येत्यधिकं ज । [३] एतच्चिह्नान्तर्गतं च. पुस्तके दृश्यते । मृग्यमिति च नास्ति ।

अथ कश्चिद्विशेषो मृग्यमूलोऽपि लिख्यते ॥ शौङ्गशैशिरीणां पञ्चोक्ताः । 'आंगिरसबार्हस्पत्यभारद्वाजशौङ्गशैशिर' इति वा । त्रयो वा 'आंगिरसकात्यात्कील' इति । 'भारद्वाजकात्यात्कील' इति वा ॥ कपिलानां आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचस' इति ॥ एषां विश्वामित्रभरद्वाजैर्नान्वयः ॥ धनञ्जयानां 'वैश्वामित्रमाधुछन्दसधानञ्जय' इति । एषामत्रिविश्वामित्रैर्नान्वयः ॥ लौगाक्षीणां 'काश्यपावत्सारवासिष्ठ इति । 'वासिष्ठावत्सारकाश्यप' इति वा । एषां वासिष्ठकाश्यपैरविवाहः । यस्य विस्मरणादिना गोत्रनाशस्तस्य काश्यपगोत्रम् । 'गोत्रनाशे तु काश्यपम्' इति हेमाद्रौ व्याघ्रोक्तेः ।

अथात्र स्मृत्यर्थसारीयाः श्लोकाः संग्रहार्थं लिख्यन्ते—

गोत्रप्रवरनिर्णायकश्लोकाः ।

अथात्र[1] गोत्रप्रवरनिर्णयो वर्ण्यतेऽञ्जसा ॥
जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः ॥ १ ॥
वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते ॥ २ ॥
त्रियमागतया वाऽपि सत्तया वाऽनुवर्तनम् ॥
एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ॥ ३ ॥
समानमुनिभूयस्त्वमेकप्रवरतामपि ॥
समानप्रवरत्वं च द्वेधा बौधायनोऽब्रवीत् ॥ ४ ॥
मुनिप्रणीतप्रवरैरूनपञ्चाशता वयम् ॥
अनन्तान्यपि गोत्राणि चाङ्गीकृत्याभिदध्महे ॥ ५ ॥
जामदग्न्या वत्सबिदार्ष्टिषेणाः परस्परम् ॥
नान्वियुः प्रवरैक्येन सगोत्रत्वेन चादिमौ ॥ ६ ॥
यस्का मित्रयुवो वैन्याः शुनकाः प्रवरैक्यतः ॥
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः ॥ ७ ॥
उक्ताः सप्त भृगोर्भेदा कथ्यन्तेऽङ्गिरसो गणाः ॥
गौतमाः सप्त चायास्याः शरद्वन्तास्तथा परे ॥ ८ ॥
कौमाण्डादीर्घतमसस्ततः कारेणुपालयः ॥
वामदेवा औशनसा गोत्रैक्यान्नान्वियुर्मिथः ॥ ९ ॥
केवलाङ्गिरसाश्चैके विष्णुवृद्धाः सकम्बजाः ॥
हरिता रथीतराश्च मुद्गलाः प्रवरैक्यतः ॥ १० ॥

---

१ अथेत्रेति च. पाठः ।

स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः ॥
षोडशाङ्गिरसस्त्रेधा प्रोक्ताः संकृतयस्तथा ॥ ११ ॥
संकृतीनां द्विवंश्यत्वाद्वासिष्ठैश्च चतुर्विधैः ॥
स्ववर्गीयैः सगोत्रत्वात्प्रवरैक्याच्च नान्वियुः ॥ १२ ॥
चत्वारोऽत्रय आद्यास्त्रिवाद्भुतकगाविष्ठिराः ॥
मुद्गलाश्चान्त्यगोत्रैक्यात्प्रवरैक्याच्च नान्वियुः ॥ १३ ॥
त्रयश्च कश्यपगणा निध्रुवा रेभशाण्डिलाः ॥
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥ १४ ॥
वासिष्ठैः कश्यपैर्नित्यं लौगाक्षीणामनन्वयः ॥
अर्हं वसिष्ठतोक्तिस्तु प्रयाजाद्यादिगोचरा ॥ १५ ॥
वसिष्ठाः कुण्डिनाश्चैवमुपमन्युपराशराः ॥
वसिष्ठा इति चत्वारो गोत्रैक्यान्नान्वियुर्मिथः ॥ १६ ॥
कुशिका रोहितगणा रौक्ष्यकाः कामकायनाः ॥
कता धनञ्जया आजा अघमर्षणपूरणाः ॥ १७ ॥
इन्द्रकौशिकजाश्चेति विश्वामित्रगणा दश ॥
नोद्वहेयुः सगोत्रत्वात्कचिच्च प्रवरैक्यतः ॥ १८ ॥
अगस्तयः साम्भवाहाः सोमवाहा इति त्रयः ॥
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥ १९ ॥
वर्गा एकोन पञ्चाशत्प्रसिद्धा मुनिभिः स्मृताः ॥
अप्रसिद्धाः परे वंश्या अन्तर्भूता इहैव ते ॥ २० ॥
विश्वामित्रात्रिगोत्रेण नोद्वहेयुर्धनञ्जयाः ॥
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ॥ २१ ॥
तथैव जातूकर्ण्याश्च वसिष्ठैस्त्रिभिः सह ॥
भरद्वाजेन शुङ्गेन विश्वामित्रस्य शैशिरेः ॥ २२ ॥
क्षेत्रे जातो द्विगोत्रर्षिः प्रोच्यते शौङ्गशैशिरिः ॥
विश्वामित्रभरद्वाजैस्तज्जानां तेन नान्वयः ॥ २३ ॥
कपिलानां भरद्वाजैर्विश्वामित्रैश्च नान्वयः ॥
गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रविड्गणैः ॥ २४ ॥
सगोत्राद्यनभिज्ञैश्च विप्रैराचार्यगोत्रजाः ॥

१ 'अर्हं वसिष्ठतोक्तिस्तु' इति ख. पाठः । २ रौक्ष्यश्च इति च. पाठः ।

दानादिनान्यगोत्राः स्युरज्ञातगुरुगोत्रिणः ॥ २५ ॥
समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः ।
प्रवरान्मानवेत्यस्मात्प्रवराद्वान्यगोचरः ॥ २६ ॥
इत्थं सगोत्रसंबन्धविवाहविषये स्थिते ।
यदि कश्चिज्ज्ञानतस्तां कन्यामूढ्वोपगच्छति ॥ २७ ॥
गुरुतल्पव्रताच्छुद्ध्येद्गर्भस्तज्जोऽन्त्यतां व्रजेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥ २८ ॥

अत्र प्रायश्चित्तप्रपञ्चः प्रायश्चित्तमयूखे वक्ष्यते ।

जामदग्न्या वत्सविदा आर्ष्टिषेणास्तथैव च ।
पञ्चावत्तिन एवैते अन्ये चतुरवत्तिनः' ॥ २९ ॥

अर्थतः पूर्वमेव व्याख्यातानि पद्यानि । इह कपिलानामित्यर्द्धं प्रक्षिप्तमिति टीकाकृतः ।

सगोत्रसप्रवरपरिणये प्रायश्चित्तमुक्तं मदनपारिजाते शातातपेन—

परिणीय सगोत्रां तु समानप्रवरां तथा ।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत् ॥

आपस्तम्बः—

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य वा ।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥
समानप्रवरां कन्यामेकगोत्रामथापि वा ।
विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम् ॥
उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् ।

अत्र प्रमादेन परिणयनमात्रे चान्द्रायणादि । अत्र गोत्रप्रवरनिर्णये बहुवक्तव्यमस्त्युपयोगाभावाद्विस्तृतिभयाच्च नोक्तम् । विचारबाहुल्यजिज्ञासुना द्वैतनिर्णये द्रष्टव्यम् ।

इति कन्यालक्षणादि ।

एतानेव धर्मान्वरेऽतिदिशति याज्ञवल्क्यः—

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
वरगुणाः यत्नात्परीक्षितः पुंस्त्वे युवा धीमाञ्जनप्रियः ॥ इति ।

अत्र भ्रातृमदनन्यपूर्वयवीयस्त्वरूपगुणत्रयभिन्नाः सर्वे गुणा अतिदिश्यन्ते । सवर्ण उत्तमवर्णो वा । असपिण्डादिगुणातिदेशादुभयतः सापि-

---

१ सगोत्राः इति च पाठः । २ सुवर्ण इति मुद्रितपु० पाठः ।

ण्ड्यनिवृत्तिरभिप्रेता । तेन वरनिरूपितं कन्यायां कन्यानिरूपितं च वरे पृथगेव सापिण्ड्यं नतु व्यासज्यवृत्ति उभयनिरूपितमेकमिति पितामहचरणाः । पुंस्त्वपरीक्षोक्ता नारदेन—

यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु पण्ढकः ॥ इति ।

गृह्ये—'बुद्धिमते कन्यां प्रयच्छेत्' इति । यमोऽप्याह—

कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥इति ।

सामुद्रिके—पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां हि लक्षणैः किं प्रयोजनम् ॥ इति ।

अन्यानि सामुद्रिकलक्षणानि विस्तरभिया नोक्तानि ।

इति वरगुणाः ।

अथ विवाहक्रमः । याज्ञवल्क्यः—

विवाहक्रमः । तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मनः ॥

तिस्र इत्यादिसङ्ख्या सवर्णाव्यतिरेकेण । मनुः—

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥

अत्र प्राञ्चः—रतिपुत्रधर्मार्थत्वेन विवाहस्त्रिविधः । पुत्रार्थो द्विविधः नित्यः काम्यश्च । अपुत्रस्य यः सुतार्थे विवाहः स नित्यः । एकस्मिन्पुत्रे जाते बहुपुत्रोत्पादनार्थे यो विवाहः स काम्यः । तत्र नित्ये सवर्णैव काम्यपुत्रोत्पादने शूद्राव्यतिरिक्ताः । रत्यर्थमनाश्रमित्वदोषपरिहारार्थे वा शूद्राऽपि परिणेया । न तु पुत्रोत्पत्त्युद्देशेन ।

यदुच्यते द्विजातीनां शूद्राचारोपसङ्ग्रहः ।
नैतन्मम मतं यस्मात्तत्राऽऽत्मा जायते स्वयम् ॥

इति हेत्वभिधानात् । नचैवं शूद्रापुत्रस्य विभागो न संगच्छत इति वाच्यम् । रत्यर्थं प्रवृत्तस्यानुपङ्गेण पुत्रे जाते वचनस्यार्थवत्त्वात् । यदि नित्यपुत्रोत्पादनार्थे सवर्णा न लभ्यते तदाऽनुकल्पार्थमप्यसवर्णापरिणयनमित्याहुः । विशेष उक्तो याज्ञवल्क्येन—

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्यादेदने त्वग्रजन्मनः ॥ इति ।

तथा—वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने । इति च ।
अग्रजन्मग्रहणेनोत्तमवर्णग्रहणम् । वैश्यायाः क्षत्रियेण सह विवाहे प्रतोद एव ।

इति विवाहक्रमः ।

अथ विवाहभेदाः—तत्र विवाहशब्दः [द्व्यर्थः] कन्यापितरं प्रति दानम्—'अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः' इति श्रुतौ दानविवाहशब्दयोः सामानाधिकरण्यात् । वरं प्रति पाणिग्रहणादि । अन्यथा 'उदगयनआपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः सार्वकालमेके विवाहं तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात्' इत्याश्वलायनेन विवाहात्पूर्वं होम उक्तोऽसंगतः स्यात् । नहि कन्यादानात्पुरस्तादेता आहुतयः सन्ति ।

मनुः—ब्राह्मो दैवस्तथैवाऽऽर्षः प्राजापत्यस्तथाऽसुरः ।
विवाहभेदाः । गान्धर्वो राक्षसश्चैव पैशाचस्त्वष्टमः स्मृतः ॥ इति ।

तत्र क्रमेणैवाष्टानां स्वरूपं फलं चाहाऽऽश्वलायनः—'अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहस्तस्यां जातो द्वादशावरान्द्वादशपरान्पुनात्युभयत ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो दशावरान् दशपरान्पुनात्युभयतः सह धर्मं चरत इति प्राजापत्योऽष्टावरानष्टपरान्पुनात्युभयतो गोमिथुनं दत्त्वोपयच्छेत स आर्षः सप्तावरान्सप्त परान्पुनात्युभयतो मिथः समयं कृत्वोपयच्छेत स गान्धर्वो धनेनोपतोष्योपयच्छेत स आसुरः सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचो हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः' इति ।

एतेषु गुणदोषानाह मनुः—

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः ।
इतरेष्ववशिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥

नृशंसा हिंस्राः । ब्रह्मद्विषो वेदद्विषः । गान्धर्वादिष्वनन्तरं होमादिकमपि कार्यम् । तद्विना भार्यात्वानुत्पत्तेः । तथाऽऽह देवलः—

गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैः समर्थेनाग्निसाक्षिकः ।

वसिष्ठोऽपि—बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥

अत्र व्यवस्थामाह मनुः—

विवाहव्यवस्था। चतुरो ब्राह्मणस्याऽऽद्यान्प्रशस्तान्कवयो विदुः।
राक्षसं क्षत्रियस्यैवमासुरं वैश्यशूद्रयोः॥ इति।

राक्षसः क्षत्रियस्य मुख्यः। आसुरो वैश्यशूद्रयोर्मुख्यः। अनुकल्पमाह स एव—

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्॥ इति।

अस्यार्थः—ब्राह्मणस्य ब्राह्माद्या गान्धर्वान्ताः षडेव नेतरौ। एवं च क्षत्रियादेर्ब्राह्माद्यनुज्ञा। आसुरादयश्चत्वारः क्षत्रियस्य धर्म्याः। वैश्यशूद्रयोरपि राक्षसवर्जमेत एव। एवं च राक्षसं क्षत्रियस्यैव। ब्राह्मणस्य षट्। नेतरौ। क्षत्रियस्य सर्वे। आसुरं निन्दति कश्यपः।

क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः॥ इति।

यमः— कन्याविक्रयिणो मूर्खा रहःकिल्बिषकारिणः।
कन्याविक्रयिणो निन्दा। पतन्ति नरके घोरे दहन्त्यासप्तमं कुलम्॥ इति।

एतच्चात्मार्थे धनग्रहणे दोषः कन्यार्थे तु न दोषः। यथाह मनुः—

यासां नाऽऽददते शुल्कं ज्ञातयो न स विक्रयः।
अर्हणं तत्कुमारीणामानृशंस्यं तु केवलम्॥

आनृशंस्यममायित्वम्। ब्राह्मणस्यापि पैशाचमनुजानाति वत्सः—

सर्वोपायैरसाध्या स्यात्सुकन्या पुरुषस्य या।
चौरेणापि विवाहेन सा विवाह्या रहःस्थिता॥ इति।

विवाहमध्ये स्त्रीणां रजोदर्शने विशेषमाह यज्ञपार्श्वः—

विवाहे कन्यारजोदर्शने कर्तव्यम्। विवाहे वितते तन्त्रे होमकाल उपस्थिते।
कन्याया ऋतुरागच्छेत्कथं कुर्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि।
युञ्जानामाहुतिं हुत्वा ततस्तन्त्रं प्रवर्तयेत्॥ इति।

इति विवाहभेदाः।

अथ कालः। अत्र गृह्यम्—'उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः' इति। यत्तु 'सार्वकालमेके विवाहम्'

---

१ भपापित्वमिति च पाठः।

इति तद्दक्षिणायनप्राप्त्यर्थमिति धर्मप्रकाशे पितामहचरणाः । आसुरादि-विवाहविषयमिति केचित् । नारदः—

माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः ।
मध्यमः कार्तिको मार्गशीर्षको निन्दिताः परे ॥
न कदाचिद्दशर्क्षेषु भानोरार्द्राप्रवेशनात् ।
विवाहं देवतानां च प्रतिष्ठां नोपनायनम् ॥

अत्र यद्यपि शेषा निन्दितास्तथापि 'भानोरार्द्राप्रवेशनात्' इति पुनः श्रुत्याऽऽषाढोऽप्यनुज्ञातः स च, 'आर्द्राप्रवेशनात्पूर्वमिति । अत्र च विधि-निषेधाः सौरमानाभिप्रायेण । यथोक्तं गर्गेण—

—— सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः । इति ।

कश्यपेन चान्द्रमानमप्युक्तम्—

उपवासव्रतोद्वाहयात्राक्षौरोपनायनम् ।
तिथिवर्षादि निखिलं चान्द्रमानेन गृह्यते ॥ इति ।

मदनरत्ने मिहिरः ज्येष्ठमासं प्रक्रम्य—

ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते ।
तयोरन्यतरे ज्येष्ठे ज्येष्ठमासो न शस्यते ॥
द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं शुभावहम् ॥
ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम् ।

ज्येष्ठा कन्या वरोऽपि ज्येष्ठः ज्येष्ठमासश्चेति त्रिज्येष्ठम् । ज्येष्ठानक्षत्रेण वा त्रिज्येष्ठम् । ज्येष्ठानक्षत्रं ज्येष्ठमासः ज्येष्ठा कन्येत्यपि त्रिज्येष्ठम् । चतुर्ज्येष्ठे त्रिज्येष्ठस्य सद्भावान्निषेधप्रवृत्तिरस्त्येव । ज्येष्ठशब्देन त्वाद्यगर्भोत्पन्नमपत्यं, तदाह श्रीपतिः—

आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु जातु मङ्गलम् । इति ।

तथा पक्षोऽपि पूर्वमापूर्यमाण उक्तः । बृहस्पतिः कृष्णमप्याह—

शुक्लपक्षः शुभः प्रोक्तः कृष्णोऽप्यन्त्यत्रिकं विना । इति ।

जन्मपक्षस्तु निषिद्धः—

विवाहे चोपनयने जन्ममासं विवर्जयेत् ।
विशेषाज्जन्मपक्षं तु वसिष्ठाद्यैरुदाहृतम् ॥ इति ।

तिथ्यादिप्राशस्त्यनिषेधादि ज्योतिःशास्त्रादवगन्तव्यम् ।

इति विवाहकालनिर्णयः ।

---

१ सौरमासेति च पाठः । २ ज्येष्ठमासः प्रशस्यते इति पाठान्तरम् ।

अथ विवाहकालः। बौधायनः—

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे।

विवाहकालः। अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्॥ इति।

उपरोधनेन रजस्वलाप्रयोजको न भवेदित्यर्थः। पुराणेऽपि—

यावन्न लज्जया याति कन्या पुरुषसन्निधौ।
योन्यादीन्नावगूहेत तावद्भवति कन्यका॥

यमः—अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥ इति।

ऊर्ध्वं द्वादशे वर्षे इत्यर्थः। उक्तं च संवर्तेन—

अष्टमे तु भवेद्गौरी नववर्षा तु रोहिणी।
दशमे कन्यका प्रोक्ता द्वादशे वृषली भवेत्॥

वृषली रजस्वला। यथोक्तं देवलेन—

वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥ इति।

यमस्तु दोषमाह—

विवाहे दोषाः। प्राप्ते द्वादशके वर्षे यः कन्यां न प्रयच्छति।
मासि मासि रजस्तस्याः पिता पिबति शोणितम्॥

द्वादशवर्षग्रहणं प्रायिकम्। कस्याश्चित्तत्रापि तद्दर्शनाभावात्। अतो रजोदर्शनं विवाहात्पूर्वं यथा न भवति तथा कुर्यादित्युक्तं भवति। अतश्च—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।

इत्यादिमनूक्तिः संगच्छते। अस्याश्च ग्रहणेऽपि दोषमाह यमः—

यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः॥

यत्तु मनुः—काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि।

नत्वेवैनां प्रयच्छेत गुणहीनाय कर्हिचित्। इति।

तदपि शब्दात्कामशब्दाच्च न स्वार्थपरम्। किंतु गुणवते दानप्रशंसार्थम्। अग्रे स्वयमेव बाहुल्येन दोषाभिधानात्। कन्यादाने फलमाह मनुः—

नाग्निहोत्रादिभिस्तत्स्याद्रक्षातो ब्राह्मणस्य वा।
यत्कन्यां विधिवद्दत्त्वा फलमाप्नोति मानवः॥ इति।

सालंकृतिकन्यादाने विशेषमाह संवर्तः—

अलंकृत्य तु यः कन्यां भूषणाच्छादनादिभिः
दत्त्वा स्वर्गमवाप्नोति पूज्यते वासवादिभिः॥
कूपदश्चाश्वमेधी च प्राणदाता भयेषु च।
समं यान्ति रथा एषां त्रयो वै नात्र संशयः॥ इति।

'सत्कृत्यालंकृतां कन्यां यो ददाति स कूपदः' इति कोशः। क्वचि-त्कुकुद इति पाठः। न चेदं फलश्रवणात्काम्यमेवेति वाच्यम्, अप्रदाने दोषश्रवणात्। अतो जातेष्टिवन्नित्यं काम्यं च। तथा कालान्तरमपि—

वैवाहिको विधिः स्त्रीणामौपनायनिकः परः। इति।

ये उपनयने कालाः पञ्चमवर्षादयस्त एव कन्याविवाहे। मनुर्विशेषमाह—

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षणः॥

अप्राप्तां कालमप्राप्तामित्यर्थः। वरानुरोधेन देयेत्यर्थः।

इति विवाहकालः।

अथ दातृक्रमः। याज्ञवल्क्यः—

कन्यादातृक्रमः।

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः।
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ॥

नारदेन त्वन्येऽप्युक्ताः—

पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे दातॄणां प्रकृतौ यदि वर्तते॥
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥

प्रकृतिस्थ उन्मादादिदोषशून्यः। वयोविशेषेण फलमाह मरीचिः—

कन्यावयोविशेषेण दानफलविशेषः।

गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत्।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम्॥ इति।

गौर्यादिस्वरूपमुक्तं प्राक्। यदि ऋतुदर्शनेऽपिता चेन्न ददाति तदा कन्या वर्षत्रयं प्रतीक्ष्य स्वयमेव वरयेत्। तदाह बौधायनः—

स्वयंवरणम्।

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम्।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्॥

यत्तु विष्णुः—ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम्। इति।

---

[1] जामय इति।

तद्गुणवद्दूरविषयम् । इयं प्रतीक्षा दातृसद्भावे । यदा तु कोऽपि दाता नास्ति तदा राजा दद्यात् । यथाह नारदः—

यदा तु कश्चिन्नैव स्यात्कन्या राजानमाव्रजेत् । इति ।

यदा राजाऽपि न ददाति तदा स्वयंवरं कुर्यात् । याज्ञवल्क्यः—

गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् । इति ।

गम्यं गमनार्हम् । तथा पित्राज्ञयाऽपि स्वयंवर उक्तो भारते सावित्र्युपाख्याने—

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥

तथा नलोपाख्यानेऽपि—

स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनाम् ।
अपश्यदात्मनः कार्यं दमयन्त्याः स्वयंवरम् ॥ इति ।

स्कान्दे विशेषः—अलंकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्मेण विधिना दातुमसगोत्रोऽपि युज्यते ॥ इति ।

तत्फलं तत्रैव—अनाथां कन्यकां दृष्ट्वा सदृशाभ्यधिके वरे ।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम् ॥ इति ।

अतोऽन्यकन्याऽन्येनापि धर्मार्थं देया । इति दातृस्वयंवरनिर्णयः ।

अथ दत्तापहारः । तत्र दत्तापहारे दण्डमाह याज्ञवल्क्यः—

सकृत्प्रदीयते कन्या हरँस्तां चौरदण्डभाक् । इति ।

दत्तकन्यापहारविषये दण्डादि ।

नारदोऽपि—दत्तां न्यायेन यः कन्यां वराय न ददाति ताम् ।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत् ॥

दत्तां वाग्दत्ताम् । अदुष्टश्चेदित्यनेन दुष्टाय न देयेति गम्यते । उक्तं च गौतमेन—'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्' इति । याज्ञवल्क्योऽपि—

दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् । इति ।

यत्तु मनुनोक्तम्—एतत्तु न परे चक्रुर्नापरे जातु साधवः ।
यदन्यस्याभ्यनुज्ञाय नरस्यान्यस्य दीयते ॥

यच्च—सकृदंशो निपतति सकृत्कन्या प्रदीयते । इति ।

तद्दोषवर्जितविषयम् । दुष्टेनापि यदि पाणिग्रहणसमयाद्यन्तं क्रियते तनो नैव ग्राह्या । अत एव नारदः—

---

१ न च [illegible] इति मनुस्मृति[illegible] । २ [illegible]

स्त्रीपुंसयोस्तु संबन्धाद्वरणं प्राग्विधीयते ।
वरणाद्ग्रहणं पाणेः स संस्कारो विलक्षणः ।
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ॥ इति ।

तयोर्वरणपाणिग्रहणयोर्मध्ये वरणमनियतं यतो तद्दोषदर्शनात्प्रत्यावर्तेत इत्यर्थः ।

यमोऽपि—नोदकेन न वाचा वा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतिः स्यात्सप्तमे पदे ॥ इति ।

अनेन च सप्तपद्याः प्राग्वरमरणे न वैधव्यमिति गम्यते। वसिष्ठेनाप्युक्तम्—
अद्भिर्वाचा च दत्तायां म्रियेताऽऽदौ वरो यदि ।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥ इति ।

वरणोत्तरं देशान्तरगमन आह कात्यायनः—

शुल्कदातुर्देशान्तरगमनादिपुक्तव्यम् ।

वरयित्वा तु यःकश्चित्प्रणश्येत्पुरुषो यदा ।
ऋत्वागमांस्त्रीनतीत्य कन्याऽन्यं वरयेत्पतिम् ॥ इति ।

प्रणश्येद्देशान्तरं गच्छेदिति माधवः। अन्यथा प्रतीक्षायैवध्यात्[1] । एवं च
प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्याऽन्यं वरयेद्वरम् ॥

इति नारदीयेनाप्येकार्थता भवति । शुल्कदातुर्देशान्तरगतौ कात्यायन आह—
प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः ॥ इति ।

शुल्कदमरणे मनुराह—
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

यदिकन्यानुमन्यते इत्यनेन कन्यानुमतौ देवराय यदि तु देवरातिरिक्तमेवानुमन्यते तदा तस्मा एव ।

बहुभिर्निर्दोषैर्वरणे कृते विशेषमाह कात्यायनः—
अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै ।
पूर्वागतश्च[1] सर्वेषां लभेताध्वरः सुताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छेत[2] वोढायां दत्तं पूर्ववरो हरेत् ॥

---

१ पराग तश्चेति च पाठः । २ आगच्छेदिति पाठः ।

अन्यस्मै दत्तायां तस्यां यच्छुल्कं तदेव लभेतेत्यर्थः। सदोषाय प्रथमं प्रतिश्रुताऽपि न देया—

दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्। इति स्मृतेः।

वसिष्ठस्तु पाणिग्रहणोत्तरमपि ग्राह्येत्याह—

पाणिग्रहे कृते कन्या केवलं मन्त्रसंस्कृता।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति॥

नारदोऽपि—उद्वाहिताऽपि सा कन्या न चेत्संप्राप्तमैथुना।
पुनः संस्कारमर्हेत्सा यथा कन्या तथैव सा॥

अयं चोद्वाहोत्तरमपहारः कलौ निषिद्धः। कलिनिषिद्धानि च समयमयूखे वक्ष्यन्ते। वाग्दानोत्तरं तु कन्यादोषोपलम्भे गृहीताया अपि त्यागमाह मनुः—

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्। इति

विगर्हितां दुष्टाम्। नारदः—

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम्।
दोषे सति न दोषः स्यादन्योन्यं त्यजतोर्द्वयोः॥

कन्यादोषा नारदेन दर्शिताः—

कन्यादोषाः।

दीर्घकुत्सितरोगार्ता व्यङ्गा संस्पृष्टमैथुना।
धृष्टाऽन्याहितभावा वा कन्या दुष्टा प्रकीर्तिता॥ इति।

अन्यस्मिन्पुरुषान्तरे आहितः कृतो भावो मानसाभिलाषो यया सा तथोक्ता।

अदुष्टात्यागे दोषमाह याज्ञवल्क्यः—

अदुष्टां च त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम्। इति।

कन्यादोषमनाख्याय ददत्पित्रादिरपि दण्ड्य इत्याह स एव—

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम्। इति।

इतिदत्तापहारनिर्णयः॥

अधिवेदने निमित्तान्याह याज्ञवल्क्यः—

अधिवेदननिमित्तानि।

सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥

धूर्ता विसंवादशीला। अधिवेदनं भार्यान्तरपरिग्रहः। विशेषमाह मनुः—

मद्यपाऽसत्यवृत्ता च प्रतिकूला च या भवेत्।
व्याधिता चाधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा॥

वन्ध्याऽष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

एतेषु निमित्तेष्वधिवेत्तव्येत्यभ्यनुज्ञामात्रं नत्वधिवेदनाकरणे प्रत्यवायः ॥

याज्ञवल्क्यः—

अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत् ।
अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यासां दत्ते त्वर्धं प्रकल्पयेत् ॥ इति ।

इत्यधिवेदनम् ।

अथ विवाहोपनयनादौ निषेधास्त उच्यन्ते । सारावल्याम्—

विवाहोपनय-नादौ निषेधाः ।

एकमातृप्रसूतानामेकस्मिन्वत्सरे यदि ।
विवाहं नैव कुर्वन्ति कुर्वन्ति तु ततोऽन्यथा ॥

(ततोऽन्यथा) भिन्नमातृकयोर्वत्सरभेदेन वा । प्रयोगपारिजाते स्मृत्यन्तरे—

विवाहस्त्वेकजन्यानामेकस्मिन्नुदये कुले ।
नाशं करोत्येकवर्षे स्यादेका विधवा तयोः ॥

उदयो लग्नम् । कचिदपवादस्तत्रैव—

एकोदरीकरतलग्रहणं यदि स्यादेकोदरस्थवरयोः कुलनाशनं च ।
एकाब्दके तु विधवा भवतीति कन्या नचान्तरे तु शुभदं पृथुशैलरोधे ॥

विशेषमाह नारदः—

पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये ।
न कार्यं व्रतमुद्वाहान्मङ्गले नाप्यमङ्गलम् ॥
विवाहश्चैव कन्यानां षण्मासाभ्यन्तरे यदि ।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ॥ इति ।

मङ्गले विवाहादौ । अमङ्गलं श्राद्धादि । अनुकल्पमाह गर्गः—

अनुकल्प. ।

पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम् ।
पुत्र्यन्तरस्य कुर्वीत नोद्वाहमिति सूरयः ॥

अनुकल्पान्तरमाह स एव—

भ्रातृयुग्मे स्वसृयुग्मे भ्रातृस्वसृयुगे तथा ।
न जातु मण्डनं कार्यमेकस्मिन्मण्डपेऽहनि ॥ इति ।

भ्रातृयुग्मस्य स्वसृयुग्मस्य भ्रातृस्वसृयुग्मस्य चैकस्मिन्नहन्येकस्मिन्मण्डपे मण्डनं न कुर्यात् । पृथगयं निषेधः । समुच्चये मानाभावात् । इदं

च वचनद्वयं भिन्नमातृजविषयमिति केचित् । तन्न मानाभावात् । एकोदराहितैकशुक्रजन्यापत्ययोर्मुख्यस्य भ्रातृशब्दस्यान्यत्र गौणत्वाच्च ।

अन्यं विशेषमाह नारदः—

प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम् ।
न चैकजन्मनोः पुंसोरेकजन्ये तु कन्यके ।
नूनं कदाचिदुद्वाहौ नैकदा मुण्डनद्वयम् ॥ इति ।

नूनं कदाचिदुद्वाहौ इति सापत्नपरम् । मुण्डनद्वयं सापत्नयोरपि न भवति । दुहितृद्वयं न देयमित्यध्याहारः । कन्यके न देये इति च । विशेषान्तरं संहितासारावल्याम्—

सापत्नयोर्मुण्डनमूर्ध्वमिष्टं न पुत्रयोर्मुण्डनमेकवर्षे ।
न पुंविवाहोर्ध्वमृतुत्रयेऽपि विवाहकार्यं दुहितुः प्रकुर्यात् ॥

अत्रापवादः—

न मण्डनाच्चापि हि मुण्डनं तु गोत्रैकतायां यदि नाब्दभेदः ।

इत्यपि कश्चित् । मुण्डनं चौलम् ।

मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मण्डनम् । इति ।

अत्रिः—कुले ऋतुत्रयादर्वाङ्मण्डनादपि मुण्डनम् ।
प्रवेशान्निर्गमं चैव न कुर्यान्मण्डनत्रयम् ॥
पुत्रीपरिणयादूर्ध्वं पुत्रस्योद्वाहनक्रिया ।
न दुष्टा स्यान्मातृभेदे गृहभेदेऽपि चैव हि ॥
पुरुषत्रयपर्यन्तं प्रतिकूलं सगोत्रिणाम् ।
प्रवेशनिर्गमौ तद्वत्तथा मण्डनमुण्डने ॥ इति ।

ऋतुत्रयापवाद उक्तः सारावल्याम्—

फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने ।
भेदादब्दस्य कुर्वीत नर्तुत्रयविलङ्घनम् ॥ इति ।

यमलयोर्विशेषः—

एकस्मिन्वत्सरे चैव वासरे मण्डपे तथा ।
कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ इति ।
पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः ॥

इति मण्डनमुण्डनविचारः ।

---

१ न मण्डनान्मुण्डनमिति इ. पाठः । २ विलम्बनम् इति पाठो के ।

हारीतोऽन्यं विशेषमाह—

स्पर्शिता स्याद्यदा कन्या वाचोऽपि ह्युदकेन च ।
अन्तरा प्रातिकूल्यं चेत्पूर्वोढा विधवा भवेत् ।
अचिरेणैव कालेन पशुभृत्यधनक्षयः ॥ इति ।

प्रातिकूल्यं मरणम् । दक्षः—

दम्पत्योः पितरौ भ्राता सोपनीतः सहोदरः ।
पितृव्यसदृशश्चैव पितामहपितामही ।
एषामन्यतमे नष्टे नोद्वहेत्तां वधूं वरः ॥

ज्योतिःप्रकाशे—प्रतिकूलेऽपि कर्तव्यो विवाहो मासतः परम् ।
शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेत्पुनः ॥ इति ।

शान्तिर्नवग्रहयज्ञादिः । इति प्रतिकूलविचारः ।

इति निषेधाः ।

[अथ विवाहाग्न्यनुगमनादौ प्रायश्चित्तम् । तत्र गृहप्रवेशनीयहोमात्पूर्वं द्वादशरात्रमध्ये विवाहाग्न्यनुगमने श्रोत्रियागारादग्निमानीयाऽऽयतने स्थापयित्वा परिसमूहनादि कृत्वाऽऽज्यं संस्कृत्य 'अयाश्च' इत्येकामाहुतिं हुत्वा नित्यहोमं कुर्यात् । द्वादशरात्रोत्तरमाज्याहुतयो लाजाहुतयश्चाऽऽवर्तनीयाः। न्दं च 'नित्यानुगृहीतः स्यात्' इति सूत्रव्याख्यावसरे देवस्वामिभाष्ये त्थमुक्तम् 'उपशान्तेऽन्यमग्निमाहृत्य होमकार्यं आहरणप्रायश्चित्तं कृत्वा परिचरणं स्यात्' इति । नारायणेन वृत्तिकृता तु 'यदि विवाहाग्निर्नष्टः स्यान्नष्टाहरणप्रायश्चित्तं कृत्वा परिचरेत्' इत्युक्त्वा 'यदि तूपशाम्येत्पत्न्युपसेदित्येके' इति सूत्रव्याख्यावसरे पुनरेवमुक्तम् । अत्र एकेग्रहणाद्यजमानो वेत्येके 'अयाश्च' इत्येकामाहुतिं जुहुयादित्यन्ये । कुतः शाखान्तरे दर्शनात् इति । अत्र शाखान्तरम् 'उपवासश्चान्यतरस्य भार्यायाः पत्युर्वाऽनुगतेऽपि वोत्तरया जुहुयान्नोपवसेत्' इत्यापस्तम्बसूत्रम् । अन्यतरस्य कालस्य अन्हो रात्रेर्वा संबन्धादुपवासोऽनशनम् । 'उत्तरया 'अयाश्च' इत्येतयाऽऽज्येनजुहुयात्' इति सुदर्शनभाष्ये स्थितम् । इदमेव देवस्वामिभाष्ये स्पष्टतम् । गृहप्रवेशनीयहोमोत्तरं द्वादशरात्रमध्येऽनुगमने उक्तप्रायश्चित्तमेव। कृतम् । गृहप्रवेशनीयहोमस्य चाऽऽवृत्तिरिति वृत्तिग्रन्थे स्पतदूर्ध्वं तु विवाहहोमस्य गृहप्रवेशनीयहोमस्य

---

१ वाचा वाऽप्युदकेन च इति पाठो ङे । २ पितृव्यस्ताहृश इति ङ. । ३ अथ कुण्डलितो ग्रन्थः च. पुस्तक एव दृश्यते । स च यद्यपि वधूगृहप्रवेशानन्तरं निवेशयितुमुचितस्तथा- प्यादर्शपुस्तकेऽत्र दृष्टत्वात्तथैव स्थापितः ।

ष्टम्। तथाहि गृहप्रवेशनीयसूत्रे 'विवाहाग्निमुपसमाधाय' इत्यत्र विवाहाग्निग्रहणान्न विवाहहोममात्रेणाग्नेर्गृह्यत्वसिद्धिः, किं तर्हि विवाहहोमगृहप्रवेशनीयहोमाभ्यामेवेत्युक्त्वोपसंहृतम्। तेनाग्निनाशे होमद्वयं कार्यमिति सिद्धमिति। तदनन्तरं पाणिग्रहणसूत्रे नष्टाहरणप्रायश्चित्तमुक्त्वा मतान्तरमुक्तम्। यदि त्रेताग्न्यो न गृहीतः दायविभागकाले गृह्यते गृहीतो विनष्टः द्वादशरात्रमतिक्रान्तस्तत उक्तया क्रियया पश्चाद्गृहीतो भवति। तत्र विवाहाज्याहुतयो लाजाहुतयो गृहप्रवेशनीयाहुतयश्च हृदयाञ्जनं च भवति नान्यत्। कन्यासंस्कारत्वाद्धोमद्वयं चात्र समानतन्त्रं स्यादिति। अत्र सर्वत्र मूलं चतुरध्यायात्मकाश्वलायनगृह्यपरिशिष्टम्। तत्र प्रथमाध्याये सप्तदशः खण्डः—अथ पुनराधानमनुगतेऽग्नि शिष्टागारादानीयोन्नवदुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्याऽऽज्यमुत्पूयायाश्चाग्न इत्येकामाज्याहुतिं हुत्वा यथापूर्वं परिचरेदेवमाद्वादशरात्रादत ऊर्ध्वं विवाहगृहप्रवेशनीयहोमाभ्यामेकतन्त्राभ्यामादध्यात्तत्र विवाहाज्याहुतयो लाजाहुतयो गृहप्रवेशनीयाहुतयो हृदयाञ्जनं भवति। कर्तैव लाजानावपत्येतत्पुनराधानम्। नित्यहोममतीत्य मनस्वत्या चतुर्गृहीतं जुहुयादाद्वादशरात्रादूर्ध्वं पुनराधानमेव कुर्यादिति। गृह्यसत्रगृह्यपरिशिष्टमूलिकाश्चात्र गृह्यकारिकाः।

औपासनोऽनुगच्छेच्चेदुपलेपादि पूर्ववत्।
आहृत्य श्रोत्रियागारात्प्रतिष्ठाप्य हविर्भुजम्।
अन्यस्माद्धोमकालात्स्त्री नाश्नीयाद्यदि वा गृही।
पर्युक्षणादिकं कृत्वा संस्कृत्याऽऽज्यं च पूर्ववत्।
अयाश्चेत्येतया हुत्वा यथापूर्वं जुहोत्यथ॥ इति।

तथा—उपलेपादिकं कुर्यादाघारान्तं विवाहवत्।
विवाहाज्याहुतीर्हुत्वा लाजहोमो भवेदथ।
गृहप्रवेशनीयाश्च हुत्वाऽस्या हृदयाञ्जनम्।
परिणीत्यादि नान्यत्स्याल्लाजानावपते स्वयम्।
समानतन्त्रकं चेह होमद्वयमिदं भवेत्। इति।

अस्याग्निनाशापहारयोरिदमेव प्रायश्चित्तं 'यदि तूपशाम्येत्' इति सूत्रस्य नाशापहारयोः प्रदर्शनार्थत्वात्। अत्र प्रयोगपारिजातग्रन्थ इत्थम्—'एवं हि रक्षितोऽग्निर्गृहप्रवेशनीयहोमाद्र्वागनुगतश्चेत्तदा विवाहहोमः पुनः कार्यः। गृहप्रवेशनीयहोमानन्तरमुपगतश्चेत्तर्हि होमद्वयमपि पुनः कर्त-

न्यमिति गृहप्रवेशनीयहोमसूत्रे वृत्तिकारेणोक्त्वा तद्वादशरात्रादायनुसन्धेयमिति । अस्माद्विवाहहोमोत्तरं गृहप्रवेशनीयहोमात्पूर्वं द्वादशरात्रमध्येऽप्यग्न्यनुगमने विवाहहोमावृत्तिं मन्यन्ते यथाश्रुतग्राहिणः । तद्दृष्टान्ताज्ञानविजृम्भितम् । यतो गृहप्रवेशनीयहोमोत्तरं द्वादशरात्रोत्तरमेव होमद्वयावृत्तिर्वृत्तिकारादीनामिष्टेत्युक्तमेव । अतस्तद्वदत्रापीत्यनेनापि द्वादशरात्रोत्तरं गृहप्रवेशनीयहोमात्पूर्वमग्न्यनुगमने विवाहहोमावृत्तिरिति तद्ग्रन्थार्थो ज्ञेयः । न च नित्यहोमारम्भात्पूर्वमनुगमने तदावृत्तिः होमारम्भोत्तरं तु प्रायश्चित्तमिति शङ्क्यम् । गृहप्रवेशनीयहोमोत्तरं नित्यहोमारम्भात्पूर्वमपि होमद्वयावृत्तिप्रसङ्गात्प्रमाणाभावाच्च ।

यत्तु औपासनात्पूर्वं यदि विवाहाग्निः शाम्येत तदा प्रायश्चित्तमुक्तं विश्वादर्शे—

उद्वाहोपासनात्पूर्वमनले शान्तिमागते ।
स्थालीपाकं ततः कृत्वा औपासनमथाचरेत् ।
नवनाडीभ्य ऊर्ध्वं चेत्स्थालीपाको भवेन्न वै ।
औपासनं तदा कुर्यात्परेद्युः सायमेव च ।

इति विधानपारिजात उक्तं तदाश्वलायनान्यपरम् । आश्वलायनाना प्रायश्चित्तार्थं स्थालीपाकाभावात् । वस्तुतस्तु विश्वादर्शग्रन्थेऽदर्शनान्निर्मूलमेव । यत्तु आपस्तम्बीयाश्वलायनीयपद्धतिकारौ सिंगाभट्टकृष्णभट्टौ विवाहहोमोत्तरमेवाग्निनाशे पुनर्विवाहहोमप्रतिपादकम्—

उद्वाहोपासनात्पूर्वमनले शान्तिमागते ।
पुनर्होमान्तरं कृत्वा कर्मशेषं समापयेत् ।

इत्यापस्तम्बवचनमिति लिलिखतुः तत्प्रवरदेवस्यैकाङ्गाध्यायात्मकापस्तम्बस्मृतौ निबन्धान्तरे चादर्शनाद्बहुसंग्रहकारप्रयोगपारिजातकारेणालिखनाच्च नाऽऽश्वासनीयम् ।

इत्यग्न्यनुगमनप्रायश्चित्तनिर्णयः ।]

अथाशौचनिर्णयः । याज्ञवल्क्यः—

आशौचनिर्णय ।

दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥

विष्णुः—व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

प्रारम्भमाह सः—

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ इति ।

बृहस्पतिः—

' विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः ॥ इति ।

षड्विंशन्मते—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥

परैरसगोत्रैः ।

भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥ इति ।
अन्नं त्याज्यं । तथाच ब्राह्मे—
भोजनार्द्धे तु संभुक्ते विप्रे सूतिर्विपद्यते ।
यदि कश्चित्तदोच्छिष्टं शेषं त्यक्त्वा समाहितः ।
आचम्य परकीयेन तोयेन शुचयो द्विजाः । इति ।

आवश्यकत्वे नान्दीश्राद्धावधिरुक्तः स्मृत्यन्तरे—

एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
त्रिषट्चौलोपनयने नान्दीश्राद्धं विधीयते ॥ इति ।

आरम्भाभावेऽप्यग्रे कालान्तराभावे आशौचाभाव उक्तो विष्णुना—

अनारब्धविशुद्ध्यर्थं कूश्माण्डैर्जुहुयाद्घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुध्यति सूतकी ॥

सूतकीतिं जननाशौचं प्रत्येवेदं प्रवर्तते । बहूनां संभाराणां संपादितानां धारणाशक्तावाह विष्णुः—

' न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरपि ' इति । आशौचं नेत्यर्थः ॥

इत्याशौचनिर्णयः ।

रजोदोषे वृद्धमनुः—विवाहव्रतचूडासु माता यदि रजस्वला ।
तदा न मङ्गलं कार्यं शुद्धौ कार्यं शुभेच्छुभिः ।
गर्गः—यस्योद्वाहादिमङ्गल्ये माता यदि रजस्वला ।
तदा न तत्कर्तव्यमायुःक्षयकरं यतः ॥ इति ।

मेधातिथिः—

चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि।
भार्या रजस्वला यस्य प्रायस्तस्य न शोभनम्॥

रजोदोषे विधानादि।

वधूवरान्यतरयोर्जननी चेद्रजस्वला।
तस्याः शुद्धेः परं कार्यं माङ्गल्यं मनुरब्रवीत्॥

बृहस्पतिः—वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने।
चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः॥

अथ वेदिः।

तथा—सूतिकोदक्ययोः शुद्ध्यै गां दद्याद्धोमपूर्वकम्।
प्राप्ते कर्मणि शुद्धिः स्यादितरस्मिन्न शुध्यति॥
अलाभे सुमुहूर्तस्य रजोदोषे च सङ्कटे।
श्रियं संपूज्य तत्कुर्याद्ब्रह्मत्याभयं नहि॥
हैमीं माषमितां पद्मां श्रीसूक्तविधिनाऽर्चयेत्।
प्रत्यृचं पायसं हुत्वा अभिषेकं समाचरेत्॥ इति।

अस्य मूलं मृग्यम्।

विवाहवेदिमाह नारदः—

हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समन्ततः।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णैर्वामभागे स्वसद्मनः॥

वेदिवि-धानम्।

विचित्रितां चित्रकुम्भैर्विविधैस्तोरणाङ्कुरैः।
एवंविधामारोहयेन्मिथुनं साग्नि वेदिकाम्॥ इति।

इति वेदिः।

अथ कन्यादानार्थं रात्रावपि स्नानमाह वृद्धयाज्ञवल्क्यः—

ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च।

कन्यादा-नार्थं रात्रावपि स्नानानुज्ञा।

स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते[1]॥

विवाहेऽपि रात्रिमनुजानात्यत्रिः—

मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः।
निशायां मध्यमः प्रोक्तस्त्वपराह्णे तु गर्हितः॥ इति।

विवाहश्च कन्यापितरं प्रति दानम्। वरं प्रति पाणिग्रहणादि। कन्या शुल्कवताऽपि प्रतिग्राह्येत्याह व्यासः—

---

१ पाणिग्रहणमङ्गलमिति च. पाठः।

भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा ।
उपोषितः सुतां दद्यादर्चिताय द्विजाय तु ॥ इति ।

सर्वेषु दानेषु प्राङ्मुखो दातोदङ्मुखः प्रतिग्रहीता । कन्यादान उदङ्मुखो दाता प्राङ्मुखं संप्रदानम्' इति वक्ष्यते दानमयूखे ।

मधुपर्कमाहाऽऽश्वलायनः–

ऋत्विजो वृत्वा मधुपर्कमाहरेत्स्नातकायोपस्थिताय' इति उपस्थिताय कन्याप्रतिग्रहार्थमागताय।अस्मिन्मधुपर्के गवालम्भः कलौ न कार्यः पादप्रक्षालने मधुपर्कविशेषेण विशेषमाहाऽऽश्वलायनः–' दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्सव्यं शूद्राय'इति। अग्रे प्रथमम् । एवं च क्षत्रियवैश्ययोरनियमः । ब्राह्मणग्रहणं द्विजोपलक्षणमिति केचित् । मधुपर्कश्च भोजनम् । तथाच नारायणेन ' नामांसो मधुपर्को भवति ' इति सूत्रव्याख्यान उक्तम् । 'मांसस्य लोके व्यञ्जनस्थानीयत्वात्तत्सहितो मधुपर्को भोजनम् ' इति । अयं चार्च्यशाखया कार्यः । तदुक्तं परिशिष्टे–

मधुपर्कः।

अर्च्यस्य यस्य या शाखा तच्छाखागृह्यचोदितः ।
मधुपर्कः प्रदातव्योऽप्यन्यशाखेऽपि दातरि ॥ इति ।

याज्ञिकास्तु ज्योतिष्टोमादावन्यशाखीयोऽपि यच्छाखीयमार्त्विज्यं करोति तच्छाखया कुर्वन्ति । तत्संप्रदायमात्रम् । कन्यादानं तु दानमयूखे वक्ष्यते ।

इति मधुपर्कः ।

अथ वधूप्रवेशः । मिहिरः–

वधूगृहप्रवेशः

विवाहस्य निवृत्तिस्तु चतुर्थेऽहनि रात्रिषु ।
तासु नागबलिः कार्यो विप्राशीर्वाचनं तथा ॥

नागानां हस्तिनां बलिः पूजा । विधिमाह यज्ञपार्श्वः–

चतुर्थे दिवसे रात्रौ लिखेन्मानःसरोवरम् ।
हिरण्यगर्भं तन्मध्ये गन्धपुष्पाक्षतादिभिः ॥
संपूज्याप्सरसश्चैव सोमगन्धर्वपावकान् ।
संपूज्य वाऽश्वहस्त्यादीनारोप्य स्वगृहं प्रति ॥
संवेशनादिकं कर्म अन्यथा तु व्रजेद्द्वयम् ।

संवेशनं गृहप्रवेशः । कालदीपे—

शुभकाले गृहे प्राप्तौ वर्धन्ते संपदः सदा ।
असत्काले गृहप्राप्तौ सर्वनाशो गृहे भवेत् ॥

नारदः—आरभ्योद्वाहदिवसात्षष्ठे वाऽप्यष्टमे दिने ।
वधूप्रवेशः संपत्त्यै दशमेऽथ समे दिने ॥
तथा—'समवर्षे समे मासि यदि नारी गृहं व्रजेत् ।
आयुष्यं हरते भर्तुः सा नारी मरणं व्रजेत् ॥ इति ।
तथा—वधूप्रवेशः प्रथमे तृतीये शुभप्रदः पञ्चमकेऽथवाऽह्नि ।
द्वितीयके वाऽथ चतुर्थके वा षष्ठे वियोगामयदुःखदः स्यात् ॥ इति ।
तथा ज्योतिःप्रकाशे—
वामे शुक्रे नवोढायाः सुखं हानिश्च दक्षिणे ।
धनं धान्यं च पृष्ठस्थे सर्वनाशः पुरः स्थिते ॥
नवोढायास्तु वैधव्यं यदुक्तं संमुखे भृगौ ।
तदेवं विबुधैर्ज्ञेयमन्यथा तु द्विरागमे ॥ इति ।
अन्यत्तुमुहूर्त्तादि दैवज्ञोदितं ग्राह्यम् ।

इति वधूप्रवेशः ।

मण्डपोद्वासनकालः प्रयोगरत्ने—
समे च दिवसे कुर्यान्मण्डपोद्वासनं बुधः ।
षष्ठं च विषमं नेष्टं मुक्त्वा पञ्चमसप्तमौ ॥
षष्ठं नेष्टमित्यर्थः । विषममपि नेष्टं पञ्चमसप्तमे दिने मुक्त्वा ।

इति मण्डपोद्वासनम् ।

अथ तृतीयमानुषीविवाहनिषेधो मात्स्ये—
तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् ।
तृतीयमानुषीविवाहनिषेधः पुत्रपौत्रादिसंपन्नः कुटुम्बी साग्निकोऽज्वरः ॥
उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वाऽपि यदि गच्छेत्तु मानुषीम् ॥
नश्यत्येव न संदेहो गर्गस्य वचनं यथा ॥ इति ।
संग्रहे—चतुर्थादिविवाहार्थं तृतीयेऽर्के समुद्वहेत् ॥ इति ।
अर्कविवाहप्रकारः शान्तिमयूखे वक्ष्यते ।

ज्येष्ठे भ्रातर्यकृतविवाहे कनिष्ठो न विवहेदित्युक्तं चतुर्विंशतिमते—
अनूढज्येष्ठस्य विवाहनिषेधः सापवादः । जीवत्पितरि नादध्यादाहिताग्निः स नो यदि ।
तथैव भ्रातरि ज्येष्ठे न यजेन्न विवाहयेत् ॥
ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् ।
अनुज्ञातोऽपि सत्पित्रा नादध्यान्मनुरब्रवीत् ॥

क्वचिददोष इत्याह कात्यायनः—

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिसक्तपतितशूद्रकल्पातिरोगिणः ।
जडमूकान्धबधिरकुब्जवामनकुण्डकान् ॥
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ।
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा ।
कुहकांस्तस्करांश्चापि परिविन्दन्न दुष्यति ॥

अभार्यान्नैष्ठिकादीन् । अन्यथा दोष इति गम्यते ।

यमलयोर्मध्ये जन्मनैव ज्येष्ठता । केचिदाधानक्रमेण ज्येष्ठं वर्णयन्तः पश्चाज्जातस्य पूर्वमाधानं भवतीति तस्यैव ज्येष्ठतामाहुः । तन्न । आधानप्राथम्येन ज्येष्ठतायां मानाभावात् । अन्यथा पत्नीनां पूर्वापरभावे नाधाने जाते उत्तराहितस्य प्रथमोत्पत्तौ ज्येष्ठता न स्यात् । आधाने जन्मशब्दाभावाच्च । अतएवाह मनुः—

यमलयो-
ज्येष्ठनिर्णयः ।

यमयोश्चैव गर्भेषु जन्मनो ज्येष्ठता मता ॥ इति ।

मेधातिथिनाऽपि जन्मत एव ज्यैष्ठ्यमित्युक्तमस्मिन्विषये । तथाऽग्रेदिधिषूविषये भूयान्प्रपञ्चः प्रायश्चित्तमयूखे निरूपयिष्यते ।

पुनर्विवाहेऽग्निमाह कात्यायनः—

सदारोऽन्यान्पुनर्दारानुद्वोढुं कारणान्तरात् ।
यदीच्छेदग्निमान्कुर्वन्क्व होमोऽस्य विधीयते ॥
स्वाग्नावेव भवेद्धोमो लौकिके न कदाचन ॥ इति ।

पुनर्विवा-
हेऽग्निः ।

इदं चाग्निसन्निधाने । अग्निसंनिधानाभावे तु लौकिके कृत्वाऽग्निद्वयसंसर्गं कुर्यात् । संसर्गं चाह शौनकः—

अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः ।
सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः ॥
पृथक्स्थण्डिलयोरग्नी समाधाय यथाविधि ।
तन्त्रं कृत्वाऽऽज्यभागान्तमन्वाधानादिकं ततः ॥
जुहुयात्पूर्वपत्न्यग्नौ तयाऽन्वारब्ध आहुतीः ।
अग्निमीळे पुरोहितं सूक्तेन नवर्चेन तु ॥
समिध्यैनं समारोप्यायं ते योनिरित्यृचा ।
प्रत्यवरोहेत्यनया कनिष्ठाग्नौ विधीयते ॥
आज्यभागान्तमन्वादि कृत्वाऽऽरभ्य तदादिनः ॥

अग्निद्वय-
संसर्गः ।

---

१ ना क. पाठः ।

समन्वारब्ध एताभ्यां पत्नीभ्यां जुहुयाद्घृतम् ।
चतुर्गृहीतेनैताभिर्ऋग्भिः षड्भिर्यथाक्रमम् ॥
अग्नावग्निश्चरतीति, अग्निनाग्निः समिध्यते ।
अस्तीदमिति तिसृभिः पाहिनो अग्न एकया ॥
ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ।
गोयुग्मं दक्षिणा देया श्रोत्रियायाऽऽहिताग्नये ॥
पत्न्योरेका यदि मृता दग्ध्वाऽनेनैव तां पुनः ।
आददीतान्यया सार्द्धमाधानविधिना गृही ॥ इति ।
इत्यग्निद्वयसंसर्गः ।

अथ सायंप्रातर्होमः। तत्र सायंकालादारम्भः। तत्कर्तॄनाहाश्वलायनः—
'पाणिग्रहणादि गृह्यं परिचरेत्स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा' इति ॥
दक्षः—ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु ॥ इति ।
एतैश्च यजमानस्य पत्न्या वा अनुज्ञया तत्सन्निधौ च होतव्यं नान्यथा। पर्वणि तु सायंहोमः स्वयमेव कार्यो नान्येन । तत्र प्रादुष्करणकालमाह कात्यायनः—
सूर्ये तु शैलमप्राप्ते षड्भिराविरिहाङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासामदर्शने ।
उक्तकालातिक्रमे व्याहृतिभिरेकाज्याहुतिः। होमकालमाह मनुः—
लेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः ।
होमकालः। उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत् ॥
अनुकल्पोऽपि—'प्रदोषान्तो होमकालः सङ्गवान्तः प्रातस्तमतिनीय चतुर्गृहीतमाज्यं जुहुयाद्व्याहृतिभिः' ।
'होमद्रव्याणि गृह्यपरिशिष्टे—'पयो दधि सर्पिर्यवागूरोदनं तण्डुलाः सोमस्तैलमापो व्रीहयो यवास्तिलाः' इति । होम्यानि
सङ्ग्रहे—द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः ।
अङ्गुल्यग्रैर्न होतव्यं न कृत्वाऽङ्गुलिभेदनम् ॥ इति ।
आयतनं चोक्तम्—अरत्निमात्रमन्यर्थं कार्यमायतनं बुधैः ।
पञ्चाशत्मात्रमित्येके तद्गर्भस्यान्तरं भवेत् ॥ इति ।
अपत्नीकोऽपि पूर्वमृतायै पत्न्या अर्द्धाग्निं दत्त्वाऽवशिष्टार्द्धाग्नौ पूर्ववत्सायंप्रातर्होमौ कुर्यादिष्टिं तु न इति । इति नित्यहोमः ॥

स्त्रीधर्माः ।

अथ स्त्रीधर्माः । मनुः—

बालया वा युवत्या वा वृद्धया वाऽपि योषिता ।
स्त्रीधर्माः । न स्वातन्त्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि ॥
पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ।
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥

याज्ञवल्क्यः—

संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा ॥
नास्ति स्त्रीणां जपो यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा ।
पतिलोकमभीप्सन्ती नाहितं किंचिदाचरेत् ॥

स्कान्दे—प्रसुप्तं तु सुखासीनं रममाणं यदृच्छया ।
आतुरेष्वपि कार्येषु पतिं नोत्थापयेत्कचित् ॥
स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत् ।
स्ववाक्यं श्रावयेन्नापि यावत्स्नाता विशुद्ध्यति ॥
सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य कस्यचित् ।
अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥
न रजक्या न कारुक्या न च श्रमणयाऽपि च ।
न च दुर्भगया वाऽपि सखित्वं कुरुते तु सा ॥
भर्तृविद्वेषणी नारी न संभाषेत कर्हिचित् ।

तथा—उक्ता प्रत्युत्तरं दद्याद्या नारी क्रोधतत्परा ॥
सा शुनी जायते ग्रामे शृगाली निर्जने वने ।
पतिं या ताडितुं चेच्छेत्सा व्याघ्री वृषदंशिका ॥ इति ।

शङ्खः—' नानुक्त्वा गृहान्निर्गच्छेन्नानुत्तरीया न त्वरितं व्रजेन्न परपुरुषं भाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो न नाभिं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदनपावृतं न भर्तारं तद्बन्धून्वा द्विष्यात् '।

मनुः—' तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत् ।
भुङ्क्ते भुक्ते पतौ या तु ह्यासीना वाऽपि वाऽऽसिते ॥
[1]विनिद्रे च विनिद्रा या प्रथमं प्रतिबुध्यते ।

---

१ सनिद्रे इति च. पाठः ।

अनलंकृतमात्मानं पत्युर्नो दर्शयेत्कचित् ॥
आकुष्टा वाऽपि नाक्रोशेत्ताडिताऽपि प्रसीदति ।
सेवते भर्तुरुच्छिष्टमिष्टमन्नं फलादिकम् ॥
महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति ।

एते पूर्वोक्ता नियमा विवाहोत्तरमेव ।

अथ प्रोषितपतिकाधर्माः । याज्ञवल्क्यः—

प्रोषितपतिकाधर्माः ।

क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥

तथा—'प्रोषिते मलिना कृशा' इति ।

अथ विधवाधर्माः । मनुः—

विधवाधर्माः ।

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥
आसीताऽऽमरणात्क्षान्ता नियता ब्रह्मचारिणी ॥

तथा—विधवाकबरीबन्धो भर्तृबन्धाय जायते ।
शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥
एकाहारः सदा कार्यो न द्वितीयः कदाचन ।
कृच्छ्रं पराकं कुर्याच्च तप्तकृच्छ्रमथापि वा ॥
यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः ।
प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥
पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् ।
तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥
नैवाङ्गोद्वर्तनाभ्यङ्गं स्त्रिया विधवया क्वचित् ।
तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः ॥

तर्पणं पुत्रपौत्राभावे ।

नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि ।
कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् ॥
एवं धर्मसमायुक्ता विधवाऽपि पतिव्रता ।
पतिलोकमवाप्नोति न भवेत्काऽपि दुःखिता ॥ इति ।

यत्तु ब्रह्मचर्येण सह वैकल्पिकं सहगमनमुक्तं तद्विस्तरेण[१] शुद्धिमयूखे प्रपञ्चयिष्यामः । इतिस्त्रीधर्माः ॥

---

१ ङ पुस्तके 'विस्तरेण' अस्याग्रे 'इतिस्त्रीधर्माः । आधानादि तु त्रैवर्णिकानां नित्यम् । यथाऽत्र वसिष्ठः ।' इतिपाठः; पितामहचरणैर्धर्मप्रकाशे उक्तमिति नेह विस्तरः । इति च. पाठः ।

अथ विवाहोत्तरं पञ्चयज्ञानुष्ठानमुक्तमाचारमयूखे दर्शयिष्यामः अष्टकादिश्राद्धज्ञानं श्राद्धमयूखे । सप्त पाकसंस्था नित्याः । आधानादीनि तु त्रैवर्णिकानां नित्यानि । यथाऽऽह वसिष्ठः—'अवश्यं ब्राह्मणोऽग्नीनादधीताग्निहोत्रदर्शपूर्णमासाग्रयणेष्टिपशुसोमांश्च यजेत । इति ।।' याज्ञवल्क्योऽपि—

सप्तपाकसंस्था आधानादीनि ।

प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्तव्याऽऽग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ।। इति ।

तथा नित्यानि कर्माण्युक्त्वा बौधायनेनोक्तम्—

तस्मात्कन्दैः फलैर्मूलैर्मधुनाऽऽज्यरसेन वा ।
नित्यं नित्यानि कुर्वीत न तु नित्यानि लोपयेत् ।।

यानि तु—भवेत्त्रैवार्षिकान्नं यः स हि सोमं पिबेद्द्विजः ।
प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् ।।

तथा—पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
नत्वल्पदक्षिणैर्यज्ञैर्यजेताथ कथंचन ।।
अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्त्वथर्त्विजम् ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ।।

इत्यादीनि तानि काम्यपराणि । नित्येषु यथाशक्त्यङ्गहीनेनाधिकारस्य षष्ठे स्थितत्वात्, कन्दैर्मूलैरित्यादि च संगच्छते । 'नित्येष्वपि देवताग्निशब्दक्रियाणां प्रतिनिधिर्नास्ति तथाऽनुपादेयानां कालादीनां न त्यागः' इत्यादि स्थितं षष्ठे ।

इति संस्काराः ।

वर्णजातिविवेकः ।

ब्राह्मणस्य चतस्रो भार्या क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति स्थितम् । तत्र समानजातिभ्यां पितृभ्यां जातानामपत्यानां समानजातित्वं मातापित्रोर्वैजात्याज्जात्यन्तरं च भवतीति स्पष्टम् । लोके ता जातीराह याज्ञवल्क्यः—

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ।।
विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् ।
अम्बष्ठः शूद्रांजातो निषादः पारशवोऽपि वा ।।

१ 'अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि च' इतिमूलस्मृतौ पाठः । २ च्छाया इ. पाठः ।

एकस्यैव नामद्वयम् ।

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ।
वैश्यात्तु करणः शूद्रां विन्नास्वेष विधिः स्मृतः ॥

प्रतिलोमजा अप्युक्तास्तेनैव—

' ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ।
शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिष्कृतः ॥
क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च ।
शूद्रादायोगवं वैश्याजनयामास वै सुतम् ॥
माहिष्येण करण्यां तु रथकारः प्रजायते ।
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥ इति ।

प्रतिलोमा असन्तोऽनुलोमाः सन्त इत्यर्थः । एतेषां संकीर्णसंकरे भेदादिकमनुपयोगाद्विस्तृतिभयाच्च नोक्तम् । एतासां च जातीनां गोत्वादिजातिवत्प्रत्यक्षतेतिस्थितं वार्तिके । कचिज्जातेः शास्त्रगम्यताऽपि । यथोक्तं याज्ञवल्क्येन—

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥ इति ।

अस्यार्थो मिताक्षरायां—सप्तमेऽपिवाशब्दात्षष्ठे पञ्चमे युगे जन्मनि जातेरुत्कर्षः । पूर्वजात्यपगमोऽन्यजातिप्राप्तिश्च यथा—ब्राह्मणेन शूद्रायामुत्पादिता निषादी । सा ब्राह्मणेनोढा तस्याः कन्याऽपि ब्राह्मणेनोढा कन्यां जनयति । अनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति । एवं ब्राह्मणेन वैश्यायामुत्पादिताऽम्बष्ठा । सा ब्राह्मणेनोढेत्येवं परंपरया षष्ठं ब्राह्मणं जनयति । एवं क्षत्रियायामुत्पादिता मूर्धावसिक्ता । सा ब्राह्मणेनोढा। तत्कन्याऽप्येवमिति पञ्चमे ब्राह्मणं जनयति । एवमुग्रा क्षत्रियोढा माहिष्या च यथाक्रमं षष्ठं पञ्चमं क्षत्रियं जनयति । तथा करणी वैश्योढा पञ्चमं वैश्यमिति । इयं च दिक् । तद्यथा मूर्धावसिक्तेन क्षत्रियोढा तत्पुत्रेणाऽपि क्षत्रियेत्येवं क्रमेण पञ्चमं क्षत्रियं जनयति । एवमम्बष्ठेनोढा वैश्या तत्पुत्रेणापि सेत्येवं क्रमेण षष्ठं वैश्यं जनयति । एवं निषादेन शूद्रोढा तत्पुत्रेणापि शूद्रेत्येवं क्रमेण सप्तमे शूद्रं जनयति । एवं मूर्धावसिक्तादिष्वपि योज्यम् । तथा कर्मणां वृत्त्यर्थानामपकृष्टकर्मणां व्यत्यये साम्यं यज्जातीयवृत्तिपरिग्रहस्तज्जातिप्राप्तिरित्यर्थः । तद्यथा ब्राह्मणः स्ववृत्त्याऽनी-

१ कर्म ड. पाठो. २ तेषामिति च पाठः ।

यत्रापदि क्षत्रवृत्तिं करोति गतायामप्यापदि तां न जहाति तत्पुत्रोऽप्येवमिति क्रमेण पञ्चमः क्षत्रिय एव जायते । तथा विप्र आपदि वैश्यवृत्त्या जीवंस्तस्यां गतायामपि तां वृत्तिं न जहात्येवं तत्पुत्रोऽपीत्येवं क्रमेण षष्ठो वैश्य एव जायते । एवं शूद्रवृत्त्याऽपि जीवतः । एवं क्षत्रियवैश्ययोरपि योज्यम् । अस्मिन्व्याख्यानेऽपिशब्दस्य षष्ठपरत्वे मूलं मृग्यम् । एतेषां वृत्तयस्त्वनुपयोगान्नोक्ताः ॥

इति वर्णजातिविवेकः ।

वर्णधर्माः ।

अथ साधारणा वर्णधर्माः । तत्र ब्राह्मणस्य षट् कर्माणि यजनाध्ययनदानयाजनाध्यापनप्रतिग्रहाख्यानि । तेषु त्रीणि वृत्त्यर्थानि । यथाऽऽह मनुः—

साधारणा वर्णधर्माः ।

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ इति ।

यजनं तत्र तत्र स्पष्टम् । याजनं केषांचित्प्रतिषिद्धम् । यथाऽऽह देवलः—

यः शूद्रान्पतितांश्चापि याजयेदर्थकारणात् ।
याजितो वा पुनस्ताभ्यां ब्राह्मणोऽयाज्ययाजकः ॥ इति ।

सुमन्तुरप्ययाज्यानाह—'अभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिवक्रकारतैलिकचाक्रिकध्वजिसुवर्णकारचर्मकारवैधकिगणगणकगाणिकसौनिकव्याधनिषादरजकबुरुडचर्मकारा अभोज्यान्ना अप्रतिग्राह्या अयाज्याश्चेति । तथाऽभिचारयाजनमपि प्रतिषिद्धम् । यथाऽऽह मनुः—

व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च ।
अभिचारमहीनं वा त्रिभिः कृच्छ्रैर्व्यपोहति ॥ इति ।

इति याजनम् । दानप्रतिग्रहौ दानमयूखतो ज्ञेयौ । अध्ययनाध्यापने पूर्वमुक्ते ।

आपत्कल्पाः ।

अथ ब्राह्मणस्यापत्कल्पः—तत्र पूर्वोक्तवृत्तित्रयासंभवे मनुः—

अजीवंस्तु स्वधर्मेण ब्राह्मणः स्वेन कर्मणा ।
जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥ इति ।

---

१ वन्धकिरिति च. पाठः ।

पुनः स्वकर्मग्रहणं विगुणकर्मसंग्रहार्थम् । एतदुक्तं भवति—यथोक्तैः प्रतिग्रहादिभिरजीवन्दुष्प्रतिग्रहादिकमपि कुर्यात् । नत्वन्य-वृत्तिम् । यथोक्तं भगवता—

ब्राह्मणस्यापत्कल्पः

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।। इति ।

मनुरपि—वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्मेण जीवन्हि सद्यः पतति जातितः ।। इति ।

तेनाप्यजीवन्क्षत्रवृत्त्या तयाप्यजीवन्वैश्यवृत्त्या । तथोक्तं याज्ञवल्क्येन ' विशां वाऽप्यापदि द्विजः ' इति ।

वैश्यवृत्तावपि कृषिः कारणीया स्वयं न कार्या । यथोक्तं बृहस्पतिना—

कुसीदकृषिवाणिज्यं प्रकुर्वीताऽस्वयंकृतम् ।
आपत्काले स्वयं कुर्वन्नैनसा युज्यते द्विजः ।। इति ।

तत्रापि नीलीकृषिर्वर्ज्या ।

नीलीकर्षणकर्ता तु चण्डालसदृशो हि सः ।

इत्यापस्तम्बेन निन्दितत्वात् । कृषिधर्मानग्रे वक्ष्यामः । वाणिज्येऽपि विशेषमाह याज्ञवल्क्यः—

ब्राह्मणस्य वाणिज्ये विशेषः

फलोपलक्षौमसोममनुष्यापूपवीरुधः ।
तिलौदनरसक्षारान्दधि क्षीरं घृतं जलम् ।।
रसासवमधूच्छिष्टमधुलाक्षाः सबर्हिषः ।
मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः ।।
कौशेयनीलीलवणमांसैकशफसीसकान् ।
शाकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च ।।
वैश्यवृत्त्याऽपि जीवन्नो विक्रीणीत कदाचन ।। इति ।

मनुरपि—अश्मनो लवणं चैव पशवो ये च मानुषाः ।
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च ।।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ।
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः ।।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ।
आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च ।।
मद्यं नीलीं च लाक्षां च सर्वांश्चैकशफांस्तथा ।

न विक्रीणीयादिति शेषः। तथा—

भोजनाभ्यञ्जनात्पानाद्यदन्यत्कुरुते तिलैः।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति॥
सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्॥
इतरेषां तु पण्यानां विक्रयादिह कामतः।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति॥

इतरेषां पूर्वोक्तानां क्षीरव्यतिरिक्तानाम्। इदमनापदि। रसेषु विशेषमाह स एव—

रसा रसैर्निमातव्या न त्वेव लवणं रसैः।
कृतान्नं चोऽकृतान्नेन तिला धान्येन तत्समाः॥ इति।

वाणिज्यमप्यस्वयंकृतमित्याह गौतमः—'वाणिज्यं कृपिवदेव' इति। अत्यन्तापदि तु स्वयमपि कुर्यात्। सर्वासंभवे सेवामप्यनुजानाति प्रचेताः—

महदापद्गतो विप्रः क्षत्रसेवां समाश्रयेत्।
शूद्रसेवा न कर्तव्या प्राणैः कण्ठगतैरपि॥

शूद्रसेवायां प्रायश्चित्ताश्रानादत्यन्तापदि सापि कार्येत्येवं गम्यते। तथा अत्यन्तापदि चौर्यमनुजानाति याज्ञवल्क्यः—

बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्।
प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः॥

अब्राह्मणादिति शूद्राद्धरेत्तदलाभे वैश्यात्तदलाभे क्षत्रियादिति निबन्धकृतः। मनुः—द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।

आददानः परक्षेत्रान्न दण्डं दातुमर्हति।
तथैव सप्तमे भक्ते भक्तानि षडनश्नता॥
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः॥ इति।

राजानं प्रत्याह मनुः—

तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तथा।
ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत्॥ इति।

राज्ञे निदेशः। एवं क्षत्रियस्यापदि वैश्यवृत्तिः। शूद्रवृत्तिस्तदसंभवे। वैश्यस्यापदि शूद्रवृत्तिः क्षत्रवृत्तिर्वा नतु ब्राह्मणवृत्तिः। शूद्रस्यापदि वैश्यवृत्तिस्तदसंभवे क्षत्रवृत्तिः। न तु विप्रवृत्तिः। यथोक्तम्—

१ दानादिति च पाठः। २ वाकृतान्नेनेति मुद्रितपु. पाठः।

उत्कृष्टं वाऽपकृष्टं वा तयोः कर्म न विद्यते ।
मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ॥

ब्राह्मणस्यापकृष्टं सेवादि नास्ति शूद्रस्योत्कृष्टमध्ययनादि नास्ति । एवं चात्यन्तापदि क्षत्रियवैश्ययोर्ब्राह्मणकर्मानुज्ञातं भवति । एवं यथाकथंचिदप्यापदं हित्वा प्रायश्चित्तं कुर्यात् । यथोक्तं । याज्ञवल्क्येन—

निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ॥

पराशरोऽपि—अशक्तो निन्दितं कुर्यात्प्रायश्चित्तं पुनश्चरेत् ॥ इति ।

अतो ज्ञायतेऽनुज्ञानेऽप्यापद्दोषोऽस्त्येव ।

यत्तु—आपद्गतः संप्रगृह्णन्भुञ्जानो वा यतस्ततः ।
न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः ॥ इति ।

तन्न सर्वथा दोषाभावप्रतिपादनपरम् । किंतु सर्वत एवात्मानं गोपयेत्' इति गोपनस्य पापाभावार्थवादेनावश्यकत्वार्थम् । अग्रे प्रायश्चित्ताम्नानात् । एतावान्परं विशेषो यदनापदि कुलानां निन्दितानां कर्मणां बहुप्रायश्चित्तमापदि त्वल्पमिति ॥ इत्यापत्कल्पनिरूपणम् ॥

क्षत्रियधर्माः ।

क्षत्रियधर्मा अपि गीतायाम्—

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम् ॥ इति ।

अन्ये चोक्ताः, नीतिमयूखादौ विस्तरेण वक्ष्यन्ते च ।

वैश्यधर्माः

वैश्यधर्मा उक्ता याज्ञवल्क्येन—

कुसीदकृषिवाणिज्यं पाशुपाल्यं विशः स्मृतम् ॥ इति ।

भारते वैश्यवाक्यम्—

यद्ददामि न तन्न्यूनं यद्गृह्णामि न चाधिकम् ।
विक्रीणामि रसांश्चाहं भयत्रमसमायया ॥ इति ।

कृष्युपयुक्तहले विशेषमाह हारीतः—

कृष्या विधेयानि। अष्टगवं धर्म्यहलं षड्गवं जीवितार्थिनाम् ।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥ इति ।

द्विगवं ब्रह्मघातवन्निन्दितमित्यर्थः । इदं च कठिनभूमिविषयत्वेन योज्यम् । योज्यवृषान्पराशर आह—

स्थिराङ्गं नीरुजं तृप्तं सुनर्दं पण्ढवर्जितम् ।
वाहयेद्दिवसस्यार्द्धं पश्चात्स्नानं समाचरेत् ॥

सुनर्दोऽश्रान्तः । स्नानं वृषाणाम् । वर्ज्यानाह स एव—

क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत् ।
हीनाङ्गं व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ॥ इति ।

विप्र इत्युपलक्षणम् । भारते—

वाहयेद्धुंकृतेनैव शाखया वा सपत्रया ।
न दण्डेन न यष्ट्या वा न पाशेन न दारुणा ॥

खलयज्ञमाह पराशरः—

वृक्षं छित्त्वा महीं भित्त्वा हत्वा च कृमिकीटकान् ।
कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते ॥

खलयज्ञः खलस्थधान्यदानम् । धान्यभाग उक्तः शैवपुराणे—

राज्ञे दत्त्वा तु षड्भागं देवानां चैकविंशकम् ।
विप्राणां त्रिंशकं भागं सर्वपापैः प्रमुच्यते ॥

'देवग्रहणं पितॄणामुपलक्षणम्' इति धर्मप्रकाशे । एतददाने दोष उक्तस्तत्रैव—

अदत्त्वा कर्षको देवि यस्तु धान्यं प्रवेशयेत् ।
मरुदेशे भवेद्वृक्षः स पुष्पफलवर्जितः ॥ इति ।

एतादृशस्य फलमुक्तं भारते—

वणिग्धर्ममनुष्ठन्वै देवब्राह्मणपूजकः ।
स वणिक् स्वर्गमाप्नोति पूज्यमानोऽप्सरोगणैः ॥

वैपरीत्ये दोषस्तत्रैव—

यः करोति जनान्साधून्वणिकर्मणि वञ्चनम् ।
स याति नरकं घोरं धनं तस्यापि हीयते ॥

साधूञ्जनान्प्राप्येत्यर्थः । उक्ता वक्ष्यमाणाश्च साधारणधर्माः वैश्यस्य भवन्त्येवेति ॥ इति वैश्यधर्माः ॥

शूद्रधर्माः ।

शूद्रधर्ममाह मनुः—

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कथ्यते ॥ इति ।

विष्णुपुराणे—

द्विजशुश्रूषयैवैष ब्रह्मयज्ञाधिकारवान् ।

निजाञ्जयति वै लोकान् शूद्रो धन्यतरः स्मृतः ॥ इति ।

द्विजैश्च शूद्रवृत्तिः कार्येत्युक्तं भारते—

यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्प्या तस्य तैराहुर्वृत्तिं धर्मविदो जनाः ॥

गौतमः—' जीर्णान्युपानच्छत्रवासांसि कूर्चानीति ' देयानीति शेषः । कूर्चं तृणमयमासनम् । उपलक्षणं चेदम् । अतश्चापेक्षितं जीर्णं शय्याकम्बलाद्यपि देयम् । वृत्त्यन्तरमाह याज्ञवल्क्यः—

शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् ॥
शिल्पैश्च विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ इति ।

शूद्रस्य वाणिज्ये प्रसक्ते पूर्वोक्तानां फलोपलादीनां विक्रये न दोषः ॥

लवणं मधु तक्रं च तैलं दधि घृतं पयः ।
न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयम् ॥

इति बृहत्पराशरोक्तेः । कश्चिद्विशेषमाह स एव—

विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम् ।
कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् ॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत् ॥ इति ।

एवं च मद्यमांसातिरिक्तं विक्रेयमिति । पुराणादिश्रवणे शूद्रस्याधिकारो नाध्ययने । तथा च भारते—

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
तेन भारतमाख्यानं मुनिना कृपया कृतम् ।
श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः ॥ इति ।

शूद्रं प्रति विशेषमाहाङ्गिराः—

तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥ इति ।

स्वयंकर्तृकयोर्जपहोमयोर्निषेधः । अतो ब्राह्मणेन जपे होमे वा कारिते न दोषः । तदुक्तं धर्मविवृतौ—

उपवासो व्रतं होमस्तीर्थस्नानजपादिकम् ।
विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम् ॥ इति ।

---

१ धर्मप्रकाशे इति ङ. पाठः ।

शूद्रस्य पञ्चगव्याशनमाह पराशरः—

शूद्रस्य पञ्चगव्याशनम्।

स्त्रीशूद्रस्य विशुद्धयर्थं प्राजापत्यं समाचरेत्।
पञ्चगव्यं तु कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्॥ इति।

यत्त्वत्रिणोक्तम्—

पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्।
उभौ तौ पापकर्माणौ पूयाख्ये नरके वसेत्॥ इति।

तद्विकल्पार्थमिति केचित्। प्रायश्चित्ताङ्गं पञ्चगव्यं प्राश्यमनङ्गं तु नेति व्यवस्थेति धर्मप्रकाशे। युक्तं तु—कलौ पाराशरी स्मृतिरित्यनेनान्यस्मृतिविरोधे कलौ पराशरस्मृतिर्बलीयसीत्युच्यते। अतः कलौ प्राशनमेव। युगान्तरे तु विकल्पइति। शूद्रस्य सर्वसंस्कारप्राप्तौ केषांचिद्बाधः। तत्र गर्भाधानप्रभृत्यन्नप्राशनान्ताः संस्काराः शूद्रस्य भवन्ति। यत्तु—ब्राह्मणक्षत्रियवैश्यानां गर्भाधानसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचूडोपनयनव्रतचर्याध्ययनसमावर्तनविवाहयज्ञदानानि समानानि इति-सुमन्तुवाक्यम्। तत्त्रयाणां मन्त्रवत्संस्कारपरं न शूद्रपरिसंख्यार्थम्। तथासति तस्य विवाहाप्रसक्तेः। चूडाकरणं तु—

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।

इति मनुवचने द्विजातिग्रहणात् शूद्रस्य नेति मेधातिथिः। अपरार्कस्तु चूडाकरणं मन्त्रसहितं न भवतीत्याह। वसिष्ठस्तु स्पष्टं विकल्पमाह—'परिचर्या तु शूद्रस्यानियतः केशवेशः' इति। अस्यार्थो धर्मप्रकाशे—केशवेश एका शिखा सोऽनियतो वैकल्पिकः। तस्माच्छिखामात्रधारणं मुण्डनं वेत्यर्थ इति। उपनयनं त्वध्ययनाभावान्नास्ति। मनुरपि—'चतुर्थ एकजातिस्तु' इति। एकैव जातिर्जननं यस्येत्यर्थः। शूद्रस्य पञ्चमहायज्ञमन्त्रमाह याज्ञवल्क्यः—

नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्। इति।

स्वाहास्थाने नमःशब्दः प्रयोक्तव्य इत्यर्थः। देवताभ्यः पितृभ्यश्चेति वा नमस्कारमन्त्र इति विज्ञानेश्वरः।

शूद्रस्य पञ्चमहायज्ञाः।

भारते तु—

स्वाहाकारो नमस्कारो मन्त्रः शूद्रे विधीयते।

इति स्वाहाशब्दस्यापि विधानाद्विकल्पः। अत्र च 'शूद्रा वाजसनेयिनः' इति वसिष्ठवाक्याद्यानि तेषां कर्माणि तानि कातीयसूत्रानुसारेण कार्या-

णीति । वैश्वदेवादौ लौकिकाग्निर्ज्ञेयः । तथा शूद्रस्याऽऽगमोक्ता दीक्षा पूजा च भवति । वराहपुराणे त्रैवर्णिकानां दीक्षाविधिमुक्त्वा—

शूद्रस्यापि प्रवक्ष्यामि मन्त्रकस्य वराङ्गने ।
यां तु दीक्षा समासाद्य मुच्यते सर्वकिल्बिषैः ॥

इत्युक्तत्वात् । सूतसंहितायामपि त्रैवर्णिकाना मन्त्रपूजाद्युक्त्वा संन्यासिना प्रणवेन पूजामुक्त्वा—

नमोन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।
शिवमन्त्रेण शूद्राणामेवं पूजा प्रकीर्तिता ॥ इत्युक्तम् ।

तत्रैव—शूद्रः कर्मरतस्तेन सुश्रूयमाणो द्विजन्मनाम् ।
हृष्याम्यहं च सुतरां पूज्यमानश्च सुन्दरि ॥
वर्णत्रयस्य शुश्रूषां शुचिः शूद्रः करोति यः ।
स्वधर्मस्य स्थितिं ज्ञात्वा तस्य गृह्णाम्यहं बलिम् ॥ इति ।

भविष्यत्पुराणे—

ब्राह्मणं क्षत्रियं वैश्यं कुलीनं शूद्रमेव तु ।
पुरुषं वा स्त्रियं वाऽपि दीक्षयेत्सूर्यमण्डले ॥

आराध्यदेवता सूर्यमण्डले त्वया ध्येया पूज्या चेत्युपदिश्य दीक्षयेदित्यर्थः । वराहपुराणे—

ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ।
शूद्रादीनां च तच्छ्रोत्रपदवीमुपयास्यति ॥

इति पञ्चरात्रश्रवणविधानाच्च सौरवैष्णवशैवशाक्तवैनायकमन्त्रेष्वधिकारः सिद्धः । यत्तु पूर्वं सूतसंहितायां पूजनं स्पर्शनं चोक्तं तत्स्वकृतपार्थिवादिविषयम् ।

यच्च—केशवं वा शिवं वाऽपि स्पृष्ट्वा नरकमश्नुते ।

इति निषेधः सोऽन्यस्थापितपरः स्थावरपरो वा । दीक्षितानां स्थावरेष्वपि ब्राह्मणद्वारा पूजा भवतीति । स्थावरे स्फाटिके । विशेषस्त्वाचारमयूखे वक्ष्यते । तथा शूद्रस्य ज्ञानेऽधिकारो महाभारते—

प्राप्य ज्ञानं ब्राह्मणात्क्षत्रियाद्वा
वैश्याः शूद्रा अपि नीचा अभीक्ष्णम् ।
श्रद्धातव्यं श्रद्दधानेन नित्यं
न श्रद्धालुं जन्ममृत्यू विशेताम् ॥ इति ।

यत्तूत्तरमीमांसायामपशूद्राधिकरणे शूद्रस्य ब्रह्मविद्यानधिकार उक्तः

स त्रैवर्णिकादिवदुपनिषच्छ्रवणादिना न भवतीत्येवंपरः । पुराणादिश्रवणेन तु ब्रह्मज्ञानं केन वार्येत । तेन 'सर्वं ब्रह्मण उत्पन्नं ब्रह्मण्यध्यस्तं मिथ्या ब्रह्मैव सत्यम्' इत्येवंरूपेण निदिध्यासनेन ज्ञानं संपादनीयम् । अत एव गीतायाम्—

मामुपाश्रित्य कौन्तेय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ इत्युक्तम् ।

तथा शूद्रेण क्रियमाणे श्राद्धे ब्राह्मणेन मन्त्राः पठनीयाः ।

अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥ इति वाराहोक्तेः ।

यत्तु मात्स्ये—

शूद्रोऽप्यमन्त्रवत्कुर्यादनेन विधिना ततः ॥ इति ।

तत्स्वयं मन्त्रप्रयोगो न कर्तव्य इत्येवंपरम् । सर्वश्राद्धानि चाऽऽमेन भवन्ति 'शूद्रः कुर्यात्सदैव हि' इत्युक्तेः । यत्तु वाराहे श्राद्धं प्रकृत्य—

त्रिषु वर्णेषु कर्तव्यं पाकभोजनमेव तु ।
शुश्रूषामभिपन्नानां शूद्राणां च वरानने ॥

इति पाकश्राद्धमुक्तं तच्छूद्रायां द्विजोत्पन्नविषयमिति केचित् । युक्तं तु—तस्मिञ्छूद्रत्वाभावात् 'शूद्राश्च पाककर्तारः' इत्यापस्तम्बोक्तपाककर्तृगोपालादिसच्छूद्रपरमिति । तच्च कलियुगातिरिक्तयुगविषयमिति वक्ष्यते । यत्तु भविष्यपुराणे—

आवाहनादि कर्तव्यं यथा शूद्रेण तच्छृणु ।
देवानां देवनाम्ना तु पितॄणां नामगोत्रतः ॥
पिण्डांश्च निर्वपेद्वीर नामतो गोत्रतस्तथा ॥

इति शूद्राणां गोत्रमुक्तं तत्र केचिद्वदन्ति—'तस्मादाहुः सर्वाः प्रजाः काश्यप्यः' इति सामान्यदर्शनात्सर्वशूद्राणां काश्यपं गोत्रम् । तस्य च श्राद्ध एवोत्कीर्तनं नान्यत्र 'यावद्वचनं वाचनिकम्' इति न्यायात् । अन्यथा सर्वशूद्राणामेकगोत्रत्वादविवाहः प्रसज्येतेति । अन्ये तु मुख्यशूद्रस्य सप्तर्ष्यन्यतमापत्यत्वाभावाच्छूद्रायामुत्पन्नः पारसवो गृह्यत इत्याहुः । युक्तं तु ब्राह्मणेनोत्पादितः पारसवस्तेन शूद्रोढा तदुत्पन्नेन पुनः शूद्रोढेत्येवं सप्तमे शूद्रो भवति । तस्य परंपरया सप्तर्ष्यन्यतमापत्यत्वेन गोत्रसत्वात्तत्परमेवेति । अन्ये शूद्रधर्मा आशौचादयस्तत्र तत्र वक्ष्यन्ते शान्तिकादावप्यधिकारः शान्तिमयूखे स्थापयिष्यते । अन्ये च—

---

१ आमश्राद्ध प्रकृत्येति शेषः ।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम्॥
इति साधारणधर्मा अपि ज्ञेयाः। इति शूद्रधर्माः।

आश्रमधर्माः

अथाश्रमधर्माः। तत्र ब्रह्मचारिधर्मा उक्ताः। गृहस्थो द्विविध उक्तो देवलेन—'द्विविधो गृहस्थो यायावरः शालीनश्च। तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहवर्जनादिति। तस्य जीवनोपायमाह याज्ञवल्क्यः—'जीवेद्वापि शिलोञ्छेन' इति। गृहीतधान्ये क्षेत्रे पतितमञ्जरीग्रहणं शिलम्। एकैककणग्रहणमुञ्छम्। धान्यस्य संचय उक्तस्तेनैव—

कुशूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा। इति।

स्वकुटुम्बपोषणपरिमितं द्वादशदिनपर्याप्तमन्नं यः संगृह्णाति स कुशूल-आश्रमधर्माः। धान्यः। षड्दिनपर्याप्तसंग्रहीता कुम्भीधान्यः त्र्याहिकाऽश्वस्तनौ स्पष्टौ। एषां मध्ये परः परः श्रेष्ठः। शालीनमाह देवलः—'षट्कर्माभिरितः प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्त्ती शालीनः' इति। स चतुर्विधः। यथोक्तं मनुना—

षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते।
द्वाभ्यामन्यश्चतुर्थस्तु ब्रह्मसत्रेण जीवति॥ इति।

अस्यार्थः—कश्चिद्याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैः षड्भि-र्जीवति। अन्यस्त्रिभिः प्रतिग्रहाध्यापनयाजनैः। तृतीयो द्वाभ्यां याज-नाध्यापनाभ्यां चतुर्थस्त्वध्यापनेनैवेति। एतेष्वपि परः परः श्रेष्ठः। अन्ये गृहस्थधर्मा उक्ता वक्ष्यन्ते च॥

इति गृहस्थधर्माः।

तृतीयाश्रममाह याज्ञवल्क्यः—

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम्।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्॥ इति।

भार्यायां तिष्ठन्त्यामपि ब्रह्मचारी। तत्कालमाह मनुः—

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥ इति।

सुतनिक्षेपादि पत्न्यां विद्यमानायाम् । तत्र कृत्यमाह मनुः—

वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ॥
दर्शमस्कन्दयन्पर्व पूर्णमासं च योगतः । इति ।

तृतीयाश्रमः

याज्ञवल्क्यः—अफालकृष्टेनाग्नींश्च पितृन्देवातिथीनपि ॥

भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवान् ।

मनुः—संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् । इति ।

अत्र संचयमाह याज्ञवल्क्यः—

अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा ।
अर्थस्य संचयं कुर्यात्कृतमाश्वयुजे त्यजेत् ॥
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् ।
स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः ॥
दन्तोलूखलिकः कालपक्वाशी वाऽश्मकुट्टकः ।
श्रौतं स्मार्तं फलस्नेहैः कर्म कुर्यात्क्रियास्तथा ॥

चितुषीकरणसाधनं दन्ता एवेत्यर्थः । कालेन पक्वमश्नातीति कालपक्वाशी । फलमिङ्गुद्यादि तस्य स्नेहैः । कर्म श्रौतादि । क्रियाः व्रतार्चनादयः । तथा—

चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा ।
पक्षे गते वाऽप्यश्नीयान्मासे वाऽहनि वा गते ॥
स्वप्याद्भूमौ शुची रात्रौ दिवसं प्रपदैर्नयेत् ।
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा ॥

रात्राविति दिवसव्यावृत्त्यर्थम् । प्रपदैरटनैः ।

ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ॥

पञ्चाग्निप्रकारश्च चतुर्दिक्षु चत्वारोऽग्नयः एकः सूर्य इति पञ्च । अन्यत्र द्वादशाग्निप्रकारोऽपि । तद्यथा—स्वस्य परित एकादशाग्न्यायतनान्येकः सूर्यश्चेति । स्थण्डिलेशय इति आवरणरहिते देशे स्थेयमित्यर्थः । शयनमुपलक्षणम् । तेनोपवेशनाद्यपि ग्राह्यम् ।

आर्द्रवासास्तु हेमन्ते शक्त्या वाऽपि तपश्चरेत् ।
कण्टकैर्यश्च तुदति चन्दनैर्यश्च लिम्पति ॥
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ।

---

१ शक्तितः पाठः । २ दिवा सम्पदैरिति ड. पाठः ।

पूर्वं वन्याहारतोक्ता । इदानीं ग्रामादाहृत्याप्याहारं कुर्यादित्याह स एव—

ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः ।
वायुभक्षः प्रागुदीचीं गच्छेद्वाऽऽवर्ष्मसङ्क्षयात् ॥ इति ।

प्रागुदीची ऐशानी । इति वानप्रस्थधर्माः ।

संन्यासः ।

संन्यासमाह याज्ञवल्क्यः—

वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ इति ।

अग्न्यारोपादि गृहात्संन्यासे । वैराग्यं चाधिकारिविशेषणम् । 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इतिश्रुतेः । याज्ञवल्क्यः—

अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा ।
आधयो व्याधयः क्लेशा जरा रूपविपर्ययः ॥
भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः । इति ।

एतद्विचारे क्रियमाणे वैराग्यं भवतीति । अस्य चातुर्विध्यमाहात्रिः—

चतुर्विधो भिक्षुकः स्यात्कुटीचरवहूदकौ ।
हंसः परमहंसश्च यो यः पश्चात्स उत्तमः ॥

क्वचित्कुटीचक इति पाठः । तत्राद्ययोर्द्वयोः शिखासूत्रधारणं पुत्रदत्ताशभोजनं भवति। परन्तु सर्वव्यासङ्गान्विहायाध्यात्मविद्याऽभ्यसनीया । परहंसस्तु पुत्रादीना त्यागं कृत्वा वनादौ वसेत् । शिखासूत्रे वैकल्पिके । परमहंसो मुण्डः सूत्ररहितश्च । सर्वेषां ब्रह्मविद्याभ्यासस्तुल्यः । अस्माभिस्तु प्रायशः परमहंसधर्मा एवोच्यन्ते त उक्ताः श्रुतौ—सोऽथ परिव्राडेकशाटीपरिहितो मुण्डो दारुपात्रोऽरण्यनित्यो भिक्षार्थं ग्रामं प्रविशेदासायं प्रदक्षिणेनाऽविचिकित्सन्सार्ववर्णभैक्षचर्यमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डमाददीत' इति। 'सार्ववर्णमापदि' तत्र शूद्रादामग्रहणम्। काममिति वैकल्पिक दण्डग्रहणम्। परमहंसस्यायमेक एव दण्डः। त्रिदण्डादिकं हंसादीनाम्। अत एव परमहंससंन्यासग्रहणे तेषां त्याग ...अत ऊर्ध्वं यज्ञोपवीतमासनं शिखां यष्टयः शिक्यमित्येतानि वर्ज-

यित्वाऽथ दण्डमादत्ते 'सखा मां गोपायति' इति । संन्यासश्च ज्ञानप्रतिबन्धकदुरितनाशद्वारा ज्ञानसाधनमिति स्थितमुत्तरमीमांसायाम् । कश्चिज्जन्मान्तरीयः संन्यासोऽन्यजन्मन्युपयुज्यते । तथाच श्रूयते—'यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति । अयं च संन्यासो न पूर्वसंन्यासापेक्षया कर्मान्तरम् । पूर्वस्योपस्थितत्वाद्गौरवात्प्रमाणाभावाच्च । अतः पूर्वोत्पन्नस्य संन्यासस्य यदि 'ब्राह्मणो यजेत' इत्यादिवदातुरकर्तृकप्रयोगान्तरं विधीयते तत्रापि वैराग्यमपेक्षितमेव । न चातुरस्य वैराग्यसत्त्वे 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इत्यनेनैव प्राप्तेरनर्थकं पुनर्विधानमिति वाच्यम् । संन्यासस्य काम्यत्वेन सर्वाङ्गोपसंहारासमर्थमातुरं प्रत्यप्राप्तेः । अतोऽर्थवद्वचनमिति । विस्तरस्तु दुर्गमत्वभिया नेह प्रतन्यते । अङ्गिरा अपि—

अन्धः पङ्गुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः ।
सर्वेषामेव वैराग्यं संन्यासे तु विधीयते ॥ इति ।

सुमन्तुः—आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ॥ इति ।

तत्र संन्यासाङ्गभूतं श्राद्धं श्राद्धमयूखे वक्ष्यते ।

गोभिलः—ततः समाचरेत्स्नानं हेमरूप्यकुशाम्भसा ।
कृत्वा तु वपनं विद्वान्भवेन्मुण्डोऽथवा शिखी ॥

बह्वृचगृह्यपरिशिष्टे—'अथ पुत्रान्सुहृदो बन्धून्प्रत्याह न मे कश्चिन्नाहं कस्यचित्' इति । ततः 'पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोऽहम्' इति अपः पाणिना हुत्वा शिखार्थं रक्षितान्केशानुत्पाट्याथ यज्ञोपवीतं भूमावप्सु वा निक्षिपेत् । ततः प्राङ्मुखस्तिष्ठन्नूर्ध्वबाहुर्ब्रूयात् 'संन्यस्तं मया' इति त्रिः ॥ 'अभयं सर्वभूतेभ्यो मत्तः' इति उदकपूर्णमञ्जलिं निनयेत् ।

यतिनामानि ।

अथ नामानि—तीर्थाश्रमवनारण्यगिरिपर्वतसागराः ।
सरस्वती भारती च पुरी नाम यतेर्दश ॥ इति ।

ततो गुरुरद्वैतब्रह्मोपदेशं कुर्यात् । ततो नग्न उदीचीं दिशं गच्छेत् । यदि विविदिषुस्ततः श्रवणाद्यर्थं गुरुसमीपमागच्छेत् । उक्तं च—'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति । ततः कौपीनं कटिसूत्रं चोपाददीत । अत्रिर्विशेषमाह—

कौपीनाच्छादनं वासः कन्था शीतनिवारिणी ।

पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम् ॥ इति ।

गुरोश्च सेवा कायवाङ्मनोभिः कार्या । एवंसंन्यस्तस्य धर्मानाह पराशरः—

एकाकी निस्पृहस्तिष्ठेन्न केनापि सहालपेत् ।

दद्यान्नारायणेत्येवं प्रतिवाक्यं सदा यतिः ॥

दक्षः—एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् ।

त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरं स्मृतम् ॥ इति ।

याज्ञवल्क्यः—

अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिलक्षितः ।

रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥

यात्रामात्रं कुर्यात् प्राणयात्रां, अतितृप्त्या न भुञ्जीतेत्यर्थः ।

वसिष्ठः—' सप्तागाराण्यसंकल्पितानि चरेद्भैक्षमेकवारम् ' इति ।

तत्कालमाह मनुः—

विधूमे सन्नमुशले व्यङ्गारे भुक्तवज्जने ।

वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत् ॥ इति ।

तथाष्टौ मासान् कारं(?)वत्परिचरेत् । चतुरो वार्षिकान्मासानेकत्र तिष्ठेत् इति । चत्वारः श्रावणादिकार्तिकान्ताः । तत्र च मासचतुष्टयपर्यन्तं केशनखादिधारणम् । अन्यत्र तु ' ऋतुसन्धिषु वापयेत् ' । इति मासद्वयोत्तरम् । केचित्तत्रापि पक्षा वै मासा इति लिङ्गदर्शनान्मासमात्रमेवानुतिष्ठन्ति ।

यतिपात्राणि ।

पात्राण्याह याज्ञवल्क्यः—

यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ।

सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणम् ॥ इति ।

यतेस्ताम्बूलं निषिद्धं वायुपुराणे—

द्वावेतौ समवीर्यौ तु सुराताम्बूलमेव च ।

तस्मात्सर्वप्रयत्नेन ताम्बूलं वर्जयेद्यतिः ॥

तथा सर्वदा प्रणवजपपूर्वं ब्रह्मानुध्यानरतो भवेत् । गयायां यतेर्विशेषः—

---

१ कौपीनमिति पाठान्तरम् ।

गयायां मुण्डपृष्ठे च कूपे यूपे वटे तथा ।
दण्डं प्रदर्शयेद्भिक्षुः पितृभिः सह मुच्यते ॥

प्रदर्शयेत्स्पर्शयेत् । एवं संन्यासपूर्वकं जातस्य ज्ञानस्यफलमुक्तं श्रुतौ— ' ब्रह्मसंस्थोऽमृतत्वमेति ' इति । जाबालश्रुतौ—

शतं कुलानां पुरतो बभूव तथा पराणां त्रिशतं समग्रम् ।
एते भवन्ति सुकृतस्य लोके येषां कुले संन्यसतीह विप्रः ॥ इति ।

यतिमरणे विशेषः—

सर्वसङ्गनिवृत्तस्य ध्यानयोगपरस्य च ।
न तस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥
निदध्यात्प्रणवेनैव ध्यायन् भिक्षोः कलेवरम् ।
प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत् ॥ इति ।

एते च संक्षेपेणोक्ता यति धर्माः । विस्तरस्तु विश्वेश्वरनिबन्धादौ द्रष्टव्यः ।

इति श्रीसैमरवंशावतंसमहाराजाधिराजश्रीभगवन्तदेवादिष्टश्रीजगद्गुरुभट्टनारायण-
सूरिसूनुपण्डितशिरोरत्नमीमांसापारावारपारीणधुरीणभट्टशंकरात्मज-
भट्टनीलकण्ठात्मजभट्टशङ्करकृतौ संस्कारभास्करः समाप्तः ।

कातीयसूत्रानुसारिप्रयोगाः ।

अथ पूर्वोद्दिष्टानां संस्काराणां कातीयसूत्रानुसारेण प्रयोगा लिख्यन्ते । तत्र परिभाषासूत्रम् । ' अथातो गृह्यस्थालीपाकानां कर्म परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरुप्याज्यमधिश्रित्य पर्यग्नि कुर्यात् । स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान् कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ' इति । ब्रह्मासने ब्रह्मोपवेशनीयः ।

अथ सर्वत्रोपयुक्तः स्थालीपाकप्रयोगः ।

तत्र प्रथमारम्भे पुण्याहमातृपूजाभ्युदयिकानि कृत्वा देशकालौ स्मृत्वा ' अमुकस्थालीपाकेन यक्ष्ये ' इति संकल्प्य ' अमुककर्मणि कृताकृतप्रत्यवेक्षणार्थं ब्रह्माणं त्वां वृणे ' इति ब्रह्माणं वृत्वा शुद्धायां भूमौ दर्भैस्त्रिः परिसमुह्योपलिप्य स्फ्येनोल्लिख्यानामिकाङ्गुष्ठेनोद्धृत्याद्भिरभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्माणमुपवेश्य

प्रणीताः प्रणयेत् । तद्यथा—वामहस्ते वारुणं चमसमादाय दक्षिणेन जलं संपूर्याग्नेरुत्तरतो निधाय जलं स्पृष्ट्वाऽग्नेरैशान्यां स्थापयेत् । ततः प्रागग्रैः कुशैः परिस्तरणम् । तत उत्तरतोऽग्नेरर्थवतां पात्राणामासादनम् । तद्यथा । पवित्रच्छेदनकुशाः पवित्रे द्वे प्रोक्षणीपात्रमाज्यस्थाली चरुस्थाली संमार्गकुशा उपयमनकुशाः समिधस्तिस्रः प्रादेशमात्र्यः खादिरः स्रुवः आज्यं तण्डुलाः पूर्णपात्रं चेत्येतान्यासादयेत् । ततस्त्रिभिः कुशैः कुश-द्वयं छित्त्वा प्रादेशमात्रं स्थापयेत् । ततः प्रोक्षणीपात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पवनम् । तदेव पात्रं सव्यहस्ते निधाय सव्यहस्तस्थितस्यैव दक्षिणेनोदिङ्गनम् । ततो भूमौ निधाय प्रणीतोदकेन प्रोक्षेत् । तत आ-सादितानामेकैकस्य प्रोक्षणं प्रोक्षण्युदकेन । ततः प्रणीताग्न्योर्मध्ये प्रोक्ष-णीपात्रस्य निधानम् । तत आज्यस्थाल्यामाज्यनिर्वापः । चरुस्थाल्यां तण्डुलप्रक्षेपः । त्रिः प्रक्षालनम् । आज्याधिश्रयणम् । आज्यादुत्तरतश्च-रोरधिश्रयणम् । उभयोः पर्यग्निकरणम् । उदकोपस्पर्शनम् । चरुश्रपणं कृत्वाऽर्धशृते चरौ स्रुवप्रतपनं संमार्गकुशैः संमार्जनम् । अग्रैरग्रं मूलैर्मूलं प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य निदधाति । आज्योद्वासनम् । ततश्चरो-रुद्वासनम् । शृतानां तु पूर्वेणोद्वासितानां तु पृष्ठतः । पवित्राभ्यामाज्यो-त्पवनम् । ततोऽवेक्षणम् । तत आज्यमध्ये पतितापद्रव्यनिरसनम् । प्रोक्ष-ण्युत्पवनम् । उपयमनकुशादानम् । ततस्तिष्ठन्समिधोऽभ्याधाय प्रोक्षण्यु-दकेनाग्निं पर्युक्षेत् । पवित्रयोः प्रणीतामध्ये निधानम् । ततो दक्षिणं जान्वाच्य स्रुवेणाज्यमादाय जुहोति 'प्रजापतये स्वाहा' इति पश्चिमत आरभ्य पूर्वपर्यन्तमाघारयेत् । इदं प्रजापतये न मम इति त्यागः । संस्रवं प्रोक्षणीमध्ये स्थापयेत् । एवं सर्वत्र ॥ 'इन्द्राय स्वाहा' इति तथैव इदमिन्द्राय न मम इति । एतावाघारौ ॥ 'अग्नयेस्वाहा' इति पूर्वो-त्तरतः । 'सोमाय स्वाहा' इति पूर्वदक्षिणतः । एतावाज्यभागौ ॥ ततः प्रधानहोमः ॥ ततः 'अग्नये स्विष्टकृते स्वाहा' इति स्विष्टकृत् ॥ आज्यहोमे स्विष्टकृत् सर्वहोमान्ते भवति ॥ ततो व्याहृतिभिराज्यं जुहु-यात् । 'भूःस्वाहा' इदमग्नये । 'भुवःस्वाहा' इदं वायवे । 'स्वःस्वाहा' इदं सूर्याय । 'भूर्भुवःस्वःस्वाहा' इदं प्रजापतये ॥ ततः 'त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोअवया सिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाᳩसि प्रमुमुग्ध्यस्मत्स्वाहा'. इदमग्नीवरुणाभ्याम् । 'स त्वं नो अग्ने वमो भवोती नेदिष्ठो अस्या

उपसो व्युष्टौ । अत्र यक्ष्वनो वरुण ५ रराणो वीहिमृडीक ५ सुहवो न एधि स्वाहा ' इदमग्नीवरुणाभ्यां न मम । ' अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा ' इदमग्नये अयसे । ' ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ' इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । 'उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ५ श्रथाय । अथावयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा' इदं वरुणायादित्यायादितये । ' प्रजापतये स्वाहा ' इदं प्रजापतये । एता आज्याहुतीर्ब्रह्मणाऽन्वारब्धो जुहोति ॥ ततः संस्रवप्राशनम् । पवित्रे अग्नौ प्रहरति । ब्रह्मणे पूर्णपात्रं दक्षिणा । प्रणीताविमोकः । उपयमनस्याग्नौ प्रक्षेपः । यत्र ब्राह्मणभोजनमाम्नातं तत्र तत्कुर्यात् । इति सकलस्थालीपाकेतिकर्तव्यता । आज्यहोमे चरुसंबद्धपदार्थनिवृत्तिः । अन्यत्समानम् ॥

पुंसवनम् ।

अथपुंसवनम् । गर्भाधानोत्तरं द्वितीये तृतीये वा मासि पूर्वोक्तकाले कर्ता शुचिर्गर्भिणीमुपवासं कारयित्वा स्नापयित्वाऽहते वाससी परिधाप्य कालाद्युल्लिख्य ' अस्य गर्भस्य बीजगर्भसमुद्भवैनोनिबर्हणार्थं पुंसवनं करिष्ये ' इति संकल्प्य पुण्याहमातृपूजाभ्युदयिकानि कृत्वा न्यग्रोधाऽवरोहाग्रपल्लवानुदकेन पिष्ट्वा ' हिरण्यगर्भोऽद्भ्यः संभृत—' इति द्वाभ्यामृग्भ्यां पत्न्या नासिकादक्षिणपुटे आसिञ्चेत । अत्र यदि मे वीर्यवान् पुत्रो भवत्विति कामना तत उदकपूर्णं शरावं बध्वा उपस्थे स्थापयित्वा ' सुपर्णोऽसि ' इति विकृतिच्छन्दस्कया ' स्वःपत ' इत्यन्तया गर्भाशयं स्पृष्ट्वा अभिमन्त्रयेत् ॥ इति पुंसवनम् ॥

सीमन्तोन्नयनम् ।

अथ सीमन्तोन्नयनम् । कर्ता शुचिर्दर्भपाणिर्देशकालौ स्मृत्वा ' बीजगर्भसमुद्भवैनोनिबर्हणार्थं परमेश्वरप्रीत्यर्थं सीमन्तोन्नयनं करिष्ये ' इति संकल्प्य पुण्याहवाचनमातृपूजाभ्युदयिकानि कृत्वा पञ्च भूसंस्कारान्कृत्वा लौकिकाग्निमुपसमाधायाऽऽज्यभागान्तं कृत्वा तिलमुद्गमिश्रेण चरुणा ' प्रजापतये स्वाहा ' इति जुहुयात् । इदं प्रजापतये इति त्यागः

तत उत्तरार्धात्स्विष्टकृतं हुत्वा व्याहृत्यादिनवाहुतीर्हुत्वा संस्रवं प्राश्य ब्रह्मणे पूर्णपात्रं वरं वा दत्त्वाऽग्नेः पश्चात्कोमलासने भद्रपीठाख्ये गर्भिणीं स्नातामहतवस्त्रामुपवेश्य औदुम्बरेण युग्मफलवताऽवकस्तबकेन अश्वत्थ-शङ्कुना त्रिभिश्च दर्भपिञ्जूलैस्त्रेण्या शलल्या सूत्रकर्तनार्थया च सूच्या इत्येतैरेकीकृतैस्ततः सीमन्तं विनयति 'भूर्भुवःस्वर्विनयामि' इति मन्त्रेण। यद्वा 'भूर्विनयामि भुवर्विनयामि स्वर्विनयामि' इति त्रिभिर्मन्त्रैस्त्रिर्वि-नयति । ततस्तत्सर्वं वेण्यां बध्नाति । 'अयमूर्जावतो वृक्ष उर्जीव फलिनी भव' इति मन्त्रेण । ततो वीणागाथिनौ प्रति 'राजानं संगायेताम्' इति प्रैषं ददाति । यद्वा 'सोमं राजानं संगायेताम्' इति प्रैषः । तौ च प्रेषितौ 'सोम एव नो राजेमा मानुषीः प्रजाः । अविमुक्तचक्र आसीरं-स्तीरे तुभ्यमसौ' इति गाथां गायतः असौस्थाने समीपावस्थिताया गङ्गा-प्रमुख्या नद्या नाम गृह्णाति स्त्री ॥ इति सीमन्तः ॥

सोष्यन्तीकर्म ।

अथ सोष्यन्ती कर्ता शुचिः प्रसूतिशूलवती स्त्रियं 'एजतु दशमास्यः' इत्यृचा 'अस्त्रञ्जरायुणा सह' इत्यन्तयाऽद्भिरभ्युक्षति । ततः स्त्रीसमीपे 'अवैतु पृश्निशेवलꣳ शुने जराय्वत्तवे । नैव माꣳसेन पीवरी न कस्मिंश्च नायतनमवजरायु पद्यताम्' इति मन्त्रं जपेत् ॥

जातकर्म ।

अथ कुमारे जाते नालच्छेदात्पूर्वं स्नात्वा पुण्याहवाचनवृद्धिश्राद्धादि कृत्वा 'जातकर्म करिष्ये' इति संकल्प्य मेधाजननायुष्ये कुर्यात् । मेधाजननं यथा । अनामिकया सुवर्णान्तर्हितया मधुघृते मिश्रयित्वा केवलं वा घृतं 'भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवःस्वःसर्वं त्वयि दधामि' इति मन्त्रेण सकृत्प्राशयेत् । आयुष्यं यथा । कुमारस्य नाभिसमीपे कर्णसमीपे वा 'अग्निरायुष्मान्' इत्यष्टौ मन्त्रान् त्रिर्जपेत् । ते यथा । 'अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ब्रह्माऽऽयुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । देवा आ-युष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ऋषय आयु-ष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । पितर आयु-ष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । यज्ञ आयु

ष्मान्स दक्षिणाभिरायुष्मास्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। समुद्र आयुष्मान्स स्रवन्तीभिरायुष्मास्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि।ततः त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्' इति मन्त्रं जपति। यदि पिता कामयेताऽयं कुमारः सर्वमायुरियादिति तदा कुमारमभिमृशेत् 'दिवस्परि—' इत्यनुवाकेन।अथ चतुरो ब्राह्मणान् कुमारस्य चतुर्दिक्षु एकं च मध्ये स्थापयित्वा इममनुप्राणितेति तान् प्रेष्यति। ततः पूर्वादिदिग्वस्थिता ब्राह्मणाः क्रमेणैव कुमारं लक्ष्यीकृत्य चतुरो मन्त्रान्पठन्ति 'प्राणः व्यानः अपान उदानः' मध्यस्थः पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात् 'समानः' इति।ब्राह्मणाभावे स्वयमेव तस्यां दिशि स्थित्वा मन्त्रान्ब्रूयात्। तदा तु प्रैषाभावः। ततो यस्मिन्देशे कुमारो जातस्तं देशं 'वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्माता विद्यात्पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्' इति मन्त्रेण कुमारमभिमृशति। ततःकुमारस्य मातरम् 'इडाऽसि मैत्रावरुणी वीरे वीरमजीजनथाः। सा त्वं वीरवती भव यास्मान्वीरवतोकरत्' इति मन्त्रेणाभिमन्त्रयेत्। अथ सूतिकाया दक्षिणं स्तनं प्रक्षाल्य 'इमं स्तनम्' इत्यृचा कुमाराय प्रयच्छति। ततो 'यस्ते स्तनः—' इत्यृचाद्वयेन वामं प्रक्षाल्य प्रयच्छति। ततः कुमारस्य शिरःप्रदेशे जलपूर्णं पात्रम् 'आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ। एवमस्यां सूतिकायां सपुत्रिकायां जाग्रथ' इति मन्त्रेण स्थापयेत्। तदुदपात्रं यावत्सूतिकोत्थानं तावत्तिष्ठेत्। ततःसूतिकागृहद्वारे पूर्वोक्तान्पञ्चभूसंस्कारान्कृत्वाऽग्निं स्थापयेत्।ततः तण्डुलकणमिश्रान्सायं प्रातर्जुहोति। सायमाहुतिद्वयं प्रातश्चेति। तद्यथा—'शण्डामर्का उपवीरः शौण्डिकेय उलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा॥ १॥ आलिखन्ननिमिषः किंवदन्त उपश्रुतिः। हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा॥ २॥ 'इदमग्नये' इत्युभयत्र त्याग इति हरिहरः॥

नैमित्तिकम्।

अथ नैमित्तिकं यदि कुमारग्रहो बालमभिभवेत्तदा मत्स्यग्रहणजालेनोत्तरीयेण वा तं प्रच्छाद्याङ्के गृहीत्वा वक्ष्यमाणं जपेत्—'कूर्कुरः सकूर्कुरः कूर्कुरो बालबन्धनः। चेचेच्छुनक सृज नमस्ते अस्तु सीसरोलपेतापह्वर तत्सत्यम्। यत्ते देवावरमदुः स त्वं कुमारमेवावृणीथाः। चेचेच्छुनक सृज नमस्ते अस्तु सीसरोलपेतापह्वर तत्सत्यम्॥ यत्ते देवा वरम-

द्दुः स त्वं कुमारमेवावृणीथाः। चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम्॥ यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ। चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर' इति॥ ततो न नामयति न रुदति न हृष्यति न ग्लायति। यत्र वयं वदामो यत्र चाऽभिमृशामसि' इत्यनेन बालमभिमन्त्रयेत्॥ इति जातकर्मादि॥

नामकरणम्।

सूतकान्ते सूतिकामुत्थाप्य नामकरणाङ्गतया त्रीन्ब्राह्मणान्भोजयित्वा। शुचिर्देशकालौ स्मृत्वा 'बालस्य बीजगर्भसमुद्भवैनोनाशार्थं नाम करिष्ये' इति संकल्प्य पुण्याहवाचननान्दीश्राद्धादि कृत्वा नाम कुर्यात्। अत्रायं शिष्टाचारः। पिप्पलपत्रादौ करिष्यमाणनाम लिखित्वा संपूज्य ब्राह्मणानुज्ञातो बालस्य दक्षिणे कर्णे कथयेत् 'चैत्रनामासि' इति॥

निष्क्रमणम्।

अथ निष्क्रमणम्। चतुर्थे मासि शुभे दिने शुचिर्नान्दीश्राद्धं कृत्वा बालकं 'तच्चक्षुः' इति मन्त्रेण सूर्यं दर्शयति। यदि पिता प्रोषितः पुत्रजन्मोत्तरं गृहे आगच्छति तदा गृहोपस्थानं कुर्यात्। 'गृहा मा बिभीत' इति। ततः पुत्रं दृष्ट्वा 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्र नामाऽसि स जीव शरदः शतम्' इति जपेत्। ततः 'प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि। सहस्रायुषाऽमुकशर्मन् स जीव शरदः शतम्' इति मन्त्रेण कुमारस्य मूर्धानं जिघ्रेत्। ततः पुनः 'गवां त्वाहिंकारेणावजिघ्रामि सहस्रायुषाऽमुकशर्मन् जीव शरदः शतम्' इति मन्त्रेण सकृन्मूर्धानमवजिघ्रति द्विस्तूष्णीम्। ततो बालस्य दक्षिणे कर्णे 'अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतꣳ शरदो जीवसेधा अस्मै वीरान्छश्वत इन्द्र शिप्रिन्' इति मन्त्रं जपेत्। ततः सव्ये 'इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिनत्वमह्नाम्' इति जपेत्। कन्यायास्तु मूर्धावघ्राणमात्रं न मन्त्रजपः॥

अन्नप्राशनम्।

अथान्नप्राशनम्। पूर्वोक्ते दैवज्ञोदिते मुहूर्ते 'शिशोरस्य बीजगर्भसमुद्भवैनोनिबर्हणार्थमन्नप्राशनमहं करिष्ये' इति संकल्प्य पुण्याहाद्यभ्युद-

यिकान्तं कृत्वा पञ्चभूसंस्कारचरुश्रपणाद्याज्यभागान्तं पूर्ववत्कुर्यात् । तत्र प्रधानम् । 'देवीं वाचमजयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा' इदं देव्यै वाचे । देवीं वाचमिति मन्त्रं पुनः पठित्वा वाज इत्यमरा त्रिष्टुप् छन्दः अन्नदेवहोमे विनियोगः । 'वाजो नो अद्य प्रसुवाति दानं वाजो देवाꣳ ऋतुभिः कल्पयाति । वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयं स्वाहा' इदं वाचे वाजाय इति त्यागः । इदमाहुतिद्वयमाज्येन । ततः स्थालीपाकेन जुहुयात् । तद्यथा—'प्राणेनान्नमशीय स्वाहा । इदं प्राणाय । अपानेन गन्धानशीय स्वाहा । इदमपानाय । चक्षुषा रूपाण्यशीय स्वाहा । इदं चक्षुषे । श्रोत्रेण यशोऽशीय स्वाहा । इदं श्रोत्राय ॥ एवं चतस्र आहुतीर्हुत्वा स्विष्टकृदादिदक्षिणान्तं समाप्यैकस्मिन्पात्रे सर्वान्रसान्समुद्धृत्य सकृत्तूष्णीं प्राशयेत् 'हन्त' इति मन्त्रेण वा । तत्र काम्यता—तत्र यदि बालस्य वाग्मित्वमिच्छेत्तदा भरद्वाजपक्षिविशेषमांसं प्राशयेत् । यद्यन्नाद्यत्वं तर्हि कपिञ्जलमांसम् । यदि जवत्वं तदा मत्स्यमांसम् । यदि दीर्घायुष्यं तर्हि कृकषामांसम् । कृकषा गृहगोधिका । यदि सर्वाणि तदा सर्वमांसानि प्राशयेत् । ततः कर्मसमृद्ध्यर्थं ब्राह्मणभोजनम् ।

इत्यन्नप्राशनम् ॥

चूडाकरणम् ।

अथ चूडाकरणम् । तत्र कर्तोक्तान्यतमकाले मातृपूजाभ्युदयिके कृत्वा त्रीन्ब्राह्मणान्संभोज्य 'अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्ध्यर्थं चौलकर्म करिष्ये' इति संकल्प्य शुद्धभूमौ लौकिकाग्निं संस्थाप्य मात्रङ्के कुमारमग्नेः पश्चिमत उपवेश्य ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा । शीतोष्णोदके नवनीतघृतदध्यन्यतमं त्रिश्वेतां शल्लीं पृथक् पृथक् निबद्धानि त्रीणि त्रीणि कुशतरुणानि ताम्रपरिष्कृतमायसं क्षुरमानडुहं गोमयं चेत्युपकल्प्य पवित्रकरणादिपर्युक्षणान्तं कृत्वा आघारादिस्विष्टकृदन्तं होमं विधाय संस्रवान्प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दत्त्वा 'उष्णेन वाय उदकेनेह्यदिते केशान्वप' इत्यनेन मन्त्रेण शीतास्वप्सु उष्णा अप आसिच्य नवनीताद्यन्यतमं च तासु प्रक्षिप्य तदुदकमादाय 'सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चसे' इत्यनेन मन्त्रेण दक्षिणं शिरःप्रदेशं छेदयित्वा त्र्येण्या शल्ल्या केशान्विनीय 'ओषधे

त्रायस्व' इति मन्त्रेण कुशतरुणान्यन्तर्धाय 'शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मामा हिꣳसीः' इत्युपकल्पितक्षुरमादाय कुशतरुणान्तर्हितेषु निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय' इत्यनेन मन्त्रेण क्षुरमभिनिधाय 'येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासत्' इत्यनेन मन्त्रेण सकेशानि कुशतरुणानि प्रच्छिद्यानडुहे गोमयपिण्डे उत्तरतो ध्रियमाणे प्रक्षिप्य एवमेव तूष्णीं वारद्वयं कुर्यात्। एवमेव पश्चिमोत्तरयोः शिरःप्रदेशयोः सकृत्समन्त्रं द्विस्तूष्णीं कुर्यात्। पश्चिमे 'त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्' इति छेदनम्। उत्तरतो 'येन भूरिश्चरादिवं ज्योक्च पश्चाद्धि सूर्यम्। तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये' इति छेदनम्। अन्यदविशिष्टम्। ततो 'यत्क्षुरेण मज्जयता सुपेशसा वप्तावा वपति केशाञ्छिन्धि शिरो मास्यायुः प्रमोषीः' इत्यन्तेन मन्त्रेण शिरःसमन्तात्प्रदक्षिणं क्षुरं भ्रामयेद्द्विस्तूष्णीम्। ततस्तेनैवोदकेन समस्तं शिर आप्लाव्याक्षण्वन् परिवप' इत्यनेन मन्त्रेण नापिताय क्षुरं प्रयच्छेत्। ततो नापितः केशान्वपन्यथोक्तं केशशेषकरणं कुर्यात्। अथ सकेशं गोमयपिण्डमुदकादौ प्रक्षिप्याचार्याय वरं दद्यादिति। इयमेवेतिकर्तव्यता केशान्तेऽपि ज्ञेया। इयाँस्तु विशेषः। उष्णोदकासेकमन्त्रे 'उष्णेन वाय उदकेनेह्यदिते केशश्मश्रु' वपनार्थे क्षुरपरिहरणे मुखसहितं शिरः परिहरेत्। मन्त्रे च 'यत्क्षुरेण मज्जयता' इत्यादि 'मास्यायुः प्रमोषीर्मुखम्' इति। स्वाचार्याय च गोर्देयेति ॥

उपनयनम् ।

अथोपनयनम्। यथोक्तकाले मातृपूजाभ्युदयिके कृत्वा कुमारं वापयित्वा त्रीन्ब्राह्मणान्संभोज्य पञ्चभूसंस्कारान्विधाय लौकिकाग्निं संस्थाप्य कुमारमाचार्यसमीपमानीय तद्दक्षिणतोऽवस्थाप्याचार्येण 'ब्रह्मचर्यमागामिति ब्रूहि' इत्युक्तो वटुः 'ब्रह्मचर्यमागामिति ब्रूयात्। ततो ब्रह्मचार्यसानीति ब्रूहि' इत्युक्तो 'ब्रह्मचार्यसानीति' ब्रूयात्। अथ येनेन्द्रायेति वासः परिधाप्य 'इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्। प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्' इति मन्त्रं 'युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति

जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः' इति वा मन्त्रं पठति । तूष्णीं वा वटोः कटिप्रदेशे मेखलामाबध्य 'यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः' इति मन्त्रं पठतो यज्ञोपवीतं निवेश्य तूष्णीमजिनं परिधाप्य दण्डं दद्यात् । ततो वटुः 'यो मे दण्डः परापतद्वैहायसोऽधि-भूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय' इत्यनेन मन्त्रेण दण्डं परिगृह्णीयात् । अथाचार्यः स्वाञ्जलिं जलेनापूर्य 'आपो हिष्ठा' इति तिसृभिः माणवकाञ्जलिं तेनैव पूरयित्वा 'सूर्यमुदीक्षस्व' इति वटुं वदेत् । वटुश्च 'तच्चक्षुः' इति मन्त्रेण सूर्यमुदीक्षेत । अथाचार्यो वटोर्दक्षिणांसोपरि स्वदक्षिणहस्तं नीत्वा 'मम व्रते हृदयं ते दधामि । मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकमना जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यम्' इति मन्त्रेण हृदयमालभ्य वटोर्दक्षिणं हस्तं साङ्गुष्ठं गृहीत्वा 'को नामासि' इति वदेत् । वटुः 'अमुकशर्माहं भोः' इति प्रतिवदेत् । ततः 'कस्य-ब्रह्मचार्यसि' इत्युक्तो वटुः 'भवतः' इति ब्रूयात् । अथाचार्य 'इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवामुकशर्मन्' इति पठित्वा 'प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामि अद्भ्यस्त्वौषधीभ्यस्त्वा परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददामि अरिष्ट्या' इति मन्त्रेण 'भूतेभ्यो वटुं त्वा ददामि' प्रदक्षिणीकृत्य स्वोत्तरतो वटावुपविष्टे ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा आद्याः स्विष्टकृदन्ताश्चतुर्दशाज्याहुतीर्हुत्वा हुतशेषं प्राश्य पूर्णपात्रं वरं वा ब्रह्मणे दद्यात् । अथाचार्येण 'ब्रह्मचार्यसि' इत्युक्तो वटुः 'असानि' इति ब्रूयात् । 'अपोऽशान' इत्युक्तः अशानि' इति । 'कर्म कुरु' इत्युक्तः 'करवाणि' इति । 'मा दिवा सुषुप्थाः' इत्युक्तो 'न स्वपानि' इति । 'वाचं यच्छ' इत्युक्तो 'यच्छानि' इति । 'समिधमाधेहि' इत्युक्त 'आदधानि' इति । 'अपोऽशान' इत्युक्तः 'अशानि' इति ब्रूयात् । अथाचार्योऽग्नेरुत्तरतो दक्षिणतो वा प्रत्यङ्मुखायोपविष्टाय तिष्ठते वा पादोपसंग्रहपूर्वकमुपसन्नायाचार्यमीक्षमाणाय स्वयमीक्षिताय वटवे ॐकारव्याहृतिपूर्वकं प्रथमं पच्छः, द्वितीयमर्धर्चशः, तृतीयं सर्वामृचं च पठन् सावित्रीमुपदिशेत् । अथ वटुः पूर्वाभिमुखो दक्षिणहस्तेन 'अग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा असि । एवं मां सुश्रवः सौश्रवसं कुरु । यथा त्वमग्ने

देवानां यज्ञस्य निधिपा असि । एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ' इत्येतैः पञ्चभिर्मन्त्रैः परिसमिन्धनप्रक्षेपेणाग्निं संधुक्ष्याऽद्भिः पर्युक्ष्य तिष्ठन् ' अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा ' इत्यनेन मन्त्रेणोक्तलक्षणामेकां समिधमग्नावादध्यादनेनैव द्वितीयां तृतीयां चादध्यात् । ' एषा ते अग्ने समित् ' इत्यादिना वा मन्त्रेण । ' अग्नये समिधमाहार्षम् ' इति ' एषा ते अग्ने समित् ' इत्येताभ्यां समुचिताभ्यां मन्त्राभ्यां वा एकैकशस्तिस्रः समिध आदध्यात् । अथोपविश्य पूर्ववत् ' अग्ने सुश्रवः ' इत्यादिभिरग्निं संधुक्ष्य पर्युक्ष्य तूष्णीं पाणी प्रताप्य ' तनूपा अग्नेऽसि तन्वं मे पाहि । आयुर्दा अग्नेऽस्यायुर्मे देहि । वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण । मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु । मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ ' इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं निमार्ष्टि । ततः शिष्टाचारात् ' अङ्गानि च म आप्यायताम् ' इत्यनेन शिरःप्रभृतिपादान्तं सर्वाङ्गानि स्पृशेत् । ' वाक्च म आप्यायताम् ' इति मुखम् । ' प्राणश्च म आप्यायताम् ' इति नासारन्ध्रे युगपत् । ' चक्षुश्च म आप्यायताम् ' इति चक्षुषी युगपत् ' श्रोत्रं च म आप्यायताम् ' इति दक्षिणं श्रोत्रं ततोऽनेनैव वामम् । 'यशो बलं च म आप्यायताम्' इति मन्त्रं पठित्वा युगपद्बाहू स्पृशेत् । ' अथ तन्नो अस्तु स्याप्रुपम् ' इति हृदि स्पृशेत् ॥ ततः 'अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं भो असुकशर्मंस्त्वामभिवादये ' इत्युक्त्वा गुर्वादिकमभिवादयेत् । ततो गुर्वादिः 'आयुष्मान्भवामुकशर्मन् भो३' इति प्रत्यभिवादयेत् ॥ ततः 'भवति भिक्षां देहि' इति ब्राह्मणो भिक्षेत् । 'भिक्षां भवति देहि' इति राजन्यः । ' भिक्षां देहि भवति ' इति वैश्यः । एवं भिक्षित्वा भैक्षं गुरवे निवेद्याहःशेषं वाग्यतस्तिष्ठेदासीत वेति नियमः । ततः उपास्तमयं संध्यामुपास्य पूर्ववदग्निकार्यं कृत्वा वाचं विसृजेत् ॥ इत्युपनयनम् ॥

समावर्तनम् ।

अथ समावर्तनम् । तत्राचार्यो मातृपूजाभ्युदयिके कृत्वा बटुना ' भो आचार्याऽहं स्नास्ये' इत्युक्तः 'स्नाहि' इत्युक्त्वा पञ्चभूसंस्कारान्कृत्वा लौ-

किकाग्निं संस्थाप्य ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा 'ऋग्वेदमधीत्य स्नाति' तदा 'पृथिव्यै स्वाहा । अग्नये स्वाहा' इति द्वे आज्याहुती जुहुयात्–यदि यजुर्वेदं तदा 'अन्तरिक्षाय स्वाहा । वायवे स्वाहा' इति द्वे। यदि सामवेदं तदा 'दिवे स्वाहा । सूर्याय स्वाहा' इति द्वे। यद्यथर्ववेदं तदा 'दिग्भ्यः स्वाहा' 'चन्द्रमसे स्वाहा' इति द्वे। यद्येकदा वेदचतुष्टयं त्रयं द्वयं वा तदा तद्वेदाहुतीर्हुत्वा 'ब्रह्मणे'। 'छन्दोभ्य' इति वा द्वे हुत्वा 'प्रजापतये' इत्याद्याः सप्त तन्त्रेण जुहुयात्। ततो 'ब्रह्मणे, छन्दोभ्यः' इत्याद्या नवाहुतीर्हुत्वा महाव्याहृत्यादिस्विष्टकृदन्ता दशाहुतीर्हुत्वा संस्रवान्प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दक्षिणा दद्यात्। ततो ब्रह्मसंग्रहणपूर्वकं गुरुं नमस्कृत्य परिसमूहनादित्र्यायुष्करणान्तं तस्मिन्नग्नौ समिदाधानं कुर्यात्। ततोऽग्नेरुत्तरतोऽष्टौ कलशान् दक्षिणोत्तरायतान्संस्थाप्य तत्पूर्वभागे प्रागग्रकुशेषूदङ्मुखः स्थित्वा। 'येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहा स्खलोऽविरुजस्तनूदूषुरिन्द्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि' इति मन्त्रेणाद्यकुम्भादुदकमादाय 'तेन मामाभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय' इति मन्त्रेणात्मानमभिषिच्यैवमन्येभ्यः प्रत्येकं समन्त्रकं जलमादाय 'येन श्रियमकृणुतां येनावमृशता᳚ सुराम्। येनाक्ष्यावभ्यषिञ्चता᳚ यद्वा तदश्विना यशः' इति। आपो हि ष्ठा मयोभुवः। यो वः शिवतमो रसः। तस्मा अरं गमाम वः' इत्येतैश्चतुर्भिमन्त्रैः प्रतिमन्त्रमात्मानमभिषिच्य त्रिस्तूष्णीमभिषिञ्चेत्। तत 'उदुत्तमम्' इति मन्त्रेण मेखलां शिरोमार्गेण निःसार्य भूमौ निधायाऽन्यद्वासः परिधायाऽऽचम्य 'उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमय' इत्यनेनादित्यमुपस्थाय दधि वा तिलान्वा दक्षिणहस्तमध्यगतसोमतीर्थेन प्राश्य जटालोमनखानि वापयित्वा स्नात्वाऽऽचम्योक्तलक्षणेनौदुम्बरकाष्ठेन 'अन्नाद्याय व्यूहध्व᳚ सोमो राजाय मागमत् स मे मुखं प्रमार्क्ष्यद्यशसा च भगेन च' इत्यनेन मन्त्रेण दन्तान् क्षालयित्वाऽऽचम्य सुगन्धिद्रव्यमिश्रितन यवादिचूर्णेन तैलसन्नीतेन शरीरमुद्वर्त्य पुनः सशिरस्कं स्नात्वाऽऽचम्य चन्दनाद्यनुलेपनं पाणिभ्यां गृहीत्वा मुखं नासिकां च 'प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पय' इत्यनेन मन्त्रेणालभ्य पाणी प्रक्षाल्य तदुदकमञ्जलिनादायापसव्यं कृत्वा दक्षिणमुखो भूत्वा 'पितरः शुन्धध्वम्' इत्यनेन मन्त्रेण पितृतीर्थेन निषिच्य यज्ञोपवीती भूत्वोदकमुपस्पृश्य

चन्दनादिना 'सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम्' इति मन्त्रेणात्मानमनुलिप्य 'परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये' इति मन्त्रेणाहतं धौतं वासः परिधाय पूर्वभृतमुपवीतमुत्तार्य जले प्रक्षिप्य पदं नवमुक्तलक्षणमुपवीतं 'यज्ञोपवीतं' इत्यादिना मन्त्रेण परिधाय 'यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्चमाविन्दद्यशो मा प्रतिपद्यतामिति । एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत । सुमनसः प्रतिगृह्णाति । या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन च' इति पुष्पाण्यतः प्रतिगृह्य 'यद्यशोप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन संग्रथिताः सुमनस आबध्नामि यशोमयी' इति मन्त्रेण शिरसि बद्ध्वा 'युवा सुवासाः' इत्य-नयर्चोष्णीषेण शिरो वेष्टयित्वा 'अलंकरणमसि भूयोऽलंकरणं भूयात्' इति मन्त्रेण दक्षिणकर्णे कुण्डलं कृत्वा तेनैव वामकर्णे धृत्वा 'वृत्रस्यासि कनीनकश्च खं विलोक्य' 'बृहस्पतेश्छदिरसि पाप्मनो मामंतर्द्धेहि तेजसो यशसो मामन्तर्द्धेहि' इत्यन्यस्माच्छत्रं प्रतिगृह्य 'प्रतिष्ठे स्थो विश्वतो मा पातम्' इत्युपानहौ युगपत्पादयोः प्रतिमुच्य 'विश्वाभ्यो मानाष्ट्राभ्य-स्परिपाहि सर्वतः' इति वैणवं दण्डमादद्यात् । अथाचार्यः स्नातकस्य यमान् त्रिरात्रव्रतानि च श्रावयेत् । स च तानि यथोक्तानि कुर्यात् ॥

इति समावर्तनम् ॥

विवाहप्रयोगः ।

अथ विवाहः । तत्र पुण्येऽहनि वरपिता मातृपूजाभ्युदयिके कृत्वा सुतं कन्यापितृगृहमानयेत् । ततः कन्यापिता मातृपूजाभ्युदयिके कृत्वा गृहा-गतं वरं मधुपर्केणार्चयेत् । तत्रार्च्यान्तिकमानीय 'विष्टरो विष्टरो विष्टरः' इत्यन्येन श्राविते 'प्रतिगृह्यताम्' इत्यर्च्यहस्ते विष्टरं दद्यात् । अथार्च्यः 'वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इदं तमभितिष्ठामि योमाक-श्चाभिदासति' इत्यनेन मन्त्रेणासनाधो विष्टरं कृत्वा तत्रोपविशेत् । ततोऽर्चकः 'पाद्यं पाद्यं पाद्यम्' इत्यन्येन श्राविते 'प्रतिगृह्यताम्' इति पाद्यार्थोदकमर्च्याय समर्पयेत् । ततोऽर्च्यस्तत्पात्रं भूमौ निधायाञ्ज-लिना जलमादाय 'विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः' इति मन्त्रेण दक्षिणं पादं प्रक्षाल्य तेनैव मन्त्रेण वामं

प्रक्षालयेद्ब्राह्मणः। क्षत्रियवैश्यौ तु पूर्वं सव्यं ततो दक्षिणमिति विशेषः ततोऽर्चकेन पुनः पूर्ववद्दत्तं विष्टरमर्च्यः 'वर्ष्मोसि' इत्यादिमन्त्रेण पाद-योरधस्तान्निदध्यात्। ततोऽर्चकः 'अर्घोऽर्घोऽर्घः' इत्यन्येन श्राविते 'प्रतिगृह्यताम्' इत्युक्त्वा 'आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानि' इति मन्त्रमुक्तवतेऽर्च्यायार्घं प्रयच्छेत्। ततोऽर्च्योऽर्घं प्रतिगृह्य मूर्धपर्यन्तमा-नीय 'समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टा अस्माकं वी-रा मापरासेचिमत्पयः' इत्यनेन मन्त्रेण निनयन्नभिमन्त्रयेत्। ततोऽर्चकः 'आचमनीयमाचमनीयमाचमनीयम्' इत्यन्येन श्राविते 'प्रतिगृह्यताम्' इत्युक्त्वाऽर्च्यहस्ते आचमनीयं प्रयच्छेत्। अथार्च्यः प्रतिगृह्य 'आमाग-न्यशसा सᳪं सृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्' इति मन्त्रेण सकृदाचम्य स्मार्तमाचमनं कुर्यात्॥ ततोऽर्चको 'मधुपर्को मधुपर्को मधुपर्कः' इत्यन्येनोक्ते 'प्रतिगृह्यताम्' इति ब्रूयात्। ततो-ऽर्च्योऽर्चकहस्तस्थितमुद्घाटितं मधुपर्कं 'मित्रस्य त्वा चक्षुषा प्रतीक्षे' इति मन्त्रे-णावेक्ष्य 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति-गृह्णामि' इति मन्त्रेण सकृदालोड्य तूष्णीं सकृदनामिकाङ्गुष्ठाभ्यामादाय बहिर्निक्षिप्य पुनर्द्विरालोड्य निरीक्ष्य 'यन्मधुनो मधव्यं परमᳪं रूपम-न्नाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्यो न्नादोऽसानि' इति मन्त्रेणानामिकाङ्गुष्ठाभ्यामादाय त्रिः प्राश्नीयात्। 'मधु वाता ऋतायते' इत्यादिभिस्त्रिभिर्ऋग्भिः प्रत्यृचं त्रिः प्राश्नीयाद्वा-शेषं शिष्यादिभ्यो दद्यात्सर्वं वा भक्षयेत् प्राग्दिश्यसञ्चरे वा प्रक्षिपेत्। अथाचम्य 'वाङ्म आस्येऽस्तु' इति कराग्रेण मुखं स्पृशेत्। 'नसोर्मे प्राणो-ऽस्तु' इति दक्षिणवामनासारन्ध्रे। 'अक्ष्णोर्मे चक्षुः' इति दक्षिणोत्तरे चक्षु-षी। 'कर्णयोर्मे श्रोत्रमस्तु' इति मन्त्रावृत्त्या दक्षिणोत्तरौ कर्णौ स्पृशेत्। एवं 'बाह्वोर्मे बलमस्तु' इतिदक्षिणोत्तरौ बाहू। 'ऊर्वोर्मे ओजोऽस्तु' इति युगपदूरू। 'अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु' इति शिरःप्रभृ-तिपादान्तं सर्वाङ्गमुभाभ्यां हस्ताभ्यां स्पृशेत्। ततः खड्गहस्तोऽर्चकः 'गौ-र्गौर्गौरालभ्यताम्' इति ब्रूयात्। अथार्च्यो 'माता रुद्राणां—' इत्यादि 'पाप्माहतः ॐ' इत्युपांशूक्त्वा 'उत्सृजत तृणान्यत्तु' इत्युच्चैः प्रतिब्रूयात्। ततो वर ईशान्यां दिशि चतुर्हस्तायां वेदिकायां लौकिकं निर्मन्थ्यं वाऽग्निं स्थापयित्वा पश्चादग्नेस्तृणतूलकं कटं वा स्थापयेत्॥ ततः कन्यापिता वस्त्र-

चतुर्थं वराय प्रयच्छेत् । वरश्च तेषु मध्ये 'जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपा वा । शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः' इति मन्त्रेणैकं 'या अकृन्तन्नवयं या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः' इत्यपरमिति वासोयुगं कुमारीं परिधाप्य 'परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मिशतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये' इत्यनेनैकं 'यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च माविदद्यशो मा प्रतिपद्यताम्' इत्यपरमिति वासोयुगं परिदध्यात् । अथ वधूपिता 'परस्परं समञ्जेथाम्' इति संप्रेष्य वधूवरौ समञ्जयति । ततो वरः 'समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ' इति पठेत् । अथ कन्यापितोदङ्मुखः कुशजलाक्षतपाणिः 'अमुकगोत्रस्यामुकप्रवरस्याऽमुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः पुत्राय' इति वरपक्षे । 'अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीममुकशर्मणः पौत्रीममुकशर्मणः पुत्रीम्' इति कन्यापक्षे । एवं पुनर्वारद्वयमुक्त्वा 'प्राङ्मुखोपविष्टायामुकगोत्रायामुकप्रवरायाऽमुकशर्मणे प्रत्यङ्मुखोपविष्टाममुकगोत्राममुकप्रवराममुकनाम्नीमिमां कन्यां सालंकारां प्रजापतिदैवत्यां पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्तिकामो भार्यात्वेन तुभ्यमहं संप्रददे' इत्युक्त्वा सकुशाक्षतजलं कन्याहस्ते वरदक्षिणहस्ते वा दद्यात् । वरश्च 'द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु' इति मन्त्रेण तां प्रतिगृह्य 'कोऽदात्' इत्यादि कामस्तुतिं पठेत् । अथ कन्यापिता कन्यादानप्रतिष्ठासिद्ध्यर्थं सुवर्णं गोमिथुनं च दक्षिणां दत्त्वा यौतकत्वेन गा महिषीश्च ग्रामादि यथासंभवं दद्यात् ॥ ततो वरः । 'यदैषि मनसा दूरं दिशोऽनु पवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वमुकि' इत्यनेन मन्त्रेण प्रविष्टहस्तान्नादूर्ध्वं गृहीत्वा निष्क्रम्याग्निसमीपमागच्छेत् । अत्रावसरे कश्चिज्जलपूर्णं कुम्भं स्कन्धे निधायाग्नेर्दक्षिणत उत्तरतो वाऽभिषेकपर्यन्तं वाग्यत ऊर्ध्वं तिष्ठेत् ॥ ततो वधूपित्रा 'परस्परं समीक्षेथाम्' इति प्रेषितो वरः समीक्षमाणां समीक्षमाणः 'अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामास्योना शन्नो भव द्विपदे शं चतुष्पदे । सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजः ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्-

मये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् । सा नः पूषा शिवतमा मैरय सा न ऊरू उशती विहर । यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टै' इति पठित्वा प्रदक्षिणमग्निं परीत्य पश्चादग्नेः पूर्वस्थापिततेजनीकटयोरन्यतरस्मिन्दक्षिणपादमग्नेः कृत्वोपविशेत् । स्वदक्षिणतो वधूं चोपवेश्य ब्रह्मोपवेशनादि चरुवर्जं पर्युक्षणान्तं कर्म कुर्यात् ॥ इयांस्तु विशेषः ॥ शमीपलाशमिश्रा लाजा अश्मा लोहितमानडुहं चर्म वधूभ्राता शूर्पे दृढपुरुष आचार्याय वरद्रव्यमित्येतावन्ति वस्तून्युपकल्पयेत् । न प्रोक्षेत । ततः स्रुवमादाय दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धः 'प्रजापतये स्वाहा' इदं प्रजापतये । 'इन्द्राय स्वाहा' इदमिन्द्राय । इत्याघारौ ॥ 'अग्नये स्वाहा' इदमग्नये । 'सोमाय स्वाहा' इदं सोमाय । इत्याज्यभागौ ॥ ॐ 'भूः स्वाहा' इदमग्नये । ॐ 'भुवः स्वाहा' इदं वायवे । ॐ 'स्वः स्वाहा' इदं सूर्याय । 'त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवया सिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाᳪसि प्रमुमुग्ध्यस्मत्स्वाहा' इदमग्नीवरुणाभ्याम् । 'सत्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणᳪरराणो वीहि मृडीकᳪसुहवो न एधि स्वाहा' इदमग्नीवरुणाभ्याम् । 'अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अया नो यज्ञं वहास्यया नो धेहि भेषजᳪस्वाहा' इदमग्नयेऽयसे । 'येते० स्वाहा' इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुभ्यः स्वर्केभ्यः । 'उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमᳪश्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा' इदं वरुणाय । ब्रह्मणान्वारब्धो हुत्वा । ततो राष्ट्रभृतो यथा—'ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहावाट्' इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय । 'ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा' इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यः । 'सᳪहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्' इदᳪसᳪहिताय विश्वसाम्ने सूर्याय गंधर्वाय । 'सᳪहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा वाट्' इदं सुषुम्णे सूर्यरश्मये चन्द्रमसे गन्धर्वाय । 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा' इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः । 'इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्' इदमिषिराय

विश्वव्यचसे वाताय गन्धर्वाय । ‘इपिरो विश्वव्यचा वातो गन्धर्वस्तस्यापो-
ऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा ’ इदमद्भ्योऽप्सरोभ्य ऊर्म्यैः । ‘भुज्युः
सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट् ’ इदं
भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय । ‘भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य
दक्षिणा अप्सरसस्तावानाम ताभ्यः स्वाहा ’ इदं दक्षिणाभ्योऽप्सरोभ्य-
स्तावाभ्यः । ‘ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु
तस्मै स्वाहावाट् ’ इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय ।
‘ प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम
ताभ्यः स्वाहा ’ इदमृक्सामभ्योऽप्सरोभ्य एष्टिभ्यः ॥ अथ जयाहोमः ॥
‘चित्तं च स्वाहा’ इदं चित्ताय । ‘चितिश्च स्वाहा’ इदं चित्यै । ‘आकूतं च
स्वाहा’ इदमाकूताय । ‘आकूतिश्च स्वाहा’ इदमाकूत्यै । ‘विज्ञातं च स्वाहा’
इदं विज्ञाताय । ‘विज्ञातिश्च स्वाहा’ इदं विज्ञात्यै । ‘मनश्च स्वाहा’ इदं मनसे ।
‘शक्वरीश्च स्वाहा’ इदं शक्वरीभ्यः । ‘दर्शश्च स्वाहा’ इदं दर्शाय । ‘पूर्णमासं
च स्वाहा’ इदं पूर्णमासाय । ‘बृहच्च स्वाहा’ इदं बृहते । ‘रथन्तरं च स्वाहा’
इदं रथन्तराय । ‘ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु ।
तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहा ’ इदं प्रजा-
पतये जयानिन्द्राय’ ॥ अथाभ्यातानः ॥ ‘ अग्निर्भूतानामधिपतिः स माव-
त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देव-
हूत्या ५ स्वाहा ’ इदमग्नये भूतानामधिपतये । एवं समामवत्वित्येवमादि-
स्वाहाकारान्तस्योत्तरत्राप्यनुषङ्गः ॥ ‘ इन्द्रो ज्येष्ठानामधिपतिः० इद मि-
न्द्राय ज्येष्ठानामधिपतये । यमः पृथिव्या अधिपतिः० इदं यमाय पृथिव्या
अधिपतये । वायुरन्तरिक्षस्याधिपतिः० इदं वायवेऽन्तरिक्षस्याधिपतये ।
सूर्यो दिवोऽधिपतिः० इदं सूर्याय दिवोऽधिपतये । चन्द्रमा नक्षत्राणाम-
धिपतिः० इदं चन्द्रमसे नक्षत्राणामधिपतये । बृहस्पतिर्ब्रह्मणोऽधिपतिः०
इदं बृहस्पतये ब्रह्मणोऽधिपतये । मित्रः सत्यानामधिपतिः० इदं मित्राय
सत्यानामधिपतये । वरुणोऽपामधिपतिः० इदं वरुणायाऽपामधिपतये ।
समुद्रः स्रोत्यानामधिपतिः०इदं समुद्राय स्रोत्यानामधिपतये । अन्न ५ सा-
म्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्० इदमन्नाय साम्राज्या-
नामधिपतये ।। सोम ओषधीनामधिपतिः० इदं सोमायौषधीनामधिपतये ।
सविता प्रसवानामधिपतिः० इदं सवित्रे प्रसवानामधिपतये । रुद्रः पशूना-
मधिपतिः० इदं रुद्राय पशूनामधिपतये ’ । उदकोपस्पर्शनम् । त्वष्टारूपा-

णामधिपतिः० इदं त्वष्ट्रे रुद्राणामधिपतये। विष्णुः पर्वतानामधिपतिः०, इदं विष्णवे पर्वतानामधिपतये। मरुतो गणानामधिपतिः स मावत्वस्मिन्०, इदं मरुद्भ्यो गणानामधिपतिभ्यः। 'पितरः पितामहाः परेऽवरे ततास्तता-महा इह मान्वत्वस्मिन्० स्वाहा' इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्य-स्ततेभ्यस्ततामहेभ्यः। उदकस्पर्शनम्॥ 'अग्निरैतु प्रथमो देवताना ५ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदयं राजा वरुणोऽनुमन्यतां यथेय ५ स्त्री पौत्रमघं न रोदात्स्वाहा' इदमग्नये। 'इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्द-मभिविबुद्धयतामिय ५ स्वाहा' इदमग्नये। 'स्वस्ति नो अग्ने दिव आपृथि-व्या विश्वा निधेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्र ५ स्वाहा' इदमग्नये। 'सुगन्नु पन्थां प्रदिशन्न एहि ज्यो-तिष्मध्ये ह्यजरन्न आयुः। अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा' इदं वैवस्वताय। 'परं मृत्यो अनुपरे हि पन्था यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा रीरि-षोमात वीरान्स्वाहा' इदं मृत्यवे। उदकोपस्पर्शनम्॥ ततो वधू-भ्राता पूर्वोपकल्पितान्शमीपलाशमिश्रान्लाजान्शूर्पे धृतानञ्जलिनाऽऽ-दायवध्वञ्जलावावपेत्। ततः प्राङ्मुखी वधूरितष्ठन्ती 'अर्यमणं देवं कन्या अग्निमयच्छत। स नो अर्यमा देवः प्रेतोमुञ्चातुमापतेः स्वाहा' इत्यनेन मन्त्रेणाञ्जलिस्थान्लाजान्तृतीयांशं हुत्वा। 'इदम-र्यम्णे' इत्युक्त्वा 'इयं नार्युपब्रूते लाजानावपन्तिका आयुष्मानस्तु मे पति-रेधन्तां ज्ञातयो मम स्वाहा' इत्यनेनाञ्जलिस्थलाजार्धं हुत्वा 'इदमग्नये' इत्युक्त्वा 'इमान् लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संवननं तदग्निरनुमन्यतामिय ५ स्वाहा' इत्यनेन सर्वान्लाजान्हुत्वा 'इदम-ग्नये' इति ब्रूयात्॥ ततो वरः॥ 'गृणामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्ह-पत्याय देवाः। अमोऽहमस्मि सा त्वं सा त्वमस्य मो अहम्॥ सा माहम-स्मि ऋक्त्वं द्यौरहं पृथिवी त्वम्॥ तावे हि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः। संप्रियौ रोचि-ष्णू सुमनस्यमानौ। पश्येम शरदः शतं जीवेम शरदः शत५ शृणुयाम शरदः शतम्' इत्यनेन मन्त्रेण वध्वा साङ्गुष्ठं दक्षिणकरं गृह्णीयात्॥ ततो वध्वा दक्षिणं पादं धृत्वा 'आरोहेममश्मानमश्मेवत्वं ५ स्थिरा भव। अभि-

निष्ट पृतन्यतोऽम बाधस्व पृतनायतः ' इति मन्त्रेणाग्नेरुत्तरस्थिताश्मोपरि संस्थाप्य ॥ ' सरस्वति प्रेदमव सुभगे वाजिनीवति । यां त्वा विश्वस्य भूतस्य प्रजयामस्याग्रतः ॥ यस्यां भूतᳫं समभवद्यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः' इति प्रगीय 'तुभ्यमग्रे पर्य्वहन्सूर्यां वहतु नासह । पुनः पतिभ्यो जायां दाग्ने प्रजया सह' इति मन्त्रं पठित्वा वध्वा सहाग्निं परिक्रम्यैवं पुनर्द्विवारं लाजावपनादि परिक्रमणान्तं कुर्यात् ॥ ततो वधूभ्राता शूर्पकोणप्रदेशेन सर्वांल्लाजान्वध्वञ्जलावावपेत् । अथोत्थाय वध्वा ' भगायस्वाहा ' इत्यनेन हुत्वा ' इदं भगाय ' इति त्यागे कृते वरस्तयासहाचारात्तूर्ष्णीं चतुर्थं परिक्रमणं कृत्वा ब्रह्मणाऽन्वारब्धः ' प्रजापतयेस्वाहा ' इति हुत्वा ' इदं प्रजापतये ' इति त्यागं कुर्यात् । ततो वधूर्वरेण ' एकमिषे विष्णुस्त्वानयतु ' इत्युक्ते एकं पदमुदग् दद्यात् । ' द्वे ऊर्जे विष्णुस्त्वानयतु ' इत्युक्ते द्वितीयम् । ' त्रीणि रायस्पोषाय विष्णुस्त्वानयतु ' इत्युक्ते तृतीयम् । ' चत्वारि मायोभवाय विष्णुस्त्वानयतु ' इत्युक्ते चतुर्थम् । 'पञ्च पशुभ्यो विष्णुस्त्वानयतु' इत्युक्ते पञ्चमम् । 'षट्ऋतुभ्यो विष्णुस्त्वानयतु' इत्युक्ते षष्ठम् । 'सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वानयतु ' इत्युक्ते सप्तमं पदं दद्यात् ॥ अथ वरः पूर्वमभिषेकार्थं धृतकुम्भादुदकमादाय 'आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्' इत्यनेन मन्त्रेण वधूमूर्द्धन्यभिषिच्य पुनरुदकमादाय 'आपोहिष्ठा' इति तृचं पठित्वाऽभिषिच्य 'सूर्यमुदीक्षस्व' इति वधूं संप्रेष्य ' तच्चक्षुः०—इत्यादि शृणुयाम शरदः शतम् ' इत्यन्तं मन्त्रं पठित्वा सूर्यमुदीक्षते । तस्या दक्षिणांसस्योपरि हस्तं नीत्वा 'मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्' इति मन्त्रेण तद्धृदयमालभ्य ' सुमङ्गलीरियं वधूरिमाᳫं समेत पश्यत । सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतन ' इत्यनेन तामभिमन्त्र्याचारात्तद्वामभागे उपविश्य तस्याः सीमन्ते वरः सिन्दूरं दद्यात् । अथाग्नेः प्रागुदग्वा पूर्वकल्पिते उत्तरलोम्नि प्राग्ग्रीवे आनडुहे चर्मणि ' इह गावो निषीदन्त्विहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्तु ' इति मन्त्रेण वधूं दृढपुरुषो वरश्चोत्थाप्योपवेशयेत् । ततो वरः—पूर्ववद्यथास्थानमुपविश्य ब्रह्मणान्वारब्धः ' अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ' इति स्विष्टकृद्धोमं कृत्वा संस्रवान्प्रा-

स्य ब्रह्मणे पूर्णपात्रवरयोरन्यतरं दक्षिणात्वेन दत्वा स्वाचार्याय वरं दत्वा भूयसीं संकल्प्याऽऽदित्येऽस्तमिते 'ध्रुवमीक्षस्व' इति वधूं प्रेष्य 'ध्रुवमसि ध्रुवं त्वां पश्यामि ध्रुवैधिपोष्ये मयि मह्यं त्वाऽदाद् बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतम्' इति मन्त्रं वाचयित्वा ध्रुवमीक्षयीत ततो दम्पती विवाहादारभ्य त्रिरात्रमक्षारालवणाशिनावधःशायिनौ संवत्सरं द्वादशरात्रं षड्रात्रं त्रिरात्रं वा ब्रह्मचारिणौ स्यातामिति ॥

इति विवाहप्रयोगः ।

चर्मण्वतीतरणिजाशुभसङ्गमस्य
सान्निध्यभाजि कृतशालिनि मध्यदेशे ।
ख्याताभरेह् नगरी किल तत्र राजा
राजीवलोचनरतो भगवन्तदेवः ॥ १ ॥

इति श्रीसेंगरवंशावतंसमहाराजाधिराजश्रीभगवन्तदेवादिष्टमीमांसकभट्टशङ्करात्मज-
भट्टनीलकण्ठकृते भगवन्तभास्करे प्रथमः संस्कारमयूखः समाप्तः ।

च. पुस्तके दृष्टाः पाठभेदाः ।

पृ. १० पं. २७ दिगित्यस्याग्रे—

वृद्धिश्राद्धारम्भाच्च पूर्वं वैश्वदेवः कार्यः ।

वृद्धाश्राद्धौ क्षये चान्ते मध्ये दर्शे तु पार्वणे ।
एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते ॥

इति शाङ्ख्यायनपरिशिष्टात् । इत्यधिकम् ।

पृ. १३ पं. २ कुम्भः इत्यस्याग्रे—

एषु सूर्ये विद्यमाने इत्यर्थः । इत्यधिकम् ।

पृ. १३ पं. ८ ग्रहणम् । इत्यस्याग्रे—

विष्टिर्भद्रा । इत्यधिकम् ।

पृ. १६ पं. २५ यौगपद्य इत्यतः प्राक्—

पित्र्यं पितॄणां हितं श्राद्धादिकर्तारम् । इत्यधिकम् ।

पृ. १७ पं. २१ 'प्रत्यविघानाद्' इत्यत्र—

प्रवृत्त्यविघातात् ।

पृ. १९ पं. ९ संग्रहे इत्यस्यानन्तरम्—

अत्र ब्राह्मणभोजनसंख्यामाह कल्पतरौ यज्ञपार्श्वः—

गर्भाधानादिसर्वेषु ब्राह्मणान्भोजयेद्दश ।
आवसथ्ये त्रयोविंशदग्न्याधेये शतात्परम् ॥
आग्रयणे प्रायश्चित्तेष्ट्यां ब्राह्मणा दश पञ्च च ।
सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ॥
चातुर्मास्येषु चत्वारि तथा पञ्च सुराग्रहे ।
अयुतं वाजपेये चाश्वमेधे तु चतुर्गुणम् ॥

चत्वारि शतानीति संबन्धः । सुराग्रहे सौत्रामण्याम् । चतुर्गुणं प्रयुतमिति ।

पृ. २१ पं. ६ केचिद्दृढादनादर इत्यस्य स्थाने—

केचिच्छन्दादनादर इति ।

पृ. २२ पं. ६ इतीत्यस्याग्रे—

पुत्रे इति पुंस्त्वमविवक्षितमनुवाद्यविशेषणत्वात् । पृथ्वीचन्द्रोदये कार्ष्णाजिनिः—

प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वानन्तरमात्मीयान् पितॄञ्छ्राद्धेन तर्पयेत् ।। इत्यधिकम् ।

पृ. २४ पं. १२ जातकर्मोत्तरं इत्यस्याग्रे—

नामकरणस्येत्यधिकम् ।

पृ. २५ पं. १ व्युष्टेऽतीते । इत्यस्याग्रे—

यत्तु—दशाहे द्वादशाहे वापि जन्मतोऽपि त्रयोदशे ।
षोडशैकोनविंशे वा द्वात्रिंशे वर्णतः क्रमात् ।

इति मदनरत्नधृतबृहस्पतिवचने चतुर्णां वर्णानां पञ्चकाला उक्ताः, नतु ते मदनेन व्यवस्थापिताः । व्यवस्था त्वेवम् । दशाहेऽतीते तथा चैकादशाहद्वादशाहौ ब्राह्मणस्य वाशब्दस्वरसात् । त्रयोदशे इति क्षत्रियस्य सूतकान्तत्वात् । षोडशैकोनविंशौ वैश्यस्य द्वितीयवाशब्दस्वरसात् । द्वात्रिंशत्तमः शूद्रस्य सूतकान्ते भा (?) त्पान्तरत्वादाकाङ्क्षासत्त्वाच्च । एतत्संवादेन नारदोऽपि—

जन्मतो दशमे वापि द्वादशे वापि तत्पुनः ।
विप्राणां नामकर्म स्यादाशौचान्ते तु शेषयोः ।। इति ।

शेषयोः क्षत्रियवैश्ययोः । तेन विप्रशूद्रयोराशौचमध्येऽपि भवतीति केचित् । अत एव प्रयोगपारिजाते बृहस्पतिवचनमेवं पठितम् ।

द्वादशे दशमे वापि जन्मतो दिवसे शुभे ।
षोडशे विंशतौ चैव द्वाविंशे वर्णतः क्रमात् ।

तेन जन्मतो दशमे इति यथाश्रुतमेव । एतेषां च पक्षाणां स्वस्वगृह्यानुसारेण व्यवस्थेति हेमाद्रिमाधवमदनादयः । इत्यधिकम् ।

पृ. २५ पं. १८ तत्र मासनामानि वसिष्ठ आदित्यस्य स्थाने—

तत्र मासनामान्याह गार्ग्यः—

मासनाम गुरोर्नाम दद्याद्बालस्य वै पिता ।
कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथजनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथाहरिः ।
योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ।।

अत्र मार्गशीर्षादिक्रमः ।

---

१ अयमेव युक्तः पाठः । मूले 'अत्रकेचिद्.... 'उपेक्ष्यम्' इति पाठस्त्वसगत एव । नहि अत्रेतीदमा वसिष्ठवचनं परामृश्य तत्र मार्गादिक्रमोऽभिधातु शक्यः । चैत्रादीति श्रवणात् । नापि गार्ग्यवचन तस्यानुपादानात । लेखकप्रमादात्तद्ध्रंशकल्पनायामपि मार्गादिक्रमस्यैव तत्र वासिष्ठवचनानुरोधेन कल्पयितु युक्तत्वात्तदुपेक्षाहेतुतया वसिष्ठवचनोपन्यासस्य विरुद्धत्वात् ।

पृ. २६ पं. १२–२१ इति । केचिदित्यस्यस्थाने—

'इति मदनरत्नधृतगार्ग्य (? वसिष्ठ) वचनैकवाक्यत्वात् । पितामह-चरणास्तु' इति ।

पृ. २६ पं. २६ तद्वासिष्ठे''''''दुर्गेश्यमितिपङ्क्तिर्नास्ति ।

पृ. २८ पं. २० आयुषेऽपि वेत्यत्र—

आयुषे पिता ।

पृ. ३१ पं. १० इतीत्यस्याग्रे—

वर्जनीयाश्नित्यान्दर्शादीन् । इत्यधिकम् ।

पृ. ३२ पं. ६ नातिव्याहारयेदित्यस्यस्थाने—

नाभिव्याहारयेत् ।

पृ. ३२ पं. २२ 'शरदि वैश्यम्' इतीत्यस्याग्रे—

अत्र च माणवककर्तृकं गुरुसमीपगमनं विधीयत इति प्राञ्चः । पितामहचरणास्तु णिजर्थ(?र्था)विवक्षायां मानाभावात्–आचार्यकर्तृकं माणवकाधिकारिकमुपनयनमेव विधीयते नोपगमनं 'ऋत्विगीर्यजमानं वाचयति' । 'पञ्चभिः पावयति' इत्यत्र यजमानाधिकारिकाध्वर्युकर्तृकवाचनपावनादिवत् । अत एव छान्दोग्योपनिषदि गुरुकर्तृकोपनयनाकूलव्यापाररूपोपगमनर्तृकता 'जाबालिर्मातरमामन्त्र्यात्मानमुपनाययितुं गौतममाजगाम' इति । हेमाद्रौ बुधवचस्यपि 'गर्भाष्टमे वर्षे ब्राह्मणमुपनाययेत्' इति । 'एतयान्नाद्यकामं याजयेत्' इत्यत्र तु यज(मा?)नस्य प्रयोज्याध्वर्यवादिकर्तृत्वे मानाभावाद्यजेः स्वार्थवण्णिजर्थविशेषणतया परार्थवचारणाविभिन्न(?) स्यादिति णिजर्थाविवक्षया यजनमेव विधीयत इत्याहुः । अत्र केचित् । उपनयनशब्देनोपनायनमेवाभिधीयत इति तदयुक्तम् । उपयनविषयकप्रयोजकव्यापारस्योपनयनशब्दावाच्यत्वाल्लक्षणायां मानाभावादिति हेमाद्रिः । एतेन आचार्यसमीपनयनाङ्गको गायत्र्युपदेश' प्रधानं 'गायत्र्या ब्राह्मणमुपनयीत' इति कात्यायनस्मृतौ चोपनयनस्य गायत्र्युपदेशाङ्गत्वदर्शनात् । एवं चोपनयनपदं योगरूढं समिद्दर्शादिपदस्येवाङ्गवाचिनोऽप्युपनयनपदस्य तत्संबन्धेन प्रधानसंज्ञोपपत्तेरित्यपास्तम् । एकत्र योगरूढयो(?र्योर)र्योगरूढपदप्रवृत्तेः यथा पङ्कजपदे । अत्र तु नयने योगस्य गायत्र्युपदेशे च रूढस्य(?ढे.) सत्त्वाद्वेन नैकत्रनियमानत्वमिति । स्मृत्यर्थसारे तु–आचार्यसमीपनयनमग्निसमीपनयनं वा गायत्रीवाचनं वा प्रधानमित्युक्तम् । इत्यधिकम् ।

पृ. ३३ पं. ३ द्रविणशीलाढ्य इत्यस्य स्थाने—
द्रविणशीलाढ्यः ।
पृ. ३३ पं. ७ प्रागेव तदूर्ध्वमित्यस्य स्थाने
प्रागेव न तदूर्ध्वं ।
पृ. ३३ पं. १५ गौणकाल इत्यस्याग्रे—
उपनयनकालस्य परावधिमाहाश्वलायनः । इत्यधिकम् ।
पृ. ३४ पं. ९ निरंशः इत्यस्याग्रे—
तथाचोक्तम्—
राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते ।
अत्रिः—

पराजितेऽतिनीचस्थे नीचे शुक्रे गुरौ तथा ।
व्रतिनं यदि कुर्वीत स भवेद्वेदवर्जितः ॥

राजमार्तण्डः—

नष्टे शुक्रेऽथवा जीवे निरंशे चैव भास्करे ।
उपनीतस्य शिष्यस्य जडत्वं मृत्युरेव च ॥

चण्डेश्वरः—

दाहे दिशां चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे वा ।
केतौ तथोल्काशुकरप्रकाशे त्र्यहं न कुर्याद्व्रतमङ्गलादि ॥

इत्यधिकम् ।
पृ. ३४ पं. १७ अनध्यायत्वं वक्ष्यत इत्यस्याग्रे—
लल्लः—व्रतेऽह्नि पूर्वसंध्यायां वारिदो यदि गर्जति ।
तद्दिने स्यादनध्यायो व्रतं तत्र विवर्जयेत् ॥

इति विशेषण वर्जयेदित्यर्थकेन विवर्जयेदितिपदेन पूर्वसंध्यायां गर्जने दोषाधिक्यं सूच्यते

तथा—पौषादित्रिषु मासेषु कृष्णं चैवाष्टकात्रयम् ।
एका ज्ञेयाश्विने मासि हेमन्ते चतुरष्टकाः ॥
अष्टकाश्च समुद्दिष्टाः सप्तम्यादिदिनत्रयम् ।
नाधीयीत च शास्त्राणि व्रतबन्धं विवर्जयेत् ॥
नचोत्पातहते ऋक्षे व्रतोपनयनं शुभम् । इति ।

नान्दीश्राद्धोत्तरं विशेष उक्तो ज्योतिर्निबन्धे—

नान्दीश्राद्धे कृते पश्चादनध्यायस्त्वकालिकः ।
तदोपनयनं कार्यं व्रतारम्भं न कारयेत् ॥

इदं च येषां तद्दिने एव वेदारंभो विहितस्तान्प्रत्येव नान्येषामिति प्रयो-गरत्ने पितामहचरणाः । इत्यधिकम् ।

पृ. ३४ पं. २१ द्वितीयायाः०-मान्यास्त्वित्यन्तस्य स्थाने—

द्वितीयाया विहितत्वात् । अत्रानध्यायपदं नित्यानध्यायपरं न तु नैमि-त्तिकानध्यायपरं तेषामनित्यत्वेन नित्यानित्यसंयोगविरोधात् । ननु सप्तम्यादिदिनत्रयमिति नवम्या अपि निषेधात् कोऽस्य विषयः । उच्यते—निषेधद्वयवशाद्दोषाधिक्यकल्पनेति केचित् । धर्मप्रकाशे पितामहच-रणास्तु । इति ।

पृ. ३४ पं. २९ इत्याहुरित्यस्याग्रे—

कालविशेषोपनीतस्य पुनरुपनयनमाह वसिष्ठः—

पापांशकगते चन्द्रे अरिनीचस्थितेऽपि च ।
अनध्याये चोपनीतः पुनः संस्कारमर्हति ॥

भरद्वाजः—विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे ।
अनध्याये चोपनीतः पुन. संस्कारमर्हति ॥ इति ।

नारदीये तु अपराह्ने चोपनीत इति तृतीयपाद उक्तः । अपराह्णस्त्रिधा-विभक्तदिनस्यान्त्यभागः । तथाच ज्योतिर्मनुः—

सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनम् ।
मध्याह्ने मध्यमं प्रोक्तमपराह्णे विगर्हितम् । इति ॥

तन्नामा(?न्माना)नि स्कान्दे—

ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्तानां तु पञ्चकम् ।
पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परम् ॥
अपराह्णस्ततः प्रोक्तो मुहूर्तानां तु पञ्चकम् । इति ।

अत्रानध्यायपदं नित्यनैमित्तिकसाधारणानध्यायपरम् ।

नैमित्तिकमनध्यायं कृष्णे च प्रतिपद्दिनम् ।
मेखलाबन्धने शस्तं चौले वेदव्रतेपि च ।

इति वसिष्ठवचने नैमित्तिकानध्यायकृष्णप्रतिपदादिनित्यानध्या-यानां च—

स्वाध्यायवियुजो घस्राः कृष्णप्रतिपदादयः ।
प्रायश्चित्तनिमित्ते तु मेखलाबन्धने मताः ॥

इति कालादर्शादिधृतवृद्धगार्ग्यवचनात्प्रायश्चित्तोपनयनपरत्वैव नापूर्वो-पनयनपरता । अनध्यायपदस्य नित्यानध्यायपरत्वे तु नैमित्तिकान-

ध्यायवत्प्रतिपद्यप्यपूर्वोपनयनापत्तेः । एतेन पुनःसंस्कारविधिगतानध्याय-पदस्य नित्यानध्यायपरत्वेनोपपन्नस्यानित्यानध्यायग्राहकत्वासंभवात् । अग्नीपोमीययागोत्कर्षपरतया प्रतीयमानेन 'यदेवादः पौर्णमासं हविः' इति वचनेनाग्नीपोमीयपुरोडाशयागस्यैवोत्कर्षो नाग्नीपोमीयोपांशुयाजस्य नित्याग्नीपोमीयग्रहणायोगादिति परास्तम् । किंच दृष्टान्त एवाग्नीपोमीयपुरोडाशस्यैवोत्कर्षे नित्याग्नीपोमीयसंबन्धो हेतुत्वेन भाष्यतन्त्ररत्नशास्त्रदीपिकादिग्रन्थेषु उक्तः । प्रत्युत विकल्पसंभवान्नोत्कृष्यते आज्यमित्यादि तन्त्ररत्नग्रन्थस्वारस्यादग्नीपोमीयाज्यस्योत्कर्ष एव प्रतीयत इति ।

यत्तु 'विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र संनिपतेयुस्त्र्यहमनध्यायो यावद्भूमिर्व्युदकेत्येके' इति धर्मप्रश्नोदाहृतवाक्येऽपर्तौ वर्षे त्रिरात्रमित्युक्त्वान्माघादिषु वृष्टेर्नियतत्वान्नासावपर्तुरिति तत्र वृष्टौ नानध्यायः। वृष्टिकालो दक्षिणायन एव उदगयनेऽप्यपर इत्यर्थस्य ज्ञापकं महाभारते वैराटपर्वणि बृहन्नडावस्थपार्थवचनमुत्तरं प्रति 'गाण्डीवमेतत्पार्थस्य लोकेषु विदितं धनुः' इति प्रकृत्य—

> एतद्वर्षसहस्रं तु ब्रह्मा पूर्वमधारयत् ।
> ततोऽनन्तरमेवाथ प्रजापतिरधारयत् ॥
> त्रीणि पञ्चशतं चैव शक्रोऽशीतिं च पञ्च च ।
> सोमः पञ्चशतं राजा तथैव वरुणः शतम् ॥
> पार्थः पञ्च च षष्टिं च वर्षाणि श्वेतवाहनः । इति ।

अत्र खाण्डवदाहानन्तरलब्धधनुषः पार्थकर्तृकधारणे पञ्चषष्टिवत्सरात्मकवर्षाणां बाधितत्वात्सार्धद्वात्रिंशद्वत्सराः पञ्चषष्टिवर्षशब्देन विवक्षिता इत्यवश्यं वाच्यम्। अन्यथातीतानागतवत्सराभिप्रायव्याख्यानेऽधारयदिति भूतनिर्देशानुपपत्तेरिति । तदयुक्तम् । पञ्चषष्टिवर्षाणीत्यस्योत्तरावधिमात्रसमर्थकत्वात्। दृश्यते च लोके पञ्चाशद्वर्षपर्यन्तमध्यापनादि कृतमित्यादयः प्रयोगा उत्तरावधिसमर्थका नहि तत्रोत्पत्त्यादिरूपः पूर्वावधिरपि प्रतीयते येन बाधः स्यात्। किंच दक्षिणायनोत्तरायनयोर्वृष्टिकालत्वे—

> अनूराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः ।
> यावच्चरति वै तावद्कालं मुनयो विदुः ॥
> कालवृष्टौ तु तत्कालमकाले तु त्रिरात्रकम् ।
> अतिमात्राथवा वृष्टिर्नाधीयीत दिनत्रयम् ॥
> तयोस्तु द्विदिनं चैव वृष्टिमात्रे दिनं स्मृतम् ।

इति स्मृतिरत्नावल्यादिधृतगार्ग्यवचने तथा आर्द्रादिज्येष्ठान्तं वर्षर्तु-रुक्तस्तत्र वृष्टिः कालवृष्टिरिति स्मृत्यर्थसारे अपर्तौ वर्षे त्रिरात्रमित्ये-तस्योपनिषद्भाष्ये त्वार्द्रादिज्येष्ठान्तं वर्षर्तुरुक्तस्तत्र वृष्टिकालाकालपरिभाष-णवैयर्थ्यापत्तेः । एतदभिप्रायेणैव यस्मिन्देशे यो वर्षाकालस्ततोऽन्यत्रापर्तु-रित्यापस्तम्बीयधर्मप्रश्नवाक्यस्य व्याख्याने उज्ज्वलायां प्रथमप्रश्ने तृतीयपटले हरदत्तीयग्रन्थः संगच्छत इति ।

यत्तु यावद्भूमिर्व्युदकेत्येके (इति) धर्मप्रश्न एव पक्षान्तरसत्त्वात्त्रिरात्रा-नध्यायस्य नित्यत्वमिति तदप्ययुक्तम् । ईदृङ्नित्यत्वस्याष्टम्याद्यनध्याये-ष्वव्यापनं तथा सकलग्रन्थसिद्धनित्यानध्यायत्वं न स्यात् । एतेन 'नापि मनूक्ताकालिकस्य नित्यत्वं, मनुरब्रवीदित्युक्तिर्विकल्पार्थेत्यन्ये' इति मेधा-तिथिना व्याख्यानादिति परास्तम् । इत्यधिकं दृश्यते ।

पृ. ३६ पं. १२ केचिदित्यस्याग्रे—

चर्याणीति शेषः । इत्यधिकम् ।

पृ. ३६ पं. ४ अशक्याङ्गहीनेनेत्यस्य स्थाने—

अशक्याङ्गहानेनेति ॥

पृ. ३६ पं १४ परः पर इत्यस्याग्रे—

अत्र यद्यपि भ्रातृशब्देन वटोरेव भ्राता प्रतीयते तथापि पितुरेव स ग्राह्यः । तथा च पितामहः—इत्यधिकम् ।

पृ. ३६ पं. १६ इतीत्यस्याग्रे—

ज्ञातयः सपिण्डाः । अग्रजा वटोरपेक्षया गोत्रजेषु सपिण्डेषु तद्भि-न्नेषु मध्ये ये अग्रजा वृद्धास्तदुपनयनाचार्यत्वाधिकारिणः ।

यत्तु—असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।

इति योगीश्वरवचनेष्वता(?भ्रातृणा)मधिकारागमः स तु पितृव्याभाव-विषयक इति केचित् । भगिन्यादिविवाहविषय इति तु युक्तम् । उक्ता-धिकार्यभावे शौनकः—

कुमारस्योपनयनं श्रुताभिजनवृत्तवान् ।
तत्या (?) भूतनिःशेषपाप्मा कुर्याद् द्विजोत्तमः ॥ इति ।

सोऽपि स्वशाखीय एव । तथा चाचार्यं कुर्यादित्यधिकृत्य व्यासः—

वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम् ।
स्वशाखीयमनालस्यं विप्रं कर्तारमीप्सितम् (?) ॥ इति ।

इति कालादिनिर्णयः । इति पाठान्तरम् ।

पृ. ३७ पं. १ कार्ष्णंरौरव इत्यतःप्राक्—

'वस्तच्छगलका अजे' इत्यमरोक्तेः आजमेव वासः । इत्यधिकम् ।

पृ. ३८ पं. ९ 'एवंच······न विधः' इत्यस्य स्थाने—

तदसंभवे मदनरत्ने कात्यायनः—

कार्पासक्षौमगोवालशणवल्कतृणोद्भवम् ।
तदसंभवतो धार्यमुपवीतं द्विजातिभिः ॥

असंभवतः असंभवात् । तथाच पूर्वोक्तासंभवे कार्पासं धार्यम् । इति ।

पृ. ३९ पं. १८ उपवीतनिर्णय इत्यस्याग्रे—

एवमुपवीतधारणानन्तरमाचमनमुक्तं जयन्तेन । 'यज्ञोपवीतिनं कृत्वा यथाशास्त्रमाचामयति' इति । आचमनदेशश्च कारिकायां 'आचान्तमुत्तरेण' इति आचमनप्रकार उक्तो जयन्तेन । अन्तर्जानुकरः प्रणवहृत् सावित्री(?)बद्धशिखो दक्षिणहस्तं गोकर्णाकारं संहताङ्गुलिं कृत्वा ब्रह्मतीर्थेन वीक्षितमम्बु फेनबुद्बुदविकृतगन्धरसवर्जितं हृद्गमं त्रिः पिबेत् । ऋग्वेदः प्रीयतामिति प्रथमम् । यजुर्वेदः प्रीयतामिति द्वितीयम् । सामवेदः प्रीयतामिति तृतीयम् । पाणी प्रक्षाल्यालोमकौ संवृतावोष्ठौ संहिताङ्गुलिपाण्यङ्गुष्ठमूलेन द्विः परिमृजाति । अथर्ववेदः प्रीयतामिति प्रथमम् । इतिहासपुराणानि प्रीयन्तामिति द्वितीयम् । ततः पाणी प्रक्षाल्य पादौ शिरश्चाभ्युक्षेत् । विष्णुः प्रीयतामिति अपः चाह्मेण(?)इन्द्रः प्रीयतामिति । एवमुपस्थितं वटुं गायत्रीमुपदिशेत् । तदाह कात्यायनः—'सावित्र्या ब्राह्मणमुपनयेत्, त्रिष्टुभा राजन्यं, जगत्या वैश्यं, सर्वेषां वा सावित्रीति । एतदेव स्पष्टमाचष्ट शातातपः तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य, देवस्य सवितुरिति राजन्यस्य, विश्वारूपाणीति वैश्यस्येति । सा च प्रणवव्याहृतिपूर्वा उपदेष्टव्येत्याह लौगाक्षिः—ॐ भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीमन्वाह पच्छोर्द्धर्चशः सर्वां सन्ततमिति । सावित्रीग्रहणमितरयोरप्युपलक्षणम् । उपदेशस्थानं वक्ष्यते ।

(अत उत्तरं ३७ पत्रस्थं मेखलाप्रकरणं ततः)

तथाचाश्वलायनः—

त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता ।
तद्ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः ॥
वेदत्रयेण वृतोहमिति मन्येत स द्विजः ।
तद्ग्रन्थयस्तदङ्गानि तद्रहस्यानि संस्मरेत् ॥ इति ।

(अथ दण्डनिर्णयः स्मृतः)

गायत्र्युपदेशस्थानं त्वग्नेरुत्तरदेशः तदुक्तं शाङ्खायनगृह्ये—' सावित्रीत्वे-
वो(?)त्तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख ······ ' इति। यस्तु
कार्तीयपारस्कराभ्यां विकल्प उक्तः । अथासौ सावित्रीमन्वाहोत्तरतोऽग्नेः
प्रत्यङ्मुखायोपविष्टायोपसन्नाय दक्षिणतस्तिष्ठत आसीनायेत्येक इति स
कार्तीयानाम् । बह्वृचानां तु वेदैक्यादुत्तरस्यामेव । एकेग्रहणं षडङ्गमेक इति
वदभिमतत्वसूचनाय न विकल्पाय इति केचित् । वस्तुतस्तु बह्वृचाना-
मग्नेः पश्चिमायामेव गायत्र्युपदेशः । तत्र गुरोर्दक्षिणस्यामासनस्य समि-
दाधानमुक्त्वा शौनक आह—गुरुरपि अग्नेः पश्चिमभूतले आसीत
प्राङ्मुखः शिष्योऽप्याचार्याभिमुखो भवेदिति । तदर्थसंग्रहकृता जयन्ते-
नाप्युक्तम् । 'अथोभयोरप्यग्नेः पश्चाद्यथोपदेष्टुं शक्यं तथोपविशत्याचार्यः'
इति । अत एव वृत्तौ कारिकायां प्रयोगपारिजाते जीर्णे प्रयोगरत्ने च मयि
मेधामित्यादिभिः षण्मन्त्रैरग्न्युपस्थानमुक्त्वा दक्षिणं जान्वाच्य विधिवदु-
पसंगृह्याचार्यं ब्रूयात् 'अधीहि भो' इति प्रैष उक्तः नतूत्तरदेशगमनमुक्तम् ।
यत्त्विदानींतनप्रयोगरत्ने अग्नेरुत्तरतो गत्वा 'अधीहि भो' इति ब्रूयादि-
त्युक्तं तत्पुनर्दक्षिणस्यां गमनानुक्तेः केनचित्प्रक्षिप्तमित्युन्नीयत इति दिक् ।

इत्युपनयनम् ।

पृ. ४० पं. २० अगमने इत्यस्य स्थाने—

यात्रार्थं गमने

पृ. ४० पं. २३ निमित्तानीत्यस्याग्रे—

अथ जातकर्मादिपुनरुपनयनान्तानां निमित्तानि पराशरः—

यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः ।
अनाशकनिवृत्तश्च गार्हस्थ्यं च चिकीर्षति ॥
चरेत्त्रीणि च कृच्छ्राणि त्रीणि चान्द्रायणानि च ।
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् ॥

वसिष्ठः—

संन्यस्य दुर्मतिः कश्चित्परावृत्तिं व्रजेद्यति ।
स कुर्यात्कृच्छ्रमश्रान्तः षण्मासान्प्रत्यनन्तरम् ॥

अत्र षाण्मासिकं विप्रस्य, चान्द्रायणत्रयं क्षत्रियस्य, कृच्छ्रत्रयं वैश्यस्येति
विज्ञानेश्वरः । देशान्तरे गतस्याध्वदाहिके कृते यद्यसौ पुनरायाति तदा
विशेषमाह मदनरत्ने वृद्धमनुः—

जीवन्यदि समागच्छेद् घृतकुम्भे निवेश्य च ।
उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् ॥
द्वादशाहं व्रतं कुर्यात्त्रिरात्रमथवास्य तु ।
स्नात्वोद्वहेत्ततो भार्यामन्यां वा तदभावतः । इति । इत्यधिकम् ।

पृ. ४२ पं. २३ गीतवादने इत्यस्याग्रे—

द्यूतं च जनवादं च परीवादं तथानृतम् । इति ।

जनवादं बहुजनसंवादः । इत्यधिकम् ।

पृ. ४२पं. २९

शिखाजटीत्यस्य स्थाने शिखामात्रजटी ।

पृ. ४३ पं. १२ब्रह्मचारीत्यत्र—

ब्राह्मणो ब्रह्मचारी

पृ. ४४ पं. ९ गुरुरित्यस्याग्रे—

इत्यभिवादनम् । प्रसङ्गादभिवादनीयगुर्वादिस्वरूपं निरूप्यते । इत्यधि०।

पृ. ४४ पं. १९ संज्ञेत्यस्य स्थाने—

संज्ञासंज्ञि ।

पृ. ४४ पं. २० विप्रस्नात्रेत्यस्य स्थाने—

विप्रस्यात्र ।

पृ. ४४ पं. २२ सिद्धिरित्यस्याग्रे—

क्षत्रियादिरपि वेदाध्ययनाभावे मनुवचनात्सिद्धिः । एवं च त्रैवर्णिकानां । इति पाठान्तरम् ।

पृ. ४८ पं. १६ इतीत्यस्याग्रे—

पञ्चोक्तानि तेनैव—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥

वित्तादिभिर्युक्तो हीनजातिरप्युत्कृष्टजातेर्मान्य इत्यर्थः ।

पृ. ४९ पं. ११ अवरमीमांसेत्यस्य स्थाने—

अध्वरमीमांसा ।

पृ. ४९ पं. १४ नद्याकाश०—अतोवेत्यन्तस्य स्थाने—

द्वितीयशाखाध्ययनमित्यत्रैकत्वं व्यावर्तकं भवति अतो नात्र एक एव स्वाध्यायोऽध्येतव्य इत्यर्थः किंतु स्वाध्यायोऽध्येतव्य एवेत्यत्यन्तायोगव्यावृत्त्या साधारणो वाक्यार्थः । अत एव वसिष्ठेनोक्तम्—

पृ. ६० पं. १ प्रागग्रानित्यस्याग्रे—

दर्भानिति शेषः । इत्यधिकम् ।

पृ. ६१ पं. २० वेत्तेत्यस्याग्रे—

अद्रोह्यनपराधी । मेधावी धारणावान् । असूयकः परदोषवक्ता । शक्तः शुश्रूषायाम् । आप्तः अप्रतारकः । ज्ञानदो विद्याप्रदः । वित्तदः अर्पणपूर्वमर्थदाता । इत्यधिकम् ।

पृ. ६२ पं. ६ वाचरेदित्यस्य स्थाने—

वारभेत् ।

पृ. ६२ प. १२ घोरकिल्बिषमित्यस्य स्थाने—

चौरकिल्बिषम् ।

पृ. ६२ पं. १६ इत्यर्थः इत्यस्याग्रे—

एतच्चेत्यधिकम् ।

पृ. ६३ पं. २६ इतीत्यस्याग्रे—

गार्ग्योऽपि—रात्रौ नवसु नाडीषु चतुर्थी यदि दृश्यते ।

रात्रौ यामद्वयादर्वाक् सप्तमी च त्रयोदशी ॥

प्रदोषः स तु विज्ञेयः सर्वविद्याविगर्हितः ।

पृ. ६४ पं. ६ समनन्तरम्—

संग्रहेऽपि—महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।

मध्ये द्वियामयो रात्रौ नाधीयीत कदाचन ॥ इत्यधिकम् ।

पृ. ६४ पं. २६ सायंवेत्यत्र—

सायं वा द्विमुहूर्तो ।

पृ. ६५ प. २७ यत्रनध्यायेत्यस्य स्थाने—

अनध्यायनिमित्ता ।

पृ. ६५ पं. २८ दृश्येतेत्यर्थ इत्यस्याग्रे—

अत्रापि त्रिमुहूर्ततिथिसत्त्वे सुतरामनध्याय इति सूच्यते ।

तथा च भविष्ये—उदयेऽस्तमये चाऽपि मुहूर्तत्रयगामि यत् ।

तद्दिनं तदहोरात्रमनध्यायविधौ विदुः ॥

केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः ।

तावदेव त्वनध्यायो न तन्मिश्रे दिनान्तरे ॥ इति ।

तन्मुहूर्तत्रयगामिदिनं तिथिर्यस्मिन्नहोरात्रे तदहोरात्रमित्यर्थः । दिनान्तरे तिथ्यन्तरे ।

प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी ।

दिनं दूषयते सर्वं सुरा गव्यघटं यथा ॥

इति वचनं तत्प्राच्याचारमूलकं ज्ञेयम् । इत्यधिकम् ।

पृ. ५५ पं. २२ तत्कामयतीत्यस्य स्थाने—

तत्कामयते इति ।

पृ. ५५ पं. २३ परिलिखने इत्यस्य स्थाने परिलिखिते ।

पृ. ५५ पं. २५ सवद्रा······इत्यस्य स्थाने—

सर्वराष्ट्रेषु ।

पृ. ५६ पं. १ श्राद्धभागेष्वित्यस्य स्थाने—

वेदभागेषु ।

पृ. ५७ पं. १२ समनन्तरम्—

अहोरात्रानुवृत्तौ वसिष्ठः—

कलायान्यसितान्भक्ष्यान्यन्यान्यच्छ्राद्धिकं भवेत् ।
प्रतिगृह्याप्यनध्यायः ॥ इति ।

पृ. ५७ पं. १८ स्वप्नान्तं मेहनादि इत्यस्य स्थाने—

स्वप्नान्तमोदयादिति ।

पृ. ५७ पं. २१।२२ प्राधानस्येत्यस्य स्थाने—

प्राधीतस्य ।

पृ. ५८ पं. १३ मृगमारभ्येत्यस्य स्थाने—

आर्द्रामारभ्य ।

पृ. ५८ पं. २५ नवश्राद्धीयमति इत्यस्य स्थाने—

नवश्राद्धीयामति ।

पृ. ५९ पं. २ स्थाने—

शक्रमुत्थापयेद्राजा विश्वश्रवणवासवैः ।

विश्वं वैश्वदेवमुत्तराषाढा वासवं धनिष्ठा । शक्रध्वजपातकालोऽपि पुराणे—

मासि भाद्रपदे राजन् शक्रयष्टिनिपातनम् । इति ।

पृ. ५९ पं. १९ वसिष्ठेनेत्यस्याग्रे—

यदि हस्ती संवत्सरं व्याघ्रश्चैव तथैति । अत्र व्याघ्रविषयेऽपि प्रथमारम्भो ग्राह्यः ।

उत्तरग्रन्थस्य मुद्रणावसर एव च.पुस्तकलाभात्तत्स्थपाठान्तराणां मूल एव समावेशः कृत इत्युपरम्यते ।

म. गं. याज्ञे.

विक्रेयसंस्कृतपुस्तकानि ।

श्रीमद्भगवद्गीता ।

प्रथमो गुच्छः—आनन्दगिरिकृतटीकासंवलितशांकरभाष्य—जयतीर्थविरचितटीकासंवलितानन्दतीर्थीय (माध्व) भाष्य—रामानुजभाष्य—पुरुषोत्तमजीप्रकाशितामृततरङ्गिणी—नीलकण्ठीसमेता । मञ्जुलैरायसाक्षरैर्मुद्रिता । पत्राण्यष्टशतपरिमितानि सुचिक्कणानि । मूल्यम् रू. ६—०—०.

श्रीमद्भगवद्गीता ।

द्वितीयो गुच्छः । प्रथमषट्कम्—निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता—'तत्त्वप्रकाशिका' श्रीमधुसूदनसरस्वतीकृता—'गूढार्थदीपिका' श्रीशङ्करानन्दप्रणीता—'तात्पर्यबोधिनी' श्रीधरस्वामिकृता—'सुबोधिनी' श्रीसदानन्द विरचितः—'भावप्रकाशः' श्रीधनपतिसूरिविरचिता—'भाष्योत्कर्षदीपिका' दैवज्ञपण्डितश्रीसूर्यविरचिता—'परमार्थप्रपा' पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः—'अर्थसंग्रहः' इत्येताभिर्व्याख्याभिः सहितायाः श्रीमद्भगवद्गीतायाः प्रथमादिषडध्यायात्मकं प्रथमं खण्डम् । अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, दृष्टा न क्लिश्नीयुरिति । पत्रसंख्या सार्धपञ्चशतानि । मूल्यम् रू. ३—१२—०.

श्रीमद्वाल्मीकिरामायणम् ।

बालकाण्डम्—सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुः शृङ्गवेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्ना प्रणीतया रामायणतिलकाख्यया टीकया, पण्डितश्रीवंशीधरशिवसहायाभ्यां प्रणीतया रामायणशिरोमण्याख्यया टीकया, श्रीगोविन्दराजप्रणीतया भूषणाख्यया टीकया च सह मुद्रयितुमारब्धमस्माभिः श्रीमद्वाल्मीकिरामायणम् । तच्च पञ्चभिः खण्डैः समापयिष्यामः । तत्रेदं प्रथमं खण्डम् । मूल्यम् रू. ३—०—०.

कारिकावली ।

सिद्धान्तमुक्तावलीसहिता—न्यायवैशेषिकदर्शनयोर्व्युत्पित्सूनां कृते प्रणीतेषु प्रकरणग्रन्थेषु सिद्धान्तमुक्तावलीसमुद्भासिता कारिकावली मूर्धाभिषिक्तेत्यत्र न विदुषां वैमत्यम्, किंतु तत्र दीधितिकृदुपसृततया विवेकसरण्या संक्षेपतः उद्भवमानानामर्थानामुपनिबद्धतया प्रायः खिद्यन्ति नव्याश्छात्राः, इति तेषामुपकारायास्माभिः प्रायः सर्वेषु विषमस्थलेष्वतिविस्तृतां सरलां सुबोधां च टिप्पणीं पण्डित—जीवरामशर्मभिः कारयित्वा तया सहेयं दृढतरेषु सुचिक्कणेषु पत्रेषु

स्थूलाक्षरैर्मुद्रिता। अस्याः सार्धशताभ्यधिकपत्रयुताया अपि सर्वसौलभ्याय मूल्यमतीव न्यूनं स्थापितम्। मूल्यम्. रू. ०—७—०.

कुमारसंभवं महाकाव्यम्—कविवरश्रीकालिदासविरचितमिदं सप्तमसर्गपर्यन्तं मल्लिनाथकृतसंजीविन्या चारित्र्यवर्धनकृतशिशुहितैषिण्या च संवलितं तत आसमाप्ति सीतारामकृतसंजीविन्यालंकृतं सुललितैरायसाक्षरैर्मुद्रितमतीव दर्शनीयमस्ति। मूल्यम् रू. १—४—०.

स्तोत्रमुक्ताहारः—अस्मिन् २५६ स्तोत्राणि संगृहीतानि। यद्यपि सन्ति भूरीणि स्तोत्रपुस्तकानि मुद्रितानि भूरिभिस्तथापि न तेष्वियतां स्तोत्ररत्नानां संग्रहः। अस्माभिः पूर्वमसुद्रितानां स्तोत्राणां पुस्तकानि काश्यादिक्षेत्रेभ्यो भूयसा प्रयासेन द्रविणव्ययेन च समासाद्य तेभ्यश्च प्रसादगुणयुक्तानि स्तोत्राणि संकलय्य संशोध्य च तानि भाविकजनानां कृतेऽत्र समावेशितानि तदाशास्महे श्रद्धावन्तो जनाः सफलयिष्यन्ति प्रयत्नमस्माकममुमिति। मूल्यम् रू.०—८—०.

विदुरनीतिः—संस्कृतटीकोपेता नीतिशास्त्राभ्यासिनां विद्यार्थिनामतीवोपयोगिनी। मू. रू. ०—४—०.

रघुवंशमहाकाव्यम्—श्रीकालिदासकृतम्। मल्लिनाथकृतसंजीविन्याख्यटीकासहितम्। मूल्यम् रू. ०—१०—०.

वेदान्तरहस्यम्—वेदान्तवागीशभट्टाचार्यविरचितम्। अत्राद्वैतमतसिद्धान्तो निरूपितः। उपपत्तिश्च प्रदर्शिता। भाषाऽतिसरला प्रौढा च। मूल्यम्. रू. ०—१—०.

उत्तरगीता—गौडपादीयदीपिकाख्यव्याख्यायुता। भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येत्येतावत्कथनमलमस्या महिमानमवगमयितुम्। मूल्यम् रू. ०—३—०.

विशिष्टाद्वैतमतविजयवादः—नरहरिपण्डितकृतः। अत्र विशिष्टाद्वैतमते परेषामाक्षेपान्निराकृत्य विशिष्टाद्वैत एवोपनिषदां तात्पर्यं व्यवस्थापितम्। मूल्यम् रू. ०—१—०.

प्रारब्धमुद्रणा ग्रन्थाः।

तैत्तिरीयोपनिषत्—श्रीमच्छंकरभगवत्पादकृतभाष्येणानन्दगिरिकृतटीकायुतेन सहिता।

वैशेषिकदर्शनम्—श्रीशंकरमिश्रकृतवैशेषिकसूत्रोपस्कारप्रभृतिव्याख्यानत्रयोपेतम्।

'गुजराती' मुद्रणालयाधिपतिः।

फोर्ट सासून बिल्डिंग—मुंबई.